प्राची ग्रन्थमाला   संस्कृत १

नारायण-शतकम्

प्राची

महाकवि-श्रीविद्याकरपुरोहित-प्रणीतं
कविचन्द्र-श्रीपीताम्बरमिश्र-कृतया
व्याख्यया समुद्भासितम् ।

मूल्यं पादोनरूप्यकम् ।

Digitized by srujanika@gmail.com

Prachi Series 43.

नारायण-शतकम्

महाकवि-श्रीविद्याकरपुरोहित-प्रणीतम्

कविचन्द्र-श्रीपीताम्बर-कृतया

व्याख्यया समुद्भासितम् ॥

इदं च

पुरीसंस्कृतकलेजाध्यक्षेन

एम्. ए, काव्यव्याकरणतीर्थोपाधिकेन

करइत्युपाह्व--

श्रीकृष्णचन्द्रशर्मणा

संशोधितं संकलितञ्च ।

कटकनगरे

प्राचीसमित्या प्राची मुद्रालये

मुद्रयित्वा प्रकाशितम् ।

सन १९३४.

मूल्यं पादोनरूप्यकम् ।

Digitized by srujanika@gmail.com

मुखबन्धः

कविवरश्रीविद्याकरपुरोहितप्रणीतं नारायणशतकाख्यखण्डकाव्यमिदं पण्डितप्रवरश्रीपीताम्बरमिश्रकृतव्याख्ययोद्भासितं साम्प्रतं प्रेक्षावतां समक्षमुपस्थापितम् । खण्डकाव्यमिदमखण्डरसैकालम्बनमपूर्वं प्रत्यक्षरमाख्यापयति काव्यरसास्वादनस्य ब्रह्मानन्दासम्भेदम् । परमभागवतोऽयं कविचक्रवर्त्ती निगमागमशिखापचेलिमफलस्याद्वैतब्रह्मतत्त्वात्मनश्चिद्घनानन्दमूर्त्तेः श्रीमद्भगवतोऽनादिनारायणस्य वाङ्मनसाविषयस्यापि श्रुतिस्मृतिपुराणमीमांसोपनिषत्प्रमाणविस्तरैः संस्तूयमानातिभूममहिम्नः सर्गादौ प्रधानप्रेरकस्य सगुणब्रह्मणो भक्तेच्छोपात्तविग्रहस्य अङ्गप्रत्यङ्गायुधाकल्पानां निपुणमतिदुरूहोपमानवर्णनमुखेन " चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव " इत्यभियुक्तोक्तिं सर्वथा प्रमाणीकुर्वन्नविद्यान्धधिया विलुप्तचेतनानामर्वाग्दृशां "भगवद्ध्यानाधीना हि परमपुरुषार्थःप्रत्यक्तत्त्वोपलब्धि"रिति निगमागमतत्त्वमात्माभिनिष्ठानमदर्शयत् । तात्पर्यमिदमुपक्रमोपसंहारगतपद्याभ्यामवसीयते । अत्र खलु प्रतिपाद्य नवनवा रसमयी भगवत्यनन्यविषया रतिर्महत्तराभिधेयलक्ष्मीः प्रसादगुणप्रगुणितानवद्यापूर्वपदकदम्बविन्याससौष्ठवञ्च कवेरप्रतिमप्रतिभानमनन्यसामान्यवैदुष्यं कवित्वशक्तिमसाधारणीं च स्पष्टमाचक्षते सहृदयेभ्यः काव्यरसास्वादरसिकेभ्यः ॥ "एकःशब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवती"ति । नारायणपरा देवाः नारायणपरा मखाः नारायणपरं ज्ञानमिति—जन्मलाभः परं पुंसामन्ते नारायणस्मृतिरिति च" नियमानुवर्त्तिनानेन कविकेशरिणा रहस्योपासनाकाण्डादिषु प्रतिपादितं भगवत्प्रतीकोपासनमाध्यात्मिकं सुकोमलमतिग्राह्यनवनवरसभावसम्भारः

Digitized by srujanika@gmail.com

सम्भूतकान्तासम्मित-काव्यात्मना सहृदयहृदयासेचनकसदलङ्कृतिपदविन्यासैर्वर्णयता न केवलमात्माऽमरगणाशास्यामरा(?)नपदमारोपितः; परन्त्वेतत्पद्यावलीहृद्यभावप्रकर्षावर्जितहृदयेभ्यः सर्वेभ्योऽपि पुमर्थसार्थाभ्यर्थ्यार्पितेति नातिभणितम्। अगुरुप्रतीकमपीदं शतकमात्मीयगुणगणगरिमोल्लासैः शतकान्तराण्यतिशेते। भागवतमवलम्ब्यात्र, हि विद्वन्मतिनिपुणनिरूप्यरूपकशतैः प्रमातिगातिधाम्नो विश्वविज्ञानमूर्त्तेर्भगवतो नारायणस्य पादादिकेशान्तवर्णनेषु विरिञ्चिविरचितनिखिलपिष्टपालभ्यासीमलावण्यलक्ष्मीसमृद्धिरेवं वैदग्ध्येन सुभाषितास्ति; येन सगुणोपास्तेर्निर्गुणपर्य्यवसानात्मकमद्वैततत्त्वं व्यक्तमवसीयते। भगवदाराधनसाधनीभिर्ज्ञानभक्तिक्रियाभिरन्योन्यानुबन्धिनीभिरुपासनासरणिभिरिह प्रायशो विद्यानां समन्वयः प्रदर्शितः।

शतश्लोकेन पण्डितः—इतीदृशी किंवदन्ती श्रूयते। प्राचीनेषु काव्येषु शतकाख्यखण्डकाव्यस्य प्रभूतप्रचारो दरीदृश्यते। तेषामनेकेषां नामानि श्रूयन्ते दृश्यन्ते च, तेषु तावद् कुष्ठशापाविष्टः पुराणो मयूरकविः सूर्य्यशतकं प्रणीय परां ख्यातिमगमत्; रोगादपि चाभून्मुक्तः। अयमपि कविस्तादृशीं प्राचीनां सरणीमनुसृत्य शतश्लोकेन श्रीमद्भागवतोक्तदिशा भावगुल्फं श्रीमन्नारायणवर्णनमकरोत्। भावगाम्भीर्य्येण पदविन्यासचातुर्य्येण अलङ्कारसौष्ठवेन च शतकमिदं सूर्य्यशतकान्न न्यूनतामुपैति। परं तु चारुतया सूर्य्यशतकमपाकरोति। अतोऽस्य प्रचार उत्कलप्रदेशे बहुलतया परिदृश्यते। प्रायशः सर्वेषां प्राचीनानामुत्कलदेशीयानां विदुषामद्यापि मुखान्यलंकुर्वन्ति शतकस्यास्य श्लोकाः।

शतकस्यास्य रचयिता कविवरो विद्याकर उत्कलदेशीय आसीत्।' तेनैव विरचितायाः राघवपाण्डवीयकाव्यस्य व्याख्यायाः प्रस्तावनायां तेनैव कविवरेण निगदितम् :—

श्रीजीवदेवकविडिण्डिमवंशजन्मा
विद्याकराभिधसुधीः सुकविप्रवीणः।
गम्भीरभावभृति राघवपाण्डवीये
व्याख्यां तनोति हृदयालुरमावदान्याम्॥ इति।

Digitized by srujanika@gmail.com

एतच्छ्लोकाङ्ककविडिण्डिमजीवदेवो भक्तिभागवताख्यस्य काव्यस्य रचयिता। तत्तु काव्यं साम्प्रतं न प्रकाशितं, तस्य काव्यस्य एका प्रतिलिपिमदन्तिके वर्तते। तत्रेमानि पद्यानि संदृश्यन्ते :—

स तत्र जज्ञे कपिलेन्द्रनामा
राजाधिपो दाशरथेर्वरक्तिः;
भूभृत्कबन्धैर्विनिधाय कन्धं
कीर्त्तिं प्रियां प्राप रणाम्बुधौ यः। १।

ततो महीमण्डलसार्वभौमः
पुरूरवः श्रीपुरुषोत्तमोऽभूत्;
रमासमाश्लेष-समानवाणी—
समागमानन्दविनोददक्षः। २।

ततोऽभवद् व्यङ्कट काकतीयः
प्रतापरुद्रः समही महेन्द्रः।
यस्य प्रतीपा युधि जम्भदम्भं
दीःस्तम्भमम्भोलिहता भजन्ते। ३।

स एकदा भागवतावतंसो
वेदान्तविद्यापुरुषावतारः।
स्वच्छप्रभास्थान-विशुद्धविद्वान्
मुक्तावलीनायक इत्यवादीत्। ४।

पुराणगम्भीरपयःपयोधे-
र्भावामृतं भागवतं प्रतीमः।
स्कन्धं विशुद्धं दशमं ततोऽपि
समुद्धृतं सारमुदारराम:। ५।

अस्मिन् गभीरार्थमहाप्रवाहे
न बालकानामुचितः प्रवेशः।
यतस्ततः कोमलवाक्यभङ्गी-
विशुद्धबन्धं कुरुत प्रबन्धम्। ६।

Digitized by srujanika@gmail.com

ततो गुरुत्वमस्य गतो बुधानां
श्रीजीवदेवः कविपण्डितेन्द्रः ।
समुल्लसद्भागवतामृतद्रु—
च्छायाश्रितः काव्यमिदं तनोति । ७ ।

सर्गान्तेऽपि दृश्यते :—इति श्रीमत्कविडिण्डिमगजपतिराज-राजगुरुजीवदेवविरचिते महाकाव्ये प्रथमः सर्ग इति ।

अतएवावगम्यते—अयमेव कविडिण्डिमजीवदेव उत्कलीयस्य राज्ञः प्रतापरुद्रस्य गजपते गुरुरासीदिति ॥ स तु खीष्टीयपञ्चदशशताब्द्याः समनन्तर उत्कलस्य राजासीत् । अयमेव विद्याकरो विद्याकरः कविडिण्डिम वंशजन्मासीदिति पूर्वोद्धृत तत्कृत कविताया ज्ञायते ॥

श्रीमदालंकारिकचक्रवर्त्तिगजपतिसाम्राज्यसान्धिविग्रहिक श्रीविश्वनाथकविराजात्मजश्रीमदनन्तदासकृतसाहित्यदर्पणालोचनस्य कस्मिंश्चित् तालपत्र पुस्तके श्लोकोऽयं परिदृश्यते :—

नन्दत्कुन्दकदम्बडम्बरयशः—श्रीमन्मुकुन्दाभिध—
क्षोणीशस्य शशांकपन्नगमिते संवर्त्तमानेऽङ्के ।
माघे फाल्गुनसंज्ञके कुजदिने कृष्णद्वितीयातिथौ
पूर्णं पुस्तकमेतदर्णनिकरैर्विद्याकराख्योऽकरोत् ।

पुस्तकमिदं विद्याकरेण लिखितमिति श्लोकाज्ज्ञायत एव अयं हि विद्याकरो नारायणशतकस्य रचयिता, न वा ? इति सन्देहो वर्त्तते ॥ जीर्णपुस्तकस्य शुद्धिदृष्ट्या लेखकस्य श्लोकाच्च ज्ञायते, तालपत्रपुस्तकस्यास्य लेखकस्तावत् प्रधानः पण्डितः कविश्चेति । नारायणशतकरचयितुः कविवरस्य स्वहस्तलिखितमिदं पुस्तकमित्यनुमीयते कैश्चित् । तत्तालपत्रपुस्तकं मया कुतश्चिन्मठादुपलब्धं, कालक्रमात् तत् पुस्तकं स्थानान्तरितमासीत् :—

उत्कलदेशे मुकुन्ददेवनामानो बहवो राजान आसन् । तेषु तावत् पञ्चदशशताब्द्यामुत्कलस्य नरपतिर्यो मुकुन्ददेवः, स तु अतीवशक्तिशाली प्रधानश्च । कविरयं तदानीन्तन इत्यनुमीयते ।

Digitized by srujanika@gmail.com

वर्त्तते चात्र वृद्धपरम्पराजनश्रुतिर्यद्, श्री वीरकेशरीपुरशासन वास्तव्य-स्तद्ग्रामाध्यक्षो विद्याकरपुरोहित आसीदिति। अद्यापि तद्ग्रामे पुरोहितोपाधिधारिणः सामन्तसंज्ञका भूसुरा दृश्यन्ते।

शतकस्यास्य श्रीपीताम्बरमिश्रकृतायां व्याख्यायां पाण्डित्यातिशय्यं चमत्कारिता च महती वर्त्तते॥ परन्त्वनुल्लेखतो व्याख्याकृतः पीताम्बरमिश्रस्य समयादिकं किमपि नोपलभ्यते सारतः-साक्षात् परम्परया भुक्तिमुक्तिविधायकमिदमनुचिन्तयता मात्मनि परमा मुत् समुदेष्यतीत्यत्र न सन्देहलव इति। शम्।

श्रीकरुणाकरकरः

Digitized by srujanika@gmail.com

Preface

The Narayana Sataka—a Century of Stanzas in praise of Narayana by Vidyakara Purohita with the learned and lucid Commentary of Pitambara Misra has, for the first time, been published and placed before the public.

The poet describes in detail the form of Vishnu or Saguna Brahma in the light of the Bhagavata. There are many Satakas in Sanskrit Literature of different kinds. The Suryya Sataka, a hundred stanzas in praise of the Sun of Mayura kavi is a work of high merit. Our author's work Narayana Sataka belongs to this class. It is not in any way inferior to Suryya Sataka but excels it in respect of beauty and perspicuity. It is very popular among the Pandits of Orissa so much so that one, not able to recite some of its stanzas has no recognition as a Pandit. As this work is not known to Pandits outside Orissa and as even its manuscript is not available elsewhere it may be safely assumed that the writer belongs to Orissa. Vidyakara mentions in his commentary to Raghava Pandaviya that Jiva Deva, the author of Bhakti Bhagavata, is one of his forefathers. Bhakti Bhagavata begins with high praises of king Pratap Rudra, his father Purusottama and grandfather Kapilendra Deva. Jiva Deva writes how he, at the earnest request of the great Vaisnava king Pratap Rudra his disciple, wrote the kavya mentioned above. Jiva Deva being the contemporary of Pratap Rudra belongs to the latter part of the 15th and the early part of the 16th century

Ananta Das, the son of Viswanatha kaviraja has written a Commentary on his fathers' work—"the Sahitya-

Digitized by srujanika@gmail.com

Darpana " —known as the Sahitya—Darpan—Lochana. I am in possession of a manuscript of the above work copied out by one Vidyakara. This Vidyakara has put down a verse of his own which purports to mean that he finished copying out the work on the 2nd day of the dark fortnight in the month of phalguna of the 15th Anka Oriya era of king Mukunda Deva. For the fact that the manuscript is without a single mistake and that the concluding verse by this Vidyakara breathaes poetry of a high order I conclude that this Vidyakara and Vidyakara, the author of Narayana Sataka, is one and the same person.

Nothing is known definitely about the time when Vidyakara flourished. From the statement given above it is clear that he lived in the reign of Mukunda Deva. In Orissa there were several kings bearing this name. As Jiva Deva one of the forefathers of the author mentioned above was s Contemporary of Pratap Rudra Dev, Mukunda Dev I, the powerful king of Orissa is out of the question for the space of time between Pratap Rudra Dev and Mukunda Dev I is only forty years. One Balabhader Misra, a Commentator of "the Koti Brahmanda Sundari" an Oriya poem of high merit by the celebrated Oriya poet Upendra Bhanja,quotes in his Commentary some slokas from Naryana Sataka. He lived in the middle of the 18th Cen tury. From this I can safely conclude that Mukunda Dev, referred to by our poet Vidyakara is no other than Mukunda Dev II who reigned from 1658 to 1692 according to the palmleaf records (Madla Panji) of the Jagannatha temple at Puri.

The Commentary of Pitambara Misra is erudite and masterly but the Commentator does no—where mention anything about himself, his time and his residence.

K. Kar

Digitized by srujanika@gmail.com

पुरोहितश्रीविद्याकरमहाकविप्रणीतं

नारायणशतकम्

कविचन्द्रस्य पीताम्बरमिश्रस्य
टीकया समेतम् ।

स्वं चिद्रत्नं चिरत्नं यदि समुदयते नष्टमन्वेष्टुमिच्छा
श्रेयःपात्रे तदा स्वे हृदि मिलदमलस्नेहपूरस्य पूर्णे ।
आसाद्य द्योतमानं भृशमकृशदशां संहृतांहःपतङ्गं
दध्यादध्यात्मदीपं दलिततमतम-स्तोममीशस्य धाम ।१।

कमलाचपलाश्लिष्टाऽपघनश्रीघनायितम् ।
तापत्रयव्यपोहाय नारायणमुपास्महे । १ ।
विद्याकरान्वितार्थाख्यपुरोहितमहाकवेः ।
विजयन्ते गभीरार्था गिरोऽमृतकिरोदयाः । २ ।
पीताम्बरेण(१) मिश्रेण कविचन्द्रेण तन्यते ।
नारायणीयशतक-व्याख्या विशदचन्द्रिका । ३ ।

अथ विद्याकरपुरोहितनामा महाकविश्चतुर्वर्गप्राप्तये प्रारिप्सित-श्रीमन्नारायण-प्रत्यङ्गवर्णनशतकरूपखण्डकाव्यस्य निर्विघ्नपरिसमाप्ति-कामस्तस्यादौ प्राचीनसूरिविशिष्टाचार(२)मनुबध्नन् सकलजगन्मङ्गल श्रीभगवद्ध्यानरूपं मङ्गलमाचरति स्वं चिद्रत्नम् इति ।

चित्पक्षे नष्टम् अविद्याकुहूनिशाविषयलिप्सामहान्धकारेणाऽनुपलब्धं, रत्नपक्षे कुत्रचित्तिमिरागारे भ्रष्टं, स्वं स्वरूपं स्वाभिन्नमिति यावत् जीव-

---

१—पीताम्बराख्य (क) । २—सूरिशिष्टाचार (क) ।

Digitized by srujanika@gmail.com

परमात्माऽभेदप्रतीतेः; घनरूपं च। चिरत्नं पुराणं वेदान्तप्रतिपाद्यत्वात्, "चिरपरुत्परारिभ्य" इति चिरशब्दात् त्नप्रत्ययः; पितृपितामहादिसञ्चितं, चिद्रत्नं चित् ज्ञानं "चितीज्ञाने" धातोः क्विप्, ज्ञानात्मकं निर्गुणोपासनलक्षणं तत्त्वमस्यादिश्रुतिवाक्यश्रवणमनननिदिध्यासनफलरूपं "ज्ञात्वा तं मृत्युमत्येति" "तमेव विदित्वातिमृत्युमेति" "ज्ञात्वा देवं सर्वदुःखप्रहाणि"रिति च "ज्ञानादेव हि कैवल्य"मिति श्रुतिभ्यः तस्य मोक्षप्रतिपादकत्वात्। तदेव रत्नं भास्वरत्वोपादेयत्वादिधर्म्मसामान्यात्। तत् अन्वेष्टुं प्रकृत्यादिभ्यः पृथक् विचारयितुं मृगयितुं च "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" इति श्रुतेः। इच्छा समुदयते उत्पद्यते यदि, सा च सर्वेषां नोत्पद्यते येषामनेकजन्मसुकृतपरिपाकजनित(१)भगवत्प्रशस्तिस्तेषामेव। "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते अनेकजन्मसंसिद्धस्ततो याति परां गतिम्।" इति स्मृतेः। तदा तर्हि श्रेयःपात्रे श्रेयसः भगवद्ध्यानलक्षणस्वरूपस्य शुभस्याश्रयभूते दीपपक्षे श्रेष्ठभाजने च "श्रेयान् श्रेष्ठः पुष्कलः स्यादित्यमरः।" पुन. कीदृशे मिलन्, प्रसर्पन् अमलः निरुपाधिः तात्त्विकनिश्चयः अनाविलश्च यः स्नेहपूरः स्नेहः प्रेमा इतरविमुखताजनक उपास्यैकनिष्ठतापादकः कश्चिदान्तरो धर्म्मः। तस्य पूरः उद्रेकः स एव तैलपूरश्च "स्नेहः स्यात् पुंसि तैलादि-रसद्रव्ये च सौहृदे" इति मेदिनी। स च अमलत्वेन भगवद्ध्यानौपयिकः (२) दीपज्योतिरुत्कर्षश्च। तस्य पूर्णो तेन पूर्णो (३) 'अत्र सम्बन्धमात्रविवक्षायां षष्ठी, फलानां तृप्त इत्यादिवत्। स्वे स्वकीये हृदि हृदाख्ये अकृशदशां संपूर्णावस्थां स्थूलवर्त्तिं च ज्योतिरुत्कर्षार्थं "दशावर्त्तावस्थाया मित्यमरः।" भृशमासाद्य अत्यन्तं प्राप्य तादृशप्राप्तेः तदेकनिमित्तत्वात् द्योतमानं तादृशध्यानेन प्रत्यक्षीकृतं द्योतमानत्वस्य भानरूपत्वात्, ज्वलितं च। अत्र ईश्वरस्य पूर्णावस्थासादनद्योतमानत्वयोः सर्वकालीनत्वात् 'समानकर्तृकयोः पूर्वकाले क्त्वा' इति क्त्वाप्रत्ययाप्राप्तौ मतान्तराश्रयेण सिद्धमुभयत्र नियमाभावात्। "निरीक्ष्य संरम्भनिरस्तधैर्य्य" मित्यादि। इत्यत्र भारविप्रयोगे एककर्तृकत्वाभावः एवं पूर्वकालस्यापि यथा—'सर्वभूतानि विष्टभ्य परितिष्ठति' 'नेत्रे निमील्य हसति' इति च हसनानन्तरं नेत्रनिमीलनस्य दृष्टत्वात्। परमात्मनः युगपत्सर्वभूतविष्टम्भावस्थितिदर्शनाच्च। नियमस्यावश्यकत्वं 'भुक्त्वा व्रजती' त्यादौ भोजनोत्तर-

१—जात (क)। २—नोपयोगिकः (ख)।
३ तैलपूर्णो च (क)।

Digitized by srujanika@gmail.com

कालीनत्वं गमनस्य, पूर्वकालीनत्वं भोजनस्य, नतु द्वयोरेककालीनत्वम् । उत्तरकालीनत्वं च तद्ध्वंसाधिकरणकालवृत्तित्वं; तेन भोजनक्रिया-ध्वंसानन्तरं गमनक्रिया प्रवर्त्तते इति । स्थित्वा पश्यति इत्यादौ यद्यपि स्थितिध्वंसाधिकरणकालवृत्तित्वं दर्शनस्य नास्ति तथापि दर्शनप्रागभाव-काले स्थितेः सत्त्वात् स्वाधिकरणकालवृत्तिप्रागभावप्रतियोगिकत्व-सम्बन्धेन स्थितेर्दर्शनेऽन्वयबोधः एवमासादनक्रियाद्योतनक्रियायाम् ।

"दह्रं विपाप्मं परवेश्मभूतं यत् पुण्डरीकं पुरमध्यसंस्थ" मित्यारभ्य हृत्पुण्डरीकमधिकृत्य "विश्वं नारायणं देवमनन्तं(१) परमं प्रभुम् । यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतिभिः हृत्पुण्डरीके पूर्णत्वेन श्रीनारायण-ध्यानस्य उक्तत्वात् । अङ्कुशदशामित्युक्तौ हृत्पुण्डरीकस्याऽपरिच्छन्नत्वे 'दह्र' मित्यारभ्य "यच्चास्य इहास्ति यच्च नास्ति । सर्वं तदस्मिन् समाहित(२)"मित्यादि छान्दोग्यश्रुतिःप्रमाणम् । ततः परिपूर्णत्वेन द्योतमानं तथा च स्मृतिः "वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।" सर्वात्म-त्वेन सर्वगतत्वेन ध्यानादिति भावः । संहृतांहः पतङ्गं—अंहांसि सुर-कृतविघ्ना एव पतङ्गाः शलभाः संहृता येन तत्तथा "समौ पतङ्गशलभौ" इत्यमरः । श्रीभगवतः सकृन्नामस्मरणमात्रेण सकलदुरितक्षयात् । अत्र अंहःशब्दः सुरकृतविघ्नपरः । "अंहो दुरितविघ्नयो" रिति शब्दार्णवः । "पुत्रदारादिरूपेण समेत्य रुदितादिभिः । देवा आरूढ-योगस्य योगविघ्नं प्रकुर्वते" इति योगशास्त्रात् । तथा "त्वां सेवतां सुरकृता बहवोऽन्तरायाः स्वौको विलङ्घ्य परमं व्रजतां पदं ते । नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् दत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि (३),' इति भागवते । अतिशयेन दलितः तमस्तोमः अविद्याकृतभेदविस्तारः स एव अन्धकारप्रकरः येन तत्तथा "यत्र तु द्वैतमिव भवति तदितरं पश्यती"ति श्रुतेः । ईशस्य सर्वेश्वरस्य अथवा ई लक्ष्मीः तस्या ईशस्य लक्ष्मीशस्य ईकारयोः सन्धिः । श्रीनारायणस्य धाम शरीरं 'धाम देहे गृहे रश्मा वित्यमरः' । सर्वाङ्गवर्णनस्य प्रस्तुतत्वात् तदेव दीपः तं व्यस्तरूपकं । अध्यात्म आत्मनि मनसि "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि इति मेदिनी । 'अव्ययं विभक्ती'त्यादिना विभक्तौ अव्ययीभावः । दध्यात् धारयेत् ध्यायेदित्यर्थः 'मनसैवानुद्रष्टव्य' मिति श्रुतेः । यदात्म-

१—मक्षरं (क) । २—मंगल (ख) ।

३—श्लोकोऽयं क पुस्तके नास्ति ।

Digitized by srujanika@gmail.com

तत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येदिति श्रुतेश्च मुमुक्षुरिति शेषः, तत्र तस्याधिकारात् । यथालोके कश्चिद्ध्वान्तप्रदेशे नष्टद्रव्यान्वेषणार्थं तैलपूर्णपात्रस्थपृथुदशाज्वलितदीपो ध्रियते एवं तत्त्वमस्यादिवाक्यश्रवणमननादिफलरूपं जीवात्मैक्यज्ञानसम्पादनार्थं तत्तद्विशेषणविशिष्टं श्रीनारायणं मुमुक्षुर्मनसि कुर्य्यादिति तात्पर्य्यार्थः । सगुणोपासनस्य निर्गुणोपासनोपयोगित्वात् । ब्रह्मणः सगुणत्वं नामदेहादिविशिष्टत्वं निर्गुणत्वं तद्रहितत्वमिति विवेकः । निरवलम्बस्य निर्गुणोपासनस्य प्रथमं कर्तुमशक्यत्वात् सगुणोपासना कर्त्तव्येति वेदान्तशास्त्रसिद्धम् । एतत्प्रपञ्चस्तु न लिखितः विस्तारभयात् प्रयोजनाभावाच्च । अत्र रूपकालंकारः साङ्गः चिद्रत्नान्वेषणार्थं ईशधाम्नि दीपभावे तदङ्गे पात्रत्वारोपात् तत्र च स्नेहपूरतमस्तोमादिपदानां श्लिष्टपरम्परितत्वेन सजातीयः संकरः । स्वं चिद्रत्नं चिरत्नमित्यादिशब्दवर्णाद्यावृत्त्याऽनुप्रासेन शब्दालंकारेण संसृष्टः । अत्र शतके प्रायेण सर्वत्रानुप्रासः । वृत्तं स्रग्धरा तल्लक्षणं यथा—' म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयं ।' इदं तु खण्डकाव्यम् । "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि तु ।" इति लक्षणात् ॥१॥

अथ मोक्षोपयोगितया प्रस्तुतस्य श्रीनारायणप्रत्यङ्गध्यानस्य क्रमं श्रीभागवतोक्तरीत्या "एकैकशोऽङ्गानि धियाऽनुभावयेत् पादादि यावद्धसितं गदाभृतः । जितं जितं स्थानमपोह्य धारयेत् परं परं शुध्यति धीर्यथायथा" इत्यादि वक्तु प्रथमं "सर्वासामपि सिद्धीनां मूलं तच्चरणार्च्चनम् ।" "इच्छापिधानं निजपादपल्लवम्" इति श्रीभागवतोक्तेः । "स्वयमयमुदकीभूय धर्म्मद्रवीति व्यक्तो शम्भ्याम्' इति स्वोक्तेश्च श्रीनारायणचरणारविन्दस्य सर्वोत्कृष्टत्वात् । "मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः" इति कविसमयाच्च । चतुराननः(१) स्तवनभाजनस्य चातुर्वर्ण्यचातुराश्रम्योपास्यस्य चतुर्वर्गप्राप्तिसाधनस्मरणस्य पादपद्मस्य वर्णनं चतुर्भिः श्लोकैरारभते हित्वेति ।

हित्वोरःपीठपद्मं तदितरललनालभ्यवाल्लभ्यसीमां
हस्ताभ्यां विभ्रमाब्जे अपि सुभगतमे किंच सश्चारचारुम् ।
स्नेहर्द्धिं प्रस्नुवानामपि वनजवनी-मादरा-दृग्युग्मे
न्यस्याम्भोजालया यत् परिचरति हरेस्तत्स्मरेत्पादपद्मम् ।२

१—कविविषयाच्च (ख) ।

Digitized by srujanika@gmail.com

अम्भोजालया पद्मालया लक्ष्मीः सेवासमये तत्यागो व्यज्यते। तदितरललनालभ्यवाल्लभ्यसीमां स्वेतराभिर्ललनाभिर्भूप्रभृतिभिरलभ्यम् अप्राप्यं यत् वाल्लभ्यं वल्लभाभावः प्रेयसीत्वं तस्य सीमाम् अवधिभूतम्; उरःपीठपद्मम् उरः भगवदीयं तदेव पीठपद्मं आसनपद्मं लक्ष्म्यासनस्य पद्मरूपत्वात्, तदुरसः कौस्तुभमणिकिरणशोणिम्ना सौस्पर्श्यसौगन्ध्यादिभिश्च पद्मसाम्यात्। एतेन तस्य भगवल्लनाकुलसौभाग्यसाम्राज्यसिंहासनत्वं व्यज्यते। तथापि तत् हित्वा त्यक्त्वा सर्वत्रान्वयः। तथा सुभगतमे अपि तयोः सुभगतमत्वम् अम्लानत्वं "पद्मे सततमम्लाने तस्यै सिन्धुर्ददौ स्वयम्" इति लक्ष्म्या अभिषेके दर्शनात्। एतेन तयोः पितृदत्ताभरणत्वं व्यज्यते। विभ्रमाब्जे लीलापद्मे अपि च "ईदूदेद्द्विवचनं प्रगृह्यम्" इति प्रगृह्यत्वात् सन्ध्यभावः। हस्ताभ्यां हित्वा दूरीकृत्य भगवच्चरणारविन्दापेक्षया तयोः परुषतानुभवेन इतिभावः। अत्र हस्तयोः पद्मविश्लेषावधित्वात् "ध्रुवमपायेऽपादानम्" इति पञ्चमी। किञ्च पुनः "किञ्चारम्भे च साकल्ये" इति मेदिनी। सञ्चारचारु विहारसुखस्पर्शी सञ्चारश्च अंकाद्याधारकः(१) स्नेहर्द्धिः मकरन्दातिशयः स्तन्यरसातिशयश्च "स्नेहः स्यात् पुंसि तैलादि रसद्रव्ये च सौहृदे" इति मेदिनी। अत्र आदिपदेन रसमात्रवाचकत्वात् मकरन्दस्तन्यरसयोरपि स्नेहशब्दप्रवृत्तिः। सैव सा तां प्रस्नुवानामपि क्षरन्तीमपि वनजवनीं पद्मवनीम् अस्या अंकादिसञ्चारचारुत्वस्नेहर्द्धिप्रस्नुवानादिना मातृत्वं व्यज्यते। "पद्माक्षि पद्मसम्भवे" इति श्रीसूक्तात् मातृरूपत्वात् त्यागानर्हामपि हित्वा। सर्वत्र उरःपीठपद्मादीनां तदितरललनेत्यादिविशेषणानां त्यागानर्हत्वे साभिप्रायत्वात् परिकरालंकारः। यत् ऊरुयुग्मे न्यस्य इदं तादृशप्रेमद्रुतकोमलतमभक्तजनमानस-विलासरसिकमिति ज्ञात्वा इतराङ्गापेक्षया कोमलशीतले मृदुपरिधानवसनाच्छन्ने ऊरुद्वये न्यस्य स्थापयित्वा आदरात् इदं मम लक्ष्मीत्वसम्पादकमिति "श्रीविष्णोः श्रवणे परीक्षिदभव"-दित्यादि "कृष्णाङ्घ्रिसेवां परे" त्यन्ते पद्ये तदंघ्रिभजने लक्ष्मीरिति प्रतिपादनात्। परिचरति परिमृशति संवाहयतीत्यर्थः। हरेः श्रीनारायणस्य, अविद्यां हरति हरिः तत्-पादः पद्ममिव इति उपमितसमासः। स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति वामनोक्तेः प्रायिकत्वादेकवचनम्। स्मरेत् ध्यायेत्। एतेन तच्च-

---

१—अज्ञानादिधारकः (ख)

अंगाद्याधारकः (ख)।

Digitized by srujanika@gmail.com

द्विशेषणद्वारा त्यागानर्हाणामपि उरःपीठपद्मादीनां हानरूपनानासमृद्धि-सहनोपकरणस्वजनादित्यागेन श्रीनारायणचरणारविन्दप्राप्तिर्भवतीति एतद्रूपं वस्तु व्यज्यते । रूपकपरिकरयोः संकरः ॥ २ ॥

अथ श्रीनारायणचरणारविन्दस्य परमानन्दस्वरूपतां वक्तुमानन्द-मीमांसार्थ मभिप्रेत्याहबुद्ध्वेति ।

बुद्ध्वा वैधात्रलोकावधि विविधवधू(१)दुर्द्दती गेह्यभोगा
बीभत्सन्ते महान्तः कुललितललनावक्त्रलालामलेभ्यः ।
तस्य ध्यातव्यमद्धामृतरसमधुनः पादपद्मद्वयस्य
व्यक्तस्याम्नायमौलावमलमनुभवात् स्वप्रकाशस्य यस्य ।३।

आम्नायमौलौ व्यक्तस्य नतु तडागादौ वेदपुरुषशिरोलं-कारस्य इत्यर्थः । स्वप्रकाशस्य इतरपद्मवन्न सूर्यसापेक्षप्रकाशस्य, परब्रह्मस्वरूपत्वात् स्वप्रकाशत्वम् । एतेन पादपद्मस्य पद्मविरुद्ध-धर्म्मवत्त्वाद्विषमालंकारः । तेन परमाश्चर्यपद्मत्वं सूचितं । तस्य पादपद्मद्वयस्य प्रकरणान्नारायणीयस्य अद्धा ध्यातव्यं ध्यातव्यमेव अतिशयेन ध्यातव्यं वा, अद्धाशब्दस्यावधारणातिशयवाचकत्वात् । "अधीगर्थ" इति कर्म्मणि षष्ठी । तत्पादपद्मद्वयं ध्यातव्यमित्यर्थः । यस्यामृतरसमधुनो अमृतो नित्यः यः रसः स एव पीयूषस्वादः मधु-मकरन्दः तस्य "रसो वै स" इति श्रुतेः । अत्र पादपद्मद्वयस्य रस-रूपत्वेऽपि तद्भेदः काल्पनिकः पदस्य पद्मरूपेण तद्रसस्य मकरन्द-रूपेणौचित्यार्थम् । राहोः शिर इतिवत् अवयविनोऽवयवकल्पना । अमलं यथा तथा अनुभवात् साक्षात्कारात् । अनुभवस्यामलत्वम् अविद्या-स्मितादिक्लेशाभावेन शुद्धत्वम् । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इति श्रुतेः । महान्तो विवे-किनः आत्मज्ञानार्थं गार्हस्थ्यवैराग्येण व्युत्थानमाचरन्ति । "एतेन तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्य्यं चरन्ति" इति कहोलब्राह्मणार्थो दर्शितः । विवेकं दर्शयति । वैधात्रलोकावधि विधातुः सम्बन्धी लोकः सोऽवधिर्यस्मिन्निति क्रियाविशेषणम् । विविधवधूः नानादिव्याङ्गनाः लोकतारतम्याद्

१—विपुधवधू (क) ।

विविधत्वम् । गर्ह्यगर्भाः पूयशोणितादिपूर्णत्वेन अवद्यगर्भाः दुर्दृतीः दुष्टोल्वणानि । अनर्थोत्पादकत्वाद् दुष्टत्वं गर्ह्यगर्भत्वेन जुगुप्सास्पदत्वं च । "दृतिश्चर्म्मपुटे मत्स्ये" इति मेदिनी । बुद्ध्वा मत्वा अग्निष्टोमादि-धर्म्मलब्धानां स्वर्गादीनामेतद्भोगरूपत्वात् आसां मध्यावस्थितिः दुर्दृतिमध्यनिवासतुल्येति विचार्य्येमित्यर्थः । कुललिततललनावक्त्रलाला-मलेभ्यः कौ पृथिव्यां याः ललितललनाः परमोत्कृष्टरूपगुणादिविशिष्टाः सुन्दर्य्यः तासां वक्त्राणि एव लालामलानि तेभ्यो बीभत्सन्ते जुगप्सन्ते गार्हस्थ्यं नाचरन्तीत्यर्थः । "जुगुप्साविरामेति" जुगुप्सार्थयोगे पञ्चमी । जन्यजनकभेदाभावमङ्गीकृत्य ललितललनावक्त्रेभ्यो लालामलेभ्य इव बीभत्सन्ते इति भावः । यत्र ललितललनाजुगुप्सा अललितललनास्तु स्वतः निन्दास्पदानि, तत्र किमुच्यते महतां जुगुप्साहेतुः, उच्यते वृहदार-ण्यकोपनिषदि मानुषलोकानन्दमारभ्य ब्रह्मलोकानन्दपर्य्यन्तमानन्दानां प्रत्येकं शतावृत्त्या क्रमेण श्रैष्ठ्यमुक्त्वा एतस्यानन्दस्य मात्रामुपजीवन्तीति तेषां मात्रात्वमुक्त्वा "यतो वाचो निवर्त्तन्ते" इति ब्रह्मानन्दस्य वाङ्मनसागोचरत्वं प्रतिपादितम् । तद्रूपस्य श्रीनारायणचरणारविन्दस्य रसं समास्वाद्य प्रथमं गृहस्थाश्रममं त्यजन्ति महान्तः । गार्हस्थ्ये सति यागादिकर्म्माणि अवश्यमनुष्ठेयानि अननुष्ठाने प्रत्यवायश्रवणात् तदनु-ष्ठाने च तत्तत्कर्मफलरूपतल्लोकप्राप्तिसकलविषयोत्कृष्टतरदिव्याङ्गना-भोगादिसुखमदिरामत्तस्य ब्रह्मानन्दगन्धस्फूर्त्तिर्न भविष्यतीति "प्रक्षा-लनाद्धि पंकस्य दूरादस्पर्शनं वरम्" इति न्यायात् सकलानर्थमूल-गार्हस्थ्यस्य त्यागः साधीयानिति तात्पर्य्यार्थः । विविधवधूर्णां दुर्दृतित्व-बोधनं कुललिततललनालपनेषु लालामल इव जुगुप्सा च युक्ता । अत्र रूपकविषमयोः संकरः ॥ ३ ॥

अथ श्रीनारायणचरणस्य सर्वोर्द्धत्वात् सर्वोपास्यत्वमाह नाभ्य-म्भोजमिति ।

नाभ्यम्भोजं निजावेशनमदउदरस्थास्नुविश्वेक्षणाय
द्वारं वेधा हरः संहरणमयदुरन्ताधिकारस्य मूलम् ।
शूलं पूषांजसास्याः प्रतिकृतिमतुलां मुक्त्यधीकारमुद्रां
मुक्त्वा यां हस्तपद्मे नमति भजतु तां पद्द्वयीमद्वयस्य ।४।

वेधाः—स्रष्टा अदउदरस्थास्नुविश्वेक्षणाय द्वारम् अमुष्य भगवतः उदरे स्थास्नु स्थितिशीलं, प्रतिबिम्बस्वरूपं बहिः प्रकटरूपं यद्विश्वं

Digitized by srujanika@gmail.com

तस्येक्षणाय विलोकनाय द्वारं सन्निकृष्टत्वात् शिल्पसन्देहे उदरस्थित-विश्वं दृष्ट्वा निर्माणात् । तथाच ब्रह्माण्डपुराणे "तानेव लोकान् गर्भ-स्थान् वीक्षितुं पद्मसम्भवः । श्रीपतेरुदरं भूयः प्रविवेश पितामहः" इति निजावेशनं स्वकीयजगच्छिल्पशालारूपम् 'आवेशनं शिल्पशाले' त्यमरः । नाभ्यम्भोजं नाभिपद्मं मुक्त्वा ततोऽवतीर्य्य ऊर्ध्वस्थितस्य प्रणामानौचित्यात् । हरः संहारकः शिवः संहरणमयदुरन्ताधिकारस्य मूलं संहरणमयः संहाररूपो यो दुरन्ताधिकारः दारुणकर्म्मकर्तृत्वं तस्य मूलं कारणभूतं शूलं स्वायुधं "कल्पान्तकाले व्युप्तजटाकलापःस्वशूलसूच्यर्पितदिग्गजेन्द्र" इति श्रीभागवते शूलस्य संहारहेतुत्वमुक्तम् । मुक्त्वा करसम्पुटीकरणार्थम् अत्रपूर्वार्द्धे किञ्चिदसमाप्तप्रायं वाक्यमिति वामनोक्तेः श्लोकपरार्द्धे शूलशब्दप्रयोगोऽयुक्तः, तस्य लघुदोषत्वेऽपि "हरः संहरणादुरधिकारस्य मूलं च शूलम् । देवः पूषाञ्जसा" इति श्रुतिवचनम् । सामान्यस्य रोगचिकित्सत्वमिव दोषसामान्यस्य हेयत्वात् तथा पूषा सूर्य्यः अस्याः पद्द्वय्याः, अञ्जसा तत्त्वेन अतुलां प्रतिकृतिं प्रतिबिम्बभूतां तदभावान्नित्यप्रबुद्धत्वे-नातुलत्वम्, इतरपद्मानां तथात्वाभावात् । अथवा अञ्जसा तूर्णं मुक्त्वेति सर्वत्रान्वयः "अञ्जसाशब्द आख्यात-स्तत्त्वतूर्णार्थयोरपी"ति मेदिनी । मुक्त्यर्थीकारमुद्रां मुक्तिमार्गपिधायकहिरण्मयपात्ररूपां इत्युत्प्रेक्षाद्वयं हस्तपद्मयोः । आद्ये भगवत्पादपद्मापेक्षया न्यूनस्य तत्पार्श्वे धारणायोगात् द्वितीये मुक्तिमार्गोद्घाटकस्य मुक्तिमार्गपिधायकस्य च । उपसर्गस्य घञ्यमनुष्येबहुलमिति दीर्घः । "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु" इति श्रुतेः । अतो मन्त्रलिङ्गात् पूषेत्युक्तम् । स्मृतिश्च "ज्ञानपद्मधरं रवि"मिति सूर्य्यसहस्रनामस्तवे तत्पद्मस्य ज्ञानपद्मत्वे-नोक्तेः । मोक्षहेतुत्वात् "ज्ञानादेव हि कैवल्य"मिति श्रुतेः । भिन्ने लिङ्गवचनेनोपमा दोषाय इति काव्यादर्शोक्तेः उपमानोपमेययोर्लिङ्ग-वचनभेदेऽपि न दोषः । हस्तपद्मे हस्तस्थिते पद्मे मध्यपदलोपी समासः । मुक्त्वा त्यक्त्वा पद्मधारणेन नमस्कारप्रतिषेधात् यां नमति नमस्करोति इति सर्वत्रान्वयः । अद्वयस्य नास्ति द्वयं यस्य तस्य अद्वितीयस्य सजातीयविजातीयभेदरहितत्वात्, अथवा न सन्ति द्वयानि क्षुत्पिपा-सादिद्वन्द्वानि भक्तानां यस्मात् स तस्य श्रीनारायणस्य पदोः द्वयीं पादपद्मद्वयं भजतु भक्त इति शेषः । प्रथमं जगत्स्रष्टुं भगवन्नाभिपद्म-जन्मा ब्रह्मा स्थितः संहारं कृत्वा भगवद्दिदृक्षार्थं हरः स्थितः । ऋतं च सत्यं चेति मन्त्रप्रामाण्यात् समुद्रसृष्ट्यनन्तरं सृष्टः पूषा च इत्थं

Digitized by srujanika@gmail.com

सृष्टिसंहारमुक्तिषु लब्धाधिकाराः सर्वदेवोत्कृष्टास्त्रयः परमाद्भ्रेण निज-निजाधिकारव्यञ्जनानि त्यक्त्वा जगत्त्रिसृष्ट्याऽविकृतपरमार्थसच्चिदा-नन्दरूपस्य श्रीनारायणस्य चरणारविन्दं प्रणमन्तीति ब्रह्मादित्रितय-प्रणमनरूपवस्तुना एतत्सृष्ट्यस्य त्रय एते उत्कृष्टास्तेभ्योऽपि नारायण इति सारालंकारो व्यज्यते ॥ ४ ॥

अथ श्रीनारायणस्य चरणयोः परमपावनतां चतुर्वर्गाश्रयत्वञ्चाह—

त्रातुं तापत्रयार्त्तान् स्वयमयमुदकीभूय धर्मद्रवीति
व्यक्तो याभ्यां निजाङ्के परिचरति सदा कामदाकामसूर्य्यौ ।
व्यज्योद्ध्वें रेखिके द्वे व्यभजदिव विभुर्यश्चतुर्वर्गसीमाः
पादौ निर्वाणहेतोः कलिकलुषभिदौ चिन्तयोपाददीत ।५।

त्रातुमिति—तापत्रयार्त्तान् तापत्रयं आध्यात्मिकाधिभौतिकाधि-दैविकरूपं तेनार्त्तान त्रातुमुद्धर्त्तुं तापत्रयात् इति भावः । अयं नारायणः स्वयमुदकीभूय जलरूपः सन् तेन तापत्रयनिवारकः दुःखनिवारकश्च भूत्वा याभ्यां पादाभ्यां धर्मद्रवीति व्यक्तः । (पादयोर्विश्लेषावधित्वात् अपादाने पञ्चमी) धर्मद्रवीति गङ्गा इति व्यक्तः । "विष्णुपादाप्र-सम्भूते गङ्गे त्रिपथगामिनि । धर्मद्रवीति विख्याते इति मन्त्रवर्णात् यद्यपि तत्र धर्मद्रवीति शब्द आर्षत्वेन सिद्धः । एतत् पदस्य तथात्वाभावात् समाधीयते । धर्मस्य द्रवन्ति गच्छन्तीति द्रवाः । द्रुगतौ धातोः पचाद्यच् । धर्मद्रवाः प्राप्तधर्माः गत्यर्थानां प्राप्त्यर्थत्वात् । धर्मद्रवशब्दात् तत् करोति तदाचष्टे इति णिच् । तस्येष्ठवद्भाव स्तनष्टि-लोपः । ततः क्विप् णेरनिटीति णिलोपः । धर्म–द्रव् ईः गमनं यस्याः ईगताविति क्विप् । यत्र यत्र गङ्गा गच्छति तत्र तत्र देशान्, जनान् वा प्राप्तधर्मान् करोतीति धर्मद्रवी गङ्गा, धर्मद्रवीरिति वक्तव्ये नारायणोति शब्दोऽस्त्रीतिवत् प्रातिपदिकनिर्देशः ।

परमकारुणिकतया संसारिणामुद्धाराय स्वयं स्वपादाभ्यां गङ्गारूपेण सम्भूय प्रकाशते । "तथाच योऽसौ नारायणो देवश्चित्स्वरूपी जनार्द्दनः स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः" इति श्रीमहाभारते । अत्र नारायणः तापत्रयार्त्तान् त्रातुं गङ्गाजलरूपेण स्वपादाद्व्यक्त इत्युत्प्रेक्षा सा च व्यञ्जकाप्रयोगाद् गम्या । तथाच यौ पादौ कामदा सकलकामदात्री लक्ष्मीः कामसूः सकलकामप्रसविनी भूः सदा निजाङ्के परिचरति,

Digitized by srujanika@gmail.com

निजाङ्के निधाय सम्वाहयतीत्यर्थः । तयोः सदा चरणपरिचरणान्तु कामदात्वकामसूत्वसम्पादकमिति भावः । अत्र कामदाकामसूरिति निधानगर्भामिव सागराम्बरामिति विशेषणेन विशेष्यप्रतिपत्तिः । विभुः श्रीनारायणः द्वे ऊर्द्ध्वे रेखिके व्यज्य व्यक्तीकृत्य यच्चतुर्वर्गसीमाः ययोः पादयोः चतुर्वर्गसीमाः स्थितिमर्य्यादाः व्यभजदिव । एतेन पादयोश्चतुर्वर्गनित्याधारत्वं व्यक्तम् । एतयोरूर्द्ध्वरेखाकृतिचतुर्द्धाविभागः चतुर्वर्गस्थित्यर्थं प्रभुणा सम्पादित इवेत्युत्प्रेक्षा द्वे ऊर्द्ध्वरेखिके इति अष्टादशचिह्नान्तर्गत महापुरुषचिह्नरूपे तस्या एकत्वात् ।"चन्द्रार्द्धं कलशं त्रिकोणधनुषी" इत्युपक्रम्य "वामपदेऽथ दक्षिणपदे विन्दूर्द्ध्वरेखाम्बुज" मिति "शङ्खत्रिकोणधनुरम्बरमत्स्यविन्दुचन्द्रार्द्धगोष्पदघटांकितवामपादं वन्देऽङ्कुशाम्बुजयवध्वजचक्ररेखास्वस्त्यष्टकोणपविचिह्नितदक्षिणांघ्रि" -मिति । सा च दक्षिणपादमात्रस्था न तु वामपादस्था । तथा च सामुद्रिके "ऊर्द्ध्वरेखांकितपदःसर्वोत्तरफलप्रद" इति । एवमलौकिकानां लौकिकानां च एकस्मिन्नेव पादे ऊर्द्ध्वरेखा । तस्मात् धर्मतनयरूपेण तपस्यतो नारायणस्य चरणयोरतिसौकुमार्य्यात् पद्मासनविधानेन पादमध्यादङ्गुलिपर्य्यन्तं पादमध्यसंकोचजनिते ऊर्द्ध्वरेखिके इति कविना अभिप्रेत्योक्तम् व्यज्यते । नारायणस्य तपश्चरणं स्वयं वक्ष्यति च । ध्यायेन्नारायणोरोरमरतति तपोविघ्नवर्गार्गलाया इति निर्वाणहेतोः मोक्षकारणस्य (अथवा षष्ठी हेतु-प्रयोग इति) निर्वाणार्थं कलिकलुष-भिदौ कलिकल्मषनाशनौ अन्ययुगापेक्षया कलुषस्य भगवन्नाममात्र-नाश्यत्वात् । "कलौ तद्धरिकीर्त्तनात्" "हरिर्नामैव नामैव" इति च पुराण-वाक्यात् । पादौ विशेषणवलाद् भगवदीयौ चिन्तया ध्यानेन उपाददीत गृह्णीयात् ध्यायेदित्यर्थः ॥ ६ ॥

जन्ममरणात्मकद्वन्द्वनाशकयोर्नारायणजंघयोर्वर्णनं श्लोकद्वयेनारभते ।

जंघे वृत्तानुपूर्वे अमृतरसमिव स्वे किरन्तौ करेण
क्षिप्त्वा लीलारविन्दं परुषतरमिव श्रीः सुखस्पर्शसीम्ना
शर्मान्यद्विस्मरन्ती परिमृशति शनैर्ये भृशं भीतभीता
ते सान्द्रानन्दथुः संस्मरतु मुनिजनो जन्ममृत्यू जिहासुः ।७

जंघे इति वृत्तानुपूर्वे—पूर्वमनुवृत्ते अधःपूर्वपूर्वं वृत्तरूपे स्वे स्वकीये भक्त-जने आत्मनि वा अमृतरसं सुधाद्रवं किरन्त्याविव अत्र सौरूप्यसौस्पर्श्य-

Digitized by srujanika@gmail.com

सौगन्ध्यादिविशिष्टलावण्यप्रसरस्य भक्तजनेन्द्रियवृन्दपरमानन्दजनकतारूपेण निमित्तेन जंघाकर्तृकसुधाद्रवकिरणतादात्म्योत्प्रेक्षा। सा च तादृशलावण्यप्रसरस्य अनुपादानादनुक्तविषया स्वरूपोत्प्रेक्षा। ये जंघे श्रीः लक्ष्मीः लीलारविन्दं परुषतरमिव मत्वेति शेषः। क्षिप्त्वा हस्ताभ्यां दूरीकृत्य सुखस्पर्शसीम्ना सुखकरः यः स्पर्शः तस्य सीम्ना मर्य्यादया परमसौकुमार्य्यमर्य्यादया अन्यत्शर्म जंघासंवाहनादितरत् विषयानुभवजन्यं सुखं भृशं विस्मरन्ती जंघासंवाहनसुखस्य भगवदीयत्वेन ब्रह्मानन्दरूपत्वात्तदितरविषयानुभवसुखस्य मात्रात्वं,तस्मात् विस्मृतिर्युक्ता। भीतभीता सती लीलाकमलधारणकठिनयो र्मत्करयोः स्पर्शेन पीडा माभूदिति भीतसदृशी (प्रकारे गुणवचनस्येति द्विर्भावः तस्य कर्मधारयवत्त्वात् पूर्वस्य पुंवद्भावः) शनैर्मन्दंमन्दं करेण कराभ्यां (द्वित्वजातेः प्रायिकत्वादेकवचनं) परिमृशति संवाहयति। ते जंघे मुनिजनः सान्द्रानन्दथुः परमानन्दमग्नः (टुनदिधातोः ट्वितोऽथुजिति अथुच्)। जन्ममृत्यु-जरामरणे जिहासुः सन् भगवद् जंघयोर्जरामरणहापकत्वं अजरोऽमर इति श्रुतिसिद्धं संस्मरतु भावयेत् ॥ ६ ॥

जंघाकाण्डः क्षणार्द्धावगणितगगनाभोगजंघालभावो
भाव्यो वेदेन जंघाकरिक इति विनाप्यंघ्रिणा श्लाघितस्य।
दुर्लंघ्यं योगिसंघैर्विधिपदमधिरुह्य च्युतैर्यं स्मरन्तः
संसारप्रान्तरं दुस्तरमपि तरितुं जांघिकत्वं भजन्ते। ७।

जंघाकाण्ड इति, अंघ्रिणा विनापि "विनायोगे तृतीया," अंघ्रि विहाय अंघ्र्यभावेऽपीत्यर्थः; जंघाकरिक इति वेदेन श्लाघितस्य गमनसाधनं पादं विना जवनोऽयं भगवान् परमाश्चर्य्यकर्मा इति वेदे "अपादपाणिर्जवनोग्रहीता" इति रूपेण प्रशंसितस्य अर्थात् वेदान्तवेद्यस्य श्रीनारायणस्य क्षणार्द्धावगणितगगनाभोगजंघालभावः बलिनियमनाय त्रिविक्रमरूपतया क्षणार्द्धेनावगणितः अवज्ञया कियदिदं गगनमण्डलमिति परिमितः गगनाभोगः गगनस्य विभुत्वं येन "आभोगः परिपूर्णते"त्यमरः। एतादृशः जंघालभावः जवनत्वं यस्य जंघाशब्दात् अस्त्यर्थे लच्। स जंघाकाण्डः जंघा काण्ड इवेति उपमितसमासः। भाव्यः चिन्त्यः भुवोऽवकल्कने इति भूधातोर्णिच्। अवकल्कनं—चिन्तनं णयन्तात्ततः "अचो यदिति यत्।तं भावयेदित्यर्थः।

Digitized by srujanika@gmail.com

यं जंघाकाण्डं स्मरन्तः महान्तः विधिपदं अधिरुह्य ब्रह्मलोकं प्राप्य च्युतैः योगिसंघैः भगवदवज्ञया कृतानां योगादीनां क्षयिष्णुत्वात् । तथाच भागवते "येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्ध-बुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृत युष्मदंघ्रय" इति भावः । अथवा विधिर्यागाद्यनुष्ठानं तत्साध्यं यत्पदं स्वर्गादि, तदधिरुह्य च्युतैः । योगिनां कर्मयोगिनां संघैः "योगः कर्म सुकौशल" मिति श्री-भागवतोक्तेः । "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति तत्रोक्तेश्च । कर्मणां संसारतरणासामर्थ्यात् । "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामाभजन्ते इति च तत्रोक्ते" दुर्लङ्घ्यं लंघितुमशक्यं (ईषद्दुःसु इति खल् प्रत्ययः) अतएव दुस्तरमपि संसार-प्रान्तरं संसार एव प्रान्तरं इति रूपकं "प्रान्तरं दूरशून्योऽध्वा" इत्यमरः। तत् तरितुं लंघितुं जांघिकत्वं अतिजवनत्वं भजन्ते । जंघालोऽतिजवस्तुल्यौ जंघाकरिक-जांघिकौ इत्यमरः । यत्स्मरणेन जना दुस्तरं संसारप्रान्तरं तरन्ति तस्य जंघाकाण्डस्य गगनाभोगलंघनं जंघालत्वं किमु वक्तव्यं इति कैमुत्येन अर्थसंसिद्ध्या वाक्यार्थापत्तिरलंकारो व्यज्यते। तस्माद् वस्तुना अलंकारध्वनिः ॥ ७॥

अथ क्षुत्पिपासादिद्वन्द्वनाशकस्य श्रीनारायणजानुयुग्मस्य वर्णन-मारभते श्लोकद्वयेन ।

ध्यायेल्लावण्यलक्ष्मीमणिमयमुकुरम्मन्ययोर्जानुनोस्त-
द्युग्मं मंजीररत्नारुणमणिकिरणैः कुंकुमैः पंकिलाङ्कम् ।
दीर्णस्यारोप्य तत्र त्रिदशरिपुपतेर्लिप्तमद्यापि रक्तै-
र्मत्वा यन्मार्ष्टुमाशाः करजकरजलैः क्षालयन्तो भुजान्ताः ॥

ध्यायेदिति । लावण्यलक्ष्मीमणिमयमुकुरम्मन्ययोर्लावण्यं कान्ति-विशेषः "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यद-ङ्गेषु लावण्यं तदिहोच्यते" इति कविसमये । तस्य लक्ष्मीः सम्पत्तिः समृद्धिरिति यावत् । सैव स्त्रीलिङ्गनिर्देशेन काचित् कान्ता तस्या मणिमयमुकुरौ आत्मानं मन्येते इति । स्निग्धत्व-स्वच्छत्ववृत्तत्वादिधर्म्मैः जानुनोः लावण्यलक्ष्मीमणिमयमुकुरत्वेन आत्ममननमुचितम् । मननस्य हृदयधर्मत्वेऽपि "अङ्गानि यस्य सकले-न्द्रियशक्तिमन्ति इति ब्रह्मसंहितावचनात् जानुनोर्मननेन न कापि

द्युतिः। आत्ममाने स्वशून्य अरुद्विषदजन्तस्येति मुम्, मनश्चातोर्दैवादिका-च्छिन्नीति श्यन्‌ जानुनोरूरुपर्वणोः मञ्जीरताराऽरुणमणिकिरणैर्मञ्जीरयोर्नूपुरयोःतारादीप्ताः ये अरुणमणयः पद्मरागमणयः यद्वा मञ्जीरतां नूपुरत्वं रान्ति आददतीति मञ्जीरताराः, "रादाने क्विप्" ये अरुणमणयः अथवा मञ्जीरतां ऋच्छन्तीति मञ्जीरताराः ये अरुणमणयः, "कर्मण्यणित्यण्"। एतेन दीप्तत्वाद् बहुत्वाच्च मणिकिरणानामत्यूर्द्ध्वप्रसृतत्वं बोध्यते। तेषां किरणैः रश्मिभिः तैरेव कुंकुमैः व्यस्तरूपकं पंकिलः सान्द्रत्वात् पंकलिप्त इव अंकः उत्सङ्गो यस्य "उत्सङ्गचिह्नयोरंक" इत्यमरः तद् युग्मं जानुद्वयं ध्यायेत्। भुजान्ताः भुजानामन्ताः पाणयः तत्र जानुद्वये आरोप्य निक्षिप्य दीर्णस्य विदलितस्य विपाटितस्येति यावत्। (दृविदारणे ततः क्तः तस्य नः) त्रिदशरिपूणां असुराणां पतेः प्रभोः हिरण्यकशिपोः रक्तैः विदारणजन्यैरिति भावः। अद्यापि लिप्तमिति मत्वा अत्र श्रीनारायणस्य नृसिंहतादात्म्येन विवक्षा दैत्यविदारणकृतमपि रक्तलिप्तत्वं अद्यापि देहान्तरे कालान्तरेऽपि वर्त्तते। इदमयुक्तं; अस्मत्-कृतस्यास्य अस्माभिरेव मार्जना युक्ता। एकस्मिन् जानुनि कृतस्य दैत्यविदारणस्य जानुद्वये वर्णनं कल्पप्रवाहस्यानादित्वात् कुत्रचित् कस्मिंश्चिद् भवतीति ज्ञेयं। यत् मार्ष्टुं प्रोञ्छितुं आप्ताः प्राप्ताः सन्तः अत्र भुजानां प्रभोर्महापुरुषत्वेन "आजानुबाहुः सुशिरा" इति लक्षणात्। स्वतः प्राप्तेर्मार्जनार्थं प्राप्तिवर्णनमुत्प्रेक्षा। यथा चाहेतोर्हेतुत्वेन सम्भावना-दसिद्धविषया हेतूत्प्रेक्षा। व्यञ्जकाप्रयोगाद्गम्या। करजकरजलैः नखकिरणरूपै र्जलैः क्षालयन्तः धावनं कुर्वन्तः इति। अत्र करजकराणां प्रक्षालनहेतूनां तद्धेतुत्वेन सम्भावनं पूर्ववदेव बोध्यम्॥८॥

आजानाजानुबाह्वोः कुचकलशयुजा स्पर्द्धमानं रमाया
वृत्तं काठिन्यधामामलरुचिरुचिरं चिन्तयेदूरुपर्व।
नित्यं हस्तैश्चतुर्भिः शुचिरसचतुरैर्येत् स्वतन्त्रोऽपि शीलन्
वाक्चिन्तागोचरोऽसौ क्षिरमथ विषयं नान्यमादातुमीष्टे॥९॥

आजानेति—वृत्तं वर्त्तुलं काठिन्यस्य कठिनतायाः स्थानं अमलरुचि स्वच्छशोभं रुचिरं सुन्दरं अतएव मायाः श्रीदेव्याः कुच-कलशयुजा कुचकुम्भयुग्मेन स्पर्द्धमानं समग्रकुचधर्मवत्वात् स्पर्द्धनौ-चित्यं जानुद्वयस्य। अत्र स्पर्द्धमानशब्दस्य रूपकवाचकत्वात् रमाकुच-

Digitized by srujanika@gmail.com

साहश्यव्यक्ते रूपकालंकारः । आजानजानुवाहोः आजानेन स्वभावेन आजानु जानुपर्यन्तं वाहवो यस्य तस्य श्रीनारायणस्य अआजानाजानु-बाहोरिति विशेषणस्य जानुशीलनसाभिप्रायत्वात् परिकरालंकारः । ऊरुपर्व जानुनी; द्वित्वजातेः प्रायिकत्वादेकवचनं; चिन्तयेत् ध्यायेत् । असौ नारायणः स्वतन्त्रोऽपि वाक्चिन्ताऽगोचरोऽपि शुचिरसचतुरैः शृङ्गाररसनिपुणैः शुचिरसचातुर्य्यं हस्तानां कुचाग्रकलननीविमोक्ष स्तनजघनादिनखनिवेशनैपुणं चतुर्भिर्हस्तैः यत् ऊरुपर्व नित्यं शीलन् समा-धानेन परिमृशन् सन् अथ शीलनानन्तरं स्वयं अन्यं शीलनातिरिक्तं विषयं शब्दादि आदातुं ग्रहीतुं न ईष्टे न समर्थो भवति । एतेन स्वतन्त्रस्य जानुशीलनाधीनत्वं वाक्चिन्तागोचरस्य साधारणजनवद् विषयासक्तत्वं तेन च जानुद्वयस्य रमाकुचस्पर्द्धनश्रीनारायणमोहनत्वा-दिरूपेण वस्तुना नारायणमोहनस्यापरमोहनं किं वक्तव्यमिति वाच्या-र्थापत्तिरलंकारो व्यज्यते ॥ ६ ॥

अथ वैश्यप्रभवत्वेन त्रिवर्गहेतोर्नारायणोरुद्वयस्य वर्णनमारभते । त्रिभिः श्लोकैः । रुग्णक्लेशेति ;

रुग्णक्लेशाटवीकं रिपुविसरसरः-क्षोभिवेतण्डशुण्डा-
दण्डाभं सक्थिकाण्डं कलयतु मनसा पुण्डरीकेक्षणस्य ।
वाहुः संवाहयन्त्या जलनिधिदुहितुर्यत्र गांगेयगौरी
स्वर्गंगाम्भोजिनीव स्फुरति विकसता पाणिपाथोरुहेण ।१०।

रुग्णा भग्ना क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशरूपाः त एव अटवी वनं सा येन "नद्यृतश्चेति कप्" क्लेशानां बहुत्वेन दुश्छेद्यत्वेन अटवीत्वेन रूपणम् । रिपवः दैत्याः तेषां विसरः समूहः स एव सरः पद्माकरः तत् क्षुभ्नातीति क्षोभि (प्रह्लादेर्योनिः) रिपुविसरस्य दुष्प्रवेशत्वेन सरस्त्वरूपणं मधुकैटभादिदैत्यैः सह मल्लयुद्धदर्शनाद्दिमुक्तम् । एतद्धर्म-साधारण्यात् वेतण्डस्य हस्तिनः यः शुण्डादण्डः तस्याभेवाभा यस्य तत्, पुण्डरीकेक्षणस्य पद्मलोचनस्य अथवा पुण्डरीकः दिग्गजविशेष स्तस्येव ईक्षणं दर्शनं यस्य ईक्षणं च स्वकर्मकं द्रष्टृकर्तृकं; स्थूलत्वदुर्द्धर्षत्व-दुष्कर क्रियाकर्तृत्वादिभिः पुण्डरीकगजसदृशस्य श्रीनारायणस्य एतेन ऊरुकाण्डस्य शुण्डासादृश्यं स्वर्गङ्गाम्भोजिनीसङ्गतिश्च समञ्जसा; सक्थि काण्डमिवेत्युपमितसमासः मनसा कलयतु गृह्णातु ध्यायतां भक्त इति शेषः ।

Digitized by srujanika@gmail.com

यत्र सम्वाहयन्त्याः जलनिधिदुहितुः लक्ष्म्याः गाङ्गेयगौरी सुवर्णपीतवर्णा बाहुः "द्वौ परौ द्वयोः भुज बाहुप्रवेष्टो दो"रित्यमरः। विकसता प्रफुल्लेन पादसम्वाहनाय विस्तृतेन च पाणिपाथोरुहेण पाणिरेव पाथोरुहं पंकेरुहं तेन पाणिपद्मवल्लक्ष्मीबाह्वोः पद्मलतानुमानं। स्वर्गङ्गाम्भोजिनीव आकाशगङ्गापद्मलतेव स्फुरति विलसति। अत्र रूपकोत्थापितोपमालंकारः ॥ १० ॥

पंचेषोः स्वं जिगीषोर्मददमनकृते यस्य लावण्यलेशा-
दुर्वश्यासीद्द्युवेश्याभरणमुभयथाक्षिप्तरम्भोरुलक्ष्मीः।
लक्ष्मी वैश्येषु पुत्रेष्विव रचितरतिर्यत् प्रसूतेष्ववश्यं
ध्यायेन्नारायणोरोरमरततितपोविघ्नवर्गार्गलायाः ।११।

पञ्चेषोरिति; स्वं जिगीषोः स्वं आत्मानं जेतुमिच्छोः पञ्चेषोः कामस्यात्र तपस्यतो नारायणस्य तपोविघ्नाचरणाय कामादीनां आगमनं तत्प्रयत्नादिकं च पुराणादनुसन्धेयम्। मददमनकृते अहं सर्वेषां तपस्विनां मोहनक्षति अभिमानशमनार्थं यस्य ऊरोः लावण्यलेशात् लावण्यं कान्तिविशेषः तस्य लेशात् लवात् द्युवेश्याभरणं सुरवारयोषा-भूषा अतएव उभयथा प्रकारद्वयेन क्षिप्तरम्भोरुलक्ष्मीः क्षिप्तरम्भाः जित-कदलीकाण्डाः ऊरुलक्ष्मीर्यस्या एतेन सौन्दर्य्यातिशयः सूचितः। किञ्च क्षिप्तरम्भायाः तन्नाम्न्याः द्युवेश्यायाः ऊरुर्महती लक्ष्मीर्यया सा तथा एतादृशी उर्वशी आसीत् अभूत्। एतेन द्युवेश्याभरणत्वं व्यक्तम् तासु तस्याः श्रेष्ठत्वात्। मोहनार्थमागताः कामादयः श्रीभगवदूरु-सम्भूतोर्वशीलावण्यमोहितास्तामादाय लज्जिताः स्वर्गं ययुरिति प्रसिद्धम्। लक्ष्मीः पद्मा यत्प्रसूतेषु यतो जातेषु भगवदूरोर्वैश्यजननं "ऊरु तदस्य यद्वैश्य" इति श्रुतिसिद्धं। वैश्येषु पुत्रेष्विवावश्यं निश्चितं रचितरतिः विहितप्रीतिः लोके वैश्यानां समृद्ध्याधिक्यं वाणिज्यसिद्धं तल्लक्ष्मीकटाक्षपातहेतुत्वेनोत्प्रेक्षते, अमरततितपोविघ्न-वर्गार्गलायाः, अमरततेः सकाशात् यः स्वतपोविघ्नवर्गस्तस्यार्गलायाः तत्प्रवेशप्रतिबन्धकारिण्यः उर्वशीजननेन कामादिकृतविघ्ननिवारकत्वं नारायणोरोः। अत्रापि द्वित्वविशिष्टजातेरेकत्वं ध्यायेत्। ध्यै धातोः स्मृत्यर्थत्वात् कर्मणि षष्ठी अत्र श्लेषरूपकोत्प्रेक्षाणां संकरः ॥ ११ ॥

Digitized by srujanika@gmail.com

स्थूलत्वाद्योगयोग्याभृदजतनुगृहस्थूणसौभाग्ययोग्यं
ध्यायेदस्योरुकाण्डं निगमनिभमहाशाखिशाखाप्रकाण्डम्
यत्र व्यायच्छमाना मुनिहृदयभटा वर्द्धमानप्रभावाः
प्रायेण प्रौढकामाद्यरिचयविजये सांयुगीना भवन्ति ।१२।

स्थूलत्वादिति, स्थूलत्वादुभयत्र हेतुत्वेनान्वयः। योगयोग्याभृदजतनुगृहस्थूणसौभाग्ययोग्यं योगे अष्टाङ्गे योग्या अभ्यासः तां बिभ्रतीति तेषामजस्य श्रीनारायणस्य तनुः गृहमिव तत्र यस्थूणा स्तम्भः तस्य सौभाग्यं सौन्दर्यं तत्र योग्यं योगाभ्यासिनां नारायणतनुगृहे सततनिवासार्थं तदारम्भप्रथमनिखात स्तम्भ एवायमूरुरित्युत्प्रेक्षा। "योगः संहननोपायध्यानसङ्गतियुक्तिषु"। "अभ्यासः खुरली योग्येति" चामरः। निगमनिभः वेदरूपः यः महाशाखी महावृक्षः वेदस्य सहस्रशाखत्वात् तस्य शाखा प्रकाण्डमिव शाखाश्रेष्ठमिव प्रतिपाद्यप्रतिपादकत्वात् व्याजापह्नुत्युत्थेयमुत्प्रेक्षा। प्रकाण्डमुद्गतल्लजौ "प्रशस्तवाचकान्यमूनीत्यमरः। अस्याजस्य ऊरुकाण्डं ध्यायेत्—चिन्तयेत्। यत्रोरुकाण्डे व्यायच्छमानाः व्यायामं कुर्वन्तः व्यायामो नाम प्रत्यङ्गदृढीकरणाय वृत्तमसृणस्तम्भे क्रियमाणः संघट्टनक्रियाविशेषः। "आङो यमहन इति आङ्पूर्वस्य यमधातोरात्मनेपदम्। ततः शानच्"। मुनीनां हृदयान्येव भटा योधाः भगवदुरुकाण्डव्यायामात्। वर्द्धमानप्रभावाः भटपक्षे व्यायामः पूर्वोक्तः मुनिहृदयपक्षे ऊरुनिविडाश्लेषः ध्यानदार्ढ्यमिति यावत्। तेन वर्द्धमानः क्रमात् प्रवृद्धः प्रभावः शमदमादिसम्पत्तिः तेजश्च येषां ते सन्तः प्रायेण कार्त्स्न्येन प्रौढाणां कामाद्यरीणां चयस्य समूहस्य विजये परिभवे सांयुगीना युद्धनिपुणा भवन्ति। संयुगशब्दात् साध्वर्थे खप्रत्ययः रूपकालंकारः।१२।

अथ त्रिभिः श्लोकैः त्रिवर्गावधीभूतजघनसिंहासनवर्णनमारभते—

मध्येलावण्यपूरं घनजघनतटच्छद्मना पद्मनाभस्योच्चैरुद्भासमानं पुलिनममलिनं चिन्त्यतां चक्रचारु।
यस्मिन् विश्रम्य सम्यङ्मतिरतिचतुरा पारिकांक्षीश्वराणां
पारं संसारसिन्धोः करकमलपरिप्राप्तकल्पं विवेद ।१३।

मध्ये लावण्यपूरं लावण्यपूरस्य लावण्यप्रवाहस्य मध्ये "पारे मध्ये षष्ठ्या वेत्यव्ययीभावः। पद्मनाभस्य श्रीनारायणस्य घनजघनतटच्छद्मना

Digitized by srujanika@gmail.com

घनं निविडं जघनमेवतटं तस्य छद्मना कपटेन "जघनं नाम नाभेरधोभागरूपमङ्गम्" "क्लीबेतु जघनं पुर" इत्यमरः । उल्लासमानं प्रतीयमानं जघनाभिन्नमिति यावत्, उच्चैरुन्नतम् उभयत्र समानम् अमलिनं लावण्यातिरेकात् पुलिनपक्षे रत्नवालुकामयत्वेन देदीप्यमानम् । चक्रं रथाङ्गं तद्वच्चारु सुन्दरं वृत्तत्वात्, अन्यत्र चक्रैः चक्रवाकैश्चारु तद्विहारस्थानत्वात् । "चक्रं रथाङ्गं" "कोकश्चक्रश्चक्रवाक" इत्यमरः । ईदृशं पुलिनं तोयान्तर्गततटम् । "तोयोत्थितं तत्पुलिनम्" इत्यमरः । अत्र जघनस्य व्याजापह्नुत्या पुलिनस्वरूपताकथनाय पद्मनाभस्येत्यत्र श्रीदयाब्धेरिति वक्तुं युक्तम् । अथवा पद्मनाभस्य पद्मैः नाभा यस्य, अभा शोभाभावः, नअभा यस्य तस्य, पद्मैः सहितस्य अर्थात् पद्माकरस्य । सरिदुदधिगतं पङ्कजेन्दीवरादीत्युक्तरीत्या कस्यचित् समुद्रस्य पुलिनं चिन्त्यतां योगनिष्ठैन चिन्तितं भवतु । यस्मिन् जघनपुलिने पारिकाङ्क्षीश्वराणां मुनिश्रेष्ठानां "पारिकाङ्क्षी वाचंयमो मुनिरित्यमरः । अतिचतुरा मतिः सम्यक् विश्रम्य विश्रामं कृत्वा मध्ये मध्ये विश्रान्तः सागरं सुखं तरति अविश्रम्य गतस्तु मज्जत्येवेति प्रसिद्धम् । एतदेव चातुर्यं ध्यानपक्षे जितं जितं स्थानमपोह्य धारयेदित्युक्तम् । मतिरिति स्त्रीलिङ्गसाम्यात् काचन स्त्री । तेन करकमलेति वक्ष्यमाणं संगच्छते । एतेन स्त्रियोऽपि सुतरः संसारः पुंसः किं वक्तव्यमिति । जघनपुलिनविश्रान्तेराश्चर्यत्वमुक्तम् । तेन काव्यार्थापत्तिरपि व्यक्ता । संसारसिन्धोः पारं परतीरम् । पारावारे परार्वाचीतीरे इत्यमरः । करकमलपरिप्राप्तकल्पम् ईषदसमाप्तं करकमले परिप्राप्तं तत् । ईषदसमाप्त्यर्थे कल्पप्रत्ययः । करप्राप्यं सत्त्वं विवेद ज्ञातवती । अत्रोक्तेन वस्तुना एकतमसमुद्रपुलिनगतेनापरसमुद्रस्तीर्यत इति असङ्गतिरलंकारश्च व्यज्यते । श्लेषरूपकयोः संकरः ॥१३॥

सारं सन्नाभिशोभं द्युमणिगणलसत्तेजसा भ्राजमानं
श्रीकान्तस्यान्तरङ्गं जघनमिति मतं चक्रमन्यद्विचिन्त्यम् ।
धारा सौदर्शनी सा जठररिपुघटादुःसहा यत्सहाया
ग्रीवाग्राणि च्छिदायै भिदुरमदभिदि प्राभवत् कैटभीये ॥

सारमिति: सारं सर्वोत्कृष्टं भगवदीयत्वात्, अन्यत्र अरैश्चक्रावयवैः पिण्डिकानेमिलग्नैः सह वर्तमानं सारम् सन्नाभिशोभं सती वर्तमाना निकटस्थिताया नाभेः शोभा यस्मिन् तत्, यद्वा अभितः शोभा अभिशोभा,

Digitized by srujanika@gmail.com

सन्ना विसरन्ती अभिशोभा यस्य तत् अत्युज्ज्वलमित्यर्थः । अन्यत्र नाभिः पिरिण्डकान्तक्रमन्यावयवः अन्तसंयोगस्थानम् "पिचिण्डिका नाभिरित्यमरः द्युमणिगणलसत्तेजसा भ्राजमानं दिवांमणयः द्युमणयः दिव्या मणय इत्यर्थः । ते तु काञ्चीलताः तेषां गणस्य लसता तेजसा दीप्त्या भ्राजमानम् अन्यत्र द्युमणिगणः सूर्यसमूहः तस्य लसता तेन भ्राजमानं कोटिसूर्यप्रकाशकत्वात् । द्युमणिगणलसत्तेजसेत्यत्र पदार्थवृत्ति-निदर्शना । श्रीकान्तस्य श्रीनारायणस्यान्तरङ्गं वस्त्राच्छन्नत्वात् तदन्तर्वर्त्ति अङ्गम् अथवा तनोर्मध्यवर्त्ति अङ्गं बहिरङ्गात् सुदर्शनात् । अन्यत्र इतरत् जघनमिति मतं ख्यातं वस्तुतः चक्रवृत्तत्वेन सादृश्यात् संविचिन्त्यं ध्येयं भक्तेनेति शेषः । व्याकरणशास्त्रे बहिरङ्गान्तरङ्गविध्योर्मध्ये अन्तरङ्गस्य बलीयस्त्वमिव अन्तरङ्गचक्रस्य बलीयस्त्वमाह । धारेति; जरठ-रिपुघटादुःसहा जरठानां कठिनानां रिपूणां दैत्यानां घटा समूहः तस्याः दुःसहा सोढुमशक्यापि "जरठः कठिने जीर्णे" इति विश्वः । सौदर्शनी सुदर्शनसम्बन्धिनी धारा निशितं मुखम् धारा सैन्ये द्रुमस्कन्धे खड्गादेर्निशिते मुखे इति मेदिनी । यत्सहाया यज्जघनचक्रं सहायो यस्याः तथाभूता सती "जरठरिपुघटादुःसहा दुःसहायेति पाठोऽनु-प्रासे साधीयान् ।" भिदुरमदभिदि भिदुरस्य वज्रस्य मदः नैष्ठुर्यजगर्वः तस्य भेदके वज्रादतिनिष्ठुरे कैटभीये कैटभस्य सम्बन्धिनि ग्रीवाग्राविण शिरोऽधिशिलायाम् । अथ "ग्रीवायां शिरोधिः कन्धरेत्यपि" इत्यमरः । छिदायै छेदनाय प्राभवत् समर्था अभवत् । प्रपूर्वस्य भूधातोः समर्था-भिधानं धातूनामनेकार्थत्वात् । इतरशस्त्रधारा पाषाणं प्राप्य कुण्ठता भवति । इयन्तु सुदर्शनधारा जघनचक्रसाहाय्येन पर्वतभेदकवज्राद-प्यतिनिष्ठुरस्य कैटभग्रीवाग्राव्णः छेदनसमर्था भवतीति सुदर्शनचक्रा-पेक्षया जघनचक्रस्याधिक्यमिति भावः । अत्र सारमित्यादिश्लेषोत्था-पितरूपकालंकारः । सुदर्शनस्य कैटभशिरश्छेदने जघनसाहाय्यम् । "एवमुक्त्वा भगवता शङ्खचक्रगदाभृता । कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः । इति मार्कण्डेयपुराणवचनात् ॥१४॥

सज्जं सिंहासनं तज्जघनमनुमनः शान्तसाम्राज्यसुस्थम्
स्थाप्यं यस्योपरिष्टाल्लसति सिततमं स्पष्टरोमालिदण्डम् ।
श्रीवत्सच्छत्रभारादपि मणिरसनाहारिहीराश्मरश्मि-
श्रेणिः प्रेङ्खन्मरालीविभ्रमरसुषमोड्डामरा चामराली ॥१५॥

Digitized by srujanika@gmail.com

सज्जमिति; तज्जघनं तस्य नारायणस्य जघनं सज्जं साम्राज्याभिषेकाय संस्करणतया स्थापितं सिंहासनं नृपासनम्, नृपासनं तु यद्भद्रासनं सिंहासनं तु तदित्यमरः। तदनु तेन सह सम्बद्धं तृतीयार्थे इति अनोः कर्मप्रवचनीयस्य योगे द्वितीया। शान्तसाम्राज्यसुस्थं मनः स्थाप्यं तज्जघनस्य शान्त्या प्राप्यत्वात् शान्तानां मध्ये यत्साम्राज्यं महाराजत्वं तेन स्वस्थं सुस्थिरं मनः स्थाप्यं स्थापनीयं मुमुक्षुणेति शेषः। एतेन मनसो महाराजत्वं व्यक्तम्। सिंहासनस्य सज्जत्वमाह. यस्य उपरिष्टात् यस्योपरि स्पष्टरोमालिदण्डं स्पष्टः प्रकाशमानः रोमालिरेव दण्डः यस्य तत्, छत्रस्य कनकदण्डत्वं प्रसिद्धम्। अत्र रोमालिदण्डत्वेन इन्द्र-नीलमणिदण्डत्वमायातम्। तच्च कनकदण्डत्वापेक्षया साम्राज्योत्कर्ष-सूचकम्। सिततमम् अतिशुभ्रं श्रीवत्सच्छत्रं श्रीवत्साख्यं वक्षस्थितं चिह्नमेव छत्रं लसति शोभते। आरादपि समीपेऽपि "आराद्दूर-समीपयो" रित्यमरः। मणिरसनाहारिहीराश्मरश्मिश्रेणिः मणिमय-काञ्चीस्थितमनोहरहीरककिरणश्रेणी, प्रेङ्खन्मराली विसृमरसुषमो-ड्डामरा उड्डीनहंसानां विसृमरा प्रसरन्ती या सुषमा परमा शोभा तद्वत् उड्डामरा उत्कृष्टा चामराली चामरश्रेणिश्च लसति। उपरि श्वेतच्छत्रं ध्रियते। समीपे चामरालिश्च "छत्रचामरयो राज्ञोऽसाधारण-लक्षणत्वात् द्वयमेव वर्णितम्। रूपकालंकारः॥ १५॥

अथ निरुपमत्वेनाद्वितीयस्य श्रीनारायणस्य मध्यभागवर्णनमेकेन श्लोकेनारभते—

मध्यं चामुष्य काञ्चीमणिगणकिरणस्पष्टगम्भीरनाभी-
शोभं तद्गर्तगर्भोत्थितशितिभुजगीभ्रान्तिभृद्रोमलेखम्।
कालिन्दीभङ्गभङ्गीप्रबलवलिकुलासन्नराजीवराजी
पांशुस्तृपांशलत्विड्वसननिवसितं चिन्तनीयं तनीयः॥१६॥

मध्यञ्चेति। काञ्चीमणिगणकिरणस्पष्टगम्भीरनाभीशोभं काञ्ची-मणिगणकिरणैः स्पष्टा गम्भीरनाभीशोभा यस्मिन् तत्, तमःसंवृतस्य शोभाभावात् तद्गर्तगर्भोत्थितशितिभुजगीभ्रान्तिभृद्रोमलेखं सैव नाभिरेव गर्तस्तस्य गर्भात् मध्यात् उत्थिता तमोनिरसनरसनामणि-दीपोद्दीपितताद्दशगभीरनाभिगर्ते स्थातुमशक्यत्वात् सर्पाणां सान्धकार-विलमस्तीति प्रसिद्धेः। उद्गता या शितिभुजगी कालसर्पा "शिति-

Digitized by srujanika@gmail.com

धवलमेचका" वित्यमरः। तद्भ्रान्तिभृत् तत्सन्देहकारिणी लोमलेखा यस्मिन् तत्, अत्र रूपकोत्थापितो भ्रान्तिमदलंकारः। कालिन्दीभङ्गीनां यमुनातरङ्गाणां भङ्ग्या प्रकारेण प्रबलं यद्वलिकुलं वलयश्चान्तरान्तरा निम्ना उन्नतमांसरेखाः महापुरुषलक्षणरूपाः" तासां कुलम् तस्य कालिन्दीभङ्गभङ्गीप्रबलत्वं नाम तादृशस्निग्धत्वोज्ज्वलत्वकोमलत्वादिभिः तदभिन्नत्वं तत्रासन्ना प्रत्यक्षाभावात् अनुमानेन प्राप्ता या राजीवराजी पद्मश्रेणिः तस्या जलजन्यत्वात् व्यभिचारत्वात् यः पांसुस्तूपः परागसमूहः स्तूप विस्तारे धातो र्घञ्, सर्वतो विस्तृतः पराग इति भावः। तद्वत् अंशला बलवती अंशुलेति पाठे अंशुमती, उभयत्र अस्त्यर्थे लच् त्विट् यस्य एतादृशं वसनम् तेन वसनस्य पीतवसूक्ष्मत्वस्निग्धत्वादिधर्मैः परागाभिन्नत्वम्; तेन निवसितम् आच्छादितं वस आच्छादने क्त प्रत्ययः। अत्रानुमानं वह्निव्याप्य धूमवानयं पर्वत इतिवत् राजीवव्याप्यवसनाभिन्नतद्रीयपरागवत् वलिकुलाभिन्नकालिन्दीभङ्गभङ्गिमिति अनुमानेन राजीवराजिज्ञानं तनीयः, अतिशयेन तनु अतिकृशम् अमुष्य प्रकृतस्य नारायणस्य मध्यं "मध्यमं चावलग्नं मध्योऽस्त्री" त्यमरः। चिन्तनीयं चिन्ताविषयीकरणीयं ध्यायेदित्यर्थः। अत्र रूपकालंकारः ॥१६॥

अथ त्रिगुणाऽविद्याशक्तिनिरसनतया पीताम्बरस्य वर्णनं त्रिभिः श्लोकैरारभते। अत्र यद्यपि पीताम्बरस्य वर्ण्यमानाङ्गभिन्नत्वेन वर्णनानर्हत्वं तथापि वसनं निवसितमित्युपक्रान्तत्वात् मध्योरुसमाच्छादकत्वेनाङ्गोपकारकत्वाद्वर्णनमुचितम्।

स्फीतं पीताम्बरस्याम्बरमपि मनसा संस्तवीतास्तसाम्यं
यत्तेजः पीतभावादितरकनकरुग्वस्तुभिः पीतनाम।
यस्याभ्यर्णे सुवर्णक्षितिधरशिखरक्षेपदक्षेसमित्यां
वेपेते म्लान्युपेते वत पतगपतेस्त्रस्नुनी किं पतत्रे ।१७।

स्फीतमिति; पीताम्बरस्य स्फीतं विस्तीर्णं स्फायधातोर्निष्ठायां स्फीभावः। सर्वव्यापकस्य नारायणस्याप्याच्छादकत्वात्। अत एवास्तसाम्यं निरुपमम् अम्बरमपि वस्त्रमपि वस्त्रपर्यायबाहुल्येऽपि अम्बरत्वेन व्योमगतविभुत्वनित्यत्वादिकमम्बरस्य सूचितम्। मनसा संस्तवनं "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्या सर्वव्याप-

Digitized by srujanika@gmail.com

कस्याकाङ्क्षादकमिदं किं वर्णयामीति अगमनम् एतादृशस्य सवाच्यान-मुचितमेवेति ध्यायेदिति तात्पर्य्यम् । स्तवने हेतुमाह यत्तेजः पीत-भावात् यस्याम्बरस्य तेजसा कान्त्यापीतभावात् पीतत्वात इतस्य पीताम्बराभिन्नस्य कनकरूपवस्तुनः सुवर्णवर्णस्य वस्तुनः लोके यत् यत् कनकादि पीतवस्तु विद्यते तत् स्वतो न पीतं किन्तु नारायणस्य पीता-म्बरपीतिम्नः सम्पर्कादेवेत्युत्प्रेक्षा । सा च इवाद्यप्रयोगाद् गम्या । कनकादिपीतवस्तूनाम् अम्बरकृतपीतिमासम्बन्धेऽपि तत्सम्बन्धवर्णना दतिशयोक्तिः । सा च उत्प्रेक्षोत्थापिता, किं बहुना यस्याम्बरे समीपे सभियां युद्धे पुराणप्रसिद्धे मरुद्गरुद्वयाद्रूपे सुवर्णाद्रिनिधरशिखरद्वे पद्दे पीतिम्ना सारेण च सुवर्णगिरेस्तिरस्कारक्षेपके च तादृशे अपि पतगपतेः गरुड़स्य पतत्रे पक्षौ म्लान्युपेते म्लानिं प्राप्ते अत एव वस्तुनी भीते सती उत्कृष्टसमीपे निकृष्टस्य त्रासात् वेपेते किमुत्प्रेक्षा । वत-खेदे-अहो सुमेरुशिखरदलनयोः गरुत्मद्गरुतो भगवद्वसनसकाशे ईदृशं मालिन्यमिति वसनसकाशे गरुत्मद्गरुतो वेगेनासम्बन्धेऽपि तत्सम्बन्ध-वर्णनमतिशयोक्तिः, सा च पूर्ववदुत्प्रेक्षोत्थापिता ॥१७॥

जम्बूजाम्बुस्रवन्तीतटकनककलत्पङ्कशङ्कां दधानं
सिद्धानां चेतसैशं वसनमनुसरेद्यत्सकाशे चकास्ति ।
काञ्चीमाणिक्यभौघो जघननिहतयोः प्राङ् मधोः कैटभस्य
प्रायस्नाटक् शिरोजाम्बवयुगलगलल्लोहिताम्बुप्रवाहः ।१८।

जम्बिवति: सिद्धानां देवानां जम्बू-नद्या इलावृतवर्षगतत्वात् तद्दर्शनीयत्वं जम्बूजानां जम्बूफलजानां अम्बूनां "फले जम्बू स्त्री जम्बु-जाम्ववमित्य" मरः । सा स्रवन्तीनदीजम्बूनदी तस्यास्तटयोः कनकरूपं कलद्दीप्यमानं यत्पङ्कं जम्बूनदपङ्कस्य सुवर्णत्वं पुराणसिद्धम् । अतएव जाम्बूनदमिति तस्य नाम । तच्छङ्कां दधानं भ्रान्तिमदलंकारः । ऐशं ईशस्य सम्बन्धि परिधानरूपं वसनं पीताम्बरं चेतसा अनुसरेत् ध्यायेदित्यर्थः । यत्सकाशे यत्समीपे काञ्चीमाणिक्यभोघः मेखलागत-पद्मरागमणिकिरणसमूहः प्राक् सृष्ट्यादौ जघननिहतयोः जघन-देशे हननं प्राप्तयोः, एतच्चण्डिकास्तोत्रे प्रसिद्धम् । कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोरिति । मधोः कैटभस्य च अत्र विशेषणस्य छिन्नम् मधुकैटभगतछिन्नापेक्षया, तादृशी असाधारणी महती ये शिरसी त एव ,

Digitized by srujanika@gmail.com

जाम्बवे जम्बुफले जम्बुफलानां महत्त्वं श्रीभागवते, इभकायनिभानाम-त्युच्चनिपातनिशीर्णानामनिष्ठप्रयाणामिति। तयोर्युगलयोर्गलन् स्रवन् लोहि-तान्येवाम्भःप्रवाहः शिरोगलितलोहिताभिन्नविशीर्णजम्बुफलरसनिर्भर-प्रायः बाहुल्ये इवार्थे, चकास्ति दीप्यते। विशीर्णजम्बुफलरसस्य शोणवर्णत्वात् रक्तरूपत्वम्। अत्र पीताम्बरस्य जम्बूनदतटकनकभ्रान्तेः अनुप्राणनाय काञ्चीप्राणिक्यकिरणगणस्य तन्मध्यगतत्वेन जघनंहत-मधुकैटभशिरोजाम्बवगलितरुधिरप्रवाहत्वेनोत्प्रेक्षा ॥ १८ ॥

विस्पष्टं तद्वपुष्यावरणमनुगुणं लीढनीलाभ्रलीले
विक्षेपं चामरीचामरमृदुपवनेनात्मनाप्याददाने।
स्वध्यातॄणां नृणां तद्द्वयमपनुदती जीवभावे निदानं
विद्युद्विद्योतहृद्ये हृदि वहतु हरेरन्तरीयोत्तरीये।१९।

विस्पष्टमिति; लीढा भक्षिता नीलाभ्रस्य श्याममेघस्य लीला शोभा येन तस्मिन् तद्वपुषि अनुगुणं गुणानुरूपं नीलगुणे पीतगुणस्यातिशोभा-धायकत्वात्, नीलजलदोल्लसितविद्युत्प्रकाशसदृशमित्यर्थः। आवरणं आच्छादनं स्वकर्तृकं भगवद्वपुःकर्मकम् इत्यर्थः। विस्पष्टं प्रकाश आददाने स्वीकुर्वाणे अमरीणां कमलाकिंकरीणां देवीनां करधृत-चामराणां मृदुपवनेन कोमलानिलेन विक्षेपं चलनं च अमरीचामर-चालनानिलकर्तृकं स्वनिष्ठं विक्षेपमित्यर्थः। आददाने पीतस्यापि भगवदम्बरद्वयस्य चित्रतामाह तयोः स्वतोऽविद्याशक्तिरूपावरणविक्षेप-वत्त्वेऽपि स्वध्यातॄणां नृणां निजचिन्तकानां पीताम्बरशब्दस्य विष्णु-पर्यायान्तःपठितत्वेन तद्वत्त्वं तस्याऽसाधारणधर्मः शङ्खचक्रादिवत् अतो भगवद्ध्याने तडिद्वासमच्युतमिति श्रुत्या तद्विशिष्टध्यानप्रति-पादनात् तद्ध्यानस्य भगवद्ध्यानतुल्यत्वात् अविद्याहरत्वं जीवभावे जीवत्वे निदानं कारणं तद्द्वयम् आवरणविक्षेपात्मकमविद्याशक्तिद्वयं अप-नुदती निराकुर्वती जीवोत्पादकमेतज्ज्ञानरूपं शक्तिद्वयमित्यर्थः। जीवो नाम मायायाः परिच्छिन्नानतप्रदेशेषु आवरणविक्षेपशक्तिमदविद्याऽभि-धानेषु चित्प्रतिबिम्बः। आवरणविक्षेपरूपं शक्तिद्वयन्तु विषयावरणा-ज्ञानरूपम्। एकं विषयाश्रितं रज्ज्वादिसंभिन्नविक्षेपोपादानभूतम्। कार्य्यकरत्वं पुरुषाश्रितमन्यत् इदं अहं न जानामीति। अनुभूय-मानमिति; चिद् घनात् ईश्वरात् अविद्याप्रतिबिम्बितस्य चिदंशस्य

Digitized by srujanika@gmail.com

जीवत्वापादकम् एतज्ज्ञानरूपं शक्तिद्वयमित्यर्थः । विद्युद्विद्योतवत् हृद्ये मनोहरे हरेः श्रीनारायणस्य अत्र अविद्यां हरतीति हरिः इति विशेष्यस्य स्वविषेणीभूतान्तरीयोत्तरीययोरविद्याहरत्वाभिप्रायकत्वात् परिकरालंकारः । अन्तरीयोत्तरीये परिधानोत्तरासङ्गरूपे वाससी भक्तो हृदि धेहतु चिन्तयत्वित्यर्थः । अन्तरीयोपसंव्यानपरिधानान्यधोऽ-शुंके संव्यानमुत्तरीयञ्चेत्यमरः । अत्र पीताम्बरयोरावरणविक्षेपवत्त्वेऽपि तद्द्वयनाशकत्वाद् विरोधः । लीढनीलाभ्रशोभे विद्युद्विद्योतहृद्ये इत्यत्र रूपकोपमेति संकरः ॥ १९ ॥

अथ तापत्रयशमकस्य नाभिह्रदस्य वर्णनं त्रिभिः श्लोकैरारभते—

उन्मीलल्लोमलेखा मृदुल नवलतामूलबद्धालवालं
धातुः सिद्धादिमस्यासुनियमनविलं मूलपद्मालयस्य ।
संक्षिप्तानां स्वकुक्षौ किल लयसमये पिष्टपानां प्रवेश-
द्वारं नाभीं गभीरां भुवनभयभिदश्चिन्तयेच्चेतसोऽन्तः ।२०

उन्मीलदिति—उन्मीलन्ती प्रादुर्भवन्ती या लोमरेखा रोमावली सैव मृदुलनवलता मृदुला कोमलस्वभावा नवाऽचिरप्ररूढा लता तस्या जलप्रदानावश्यकत्वेन मूले बद्धं रचितमालवालं तथा सिद्धानां देवानां सिद्ध्यनुकूलव्यापारशालिनञ्च आदिमस्य प्रथमस्य "मुक्तानामपि सिद्धानां कश्चिद् यतति सिद्धये" इति स्मृतेः, मूलपद्मं मूलं सकललोक-कारणरूपं यत्पद्मं नाभिजन्यं तदेवालयो यस्य, पद्मस्य लोकरूपत्वं श्रीभागवते 'तल्लोकपद्मं च स एव विष्णुः प्रावीविशत् सर्वगुणावभासम्' इति । उदरगतसकललोकस्थितिं दृष्ट्वा बहिस्तादवस्थेन जगन्निर्मातुं तदाश्रयस्य धातुः ब्रह्मणः असुनियमनविलं असुनियमनं प्राणायामः तदर्थं विलं गुम्फ इति यस्य ख्यातिः, विविक्तदेशस्थितस्य प्राणायामश्रवणात् स चाष्टाङ्गयोगसहकृततपोऽङ्गानामुपलक्षणं तपःकरणं श्रीभागवत-प्रसिद्धम् । "अतप्यतास्थांत् खिललोकतापनं तपस्तपीयांस्तपतां समाहित" इति श्रुतौ "ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत" इति च । लयसमये प्रलयकाले स्वकुक्षौ संक्षिप्तानां संहृतानां पिष्टपानां लोकानां तद्गतचराचरात्मकजीवानामित्यर्थः । प्रवेशद्वारं किलेतिप्रसिद्धम् । अत्र नाभेः रोमालिलतालवालत्वेन धातुः प्राणायामविलत्वेन प्रलये लोकानां भगवत्कुक्षिप्रवेशद्वारत्वेन च उत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या ।

Digitized by srujanika@gmail.com

भुवनभयभिदः सकलभयहर्तुः श्रीनारायणस्य एतादृशीं गभीरनाभिं चेतसः अन्तः चित्तमध्ये चिन्तयेत् ॥ २० ॥

धत्तां चित्तेऽस्य नाभीह्रदमिति हृदयाह्लादनं यत्र पुण्यैः
स्नाता लावण्यतोयैर्भजति मुनिमतिः पूततां यन्निगूढम् ।
स्रष्टुश्चावेशनं सन्मधुपजनमनोरञ्जनायैव गञ्जं—
कञ्जं रोमालिमालानुसरतिमधुनः सौरभेबद्धबुद्धिः । २१ ।

धत्तामिति : अस्य श्रीनारायणस्यातिहृदयाह्लादनम् अतिशयेन मनोरञ्जनं नाभिरेव ह्रदस्तं "तत्रागाधो जलो ह्रद" इत्यमरः । चित्ते धत्तां चिन्तयेदित्यर्थः । ह्रदधर्ममाह, यत्र नाभिह्रदे मुनिमतिः पुण्यैः पुण्योत्पादकैः, अत्र नाभिह्रदस्य भगवदीयत्वेन गङ्गावत्पावनत्वात्तीर्थत्वं च । सरस्सु देवखातेषु तीर्थेषु च नदीषु च । स्नानेन च क्रिया यस्य स्नात्वा पुण्यफलं मतमिति शङ्खोक्तेः । लावण्यानि कान्तिविशेषाः तान्येव तोयानि तैः स्नाता सती स्नानार्थं जले प्रवेशवद्ध्यानेन तत्र प्रवेशात् पूततां भजति पवित्रीभवतीत्यर्थः । यन्निगूढं यस्मिन्निगूढं स्रष्टुर्ब्रह्मणः आवेशनं सुकर्तृभुवनघटनाशिल्पिशालारूपं, पुराणे—तत्र स्थित्वा धातुस्त्रिभुवननिधानदर्शनात् तथा च ब्रह्माण्डपुराणे "तानेव लोकान् गर्भस्थान् वीक्षितुं पद्मसम्भवः । श्रीपतेरुदरं भूयः प्रविवेश पितामहः ।" इति । सन्त एव मधुपजनाः सुरापजनाः भ्रमररूपप्राणिनो वा, तेषां मनोरञ्जनाय हृदयप्रीणनाय गञ्जं सुरासदनं एवकारस्तत्रोत्प्रेक्षावाचकः । यथा मधुपा मधुपानेन माद्यन्ति तथा तन्नाभिकमलध्यानेन सन्तो माद्यन्तीति भावः । ईदृशं कञ्जम् अर्थात् भुवनात्मकम्, सृष्ट्यादौ नाभिजन्यं तदेवात्र नाभिह्रदे निलीय वर्तते । रोमाण्येवालिमाला अत्र रोमनङ्क्तेन उदरोपरि तनुरोमरेखैवोच्यते प्रकरणवशात् मधुनः सौरभे बद्धबुद्धिः तत्सौरभाकृष्टा सतीत्यर्थः । ह्रदान्तर्लीनस्य मुकुलीकृतस्य तस्य सौरभवर्णनमसाधारणत्वात् अनुसरति कुत्र वर्तते इत्यन्वेष्टुं प्रसरतीत्युत्प्रेक्षा सा च गम्या अत्ररूपकोत्प्रेक्षयोः संकरः ॥ २१ ॥

Digitized by srujanika@gmail.com

मीनैः स्वान्तर्निलीनैर्मुनिहृदयमयैः श्लाघ्यगम्भीरिमश्री
भाव्या कीर्तिप्रसूनैः सुरभिरभिनवैरब्जनाभस्य नाभिः।
रोमालीकालीयोऽसौ भजति गतिभिदः सौरभेः शापपाशात्
दुःसर्पं सर्पहन्त्रा ह्रदमवकलयन् या कलिन्दात्मजायाः॥२२॥

मीनैरिति—स्वान्तर्निलीनैः अतिगाम्भीर्यात् अन्तःस्थितैः, हृदयपक्षे गाढध्यानवशात् अतीव मध्यावगाढैः मुनिहृदयमयैः मुनिहृदयस्वरूपैः तदभिन्नैरित्यर्थः, स्वरूपे मयट्। मीनैः श्लाघ्या प्रशंस्या गम्भीरिम-श्रीः तदतिशयो यस्याः सा, मुनिमनसां बहुत्वादाशुगामित्वाच्च, तद्गाम्भीर्य-प्राप्तया प्रशंसायुक्ता। अभिनवैः नित्यनूतनैः कीर्त्तयः शोभातिशयख्यातय एव प्रसूनानि, तैः सुरभिः; यद्वा ता एव मेघप्रसूनानि मेघपुष्पं घनरसम् इति जलपर्यायपठितस्य मेघपुष्पशब्दस्य भीमसेनादिवत् नामैकदेशग्रहण-मत्रस्थितेर्गतिश्चिन्तनीयेति न्यायात्। नाभौ ह्रदरूपणे तत्र अगाधजलो ह्रद इति तत्तादात्म्य प्रयोजकत्वौचित्यम् अन्यथा मीनसञ्चरणं कालीयभञ्जनं दुर्घटं स्यात्। अत्र सौरभ्ये प्रयोजनाभावश्च, तथापि पद्मनाभस्य नाभिरिति स्वनिष्ठपद्मसौरभ्येण तच्चारितार्थ्यम्। ईदृशी पद्मनाभस्य नाभिर्भाव्या भावनाविषयीकार्या। असौ ध्यानसान्निध्यात् पुरःस्थित इत्यर्थः। रोमाल्येव कालीयः नैल्याद् दैर्घ्यसाम्यात्, यां नाभिं गतिभिदः तत्रत्य-स्वकर्तृकगमन-प्रतिबन्धकर्तुः सौरभेः तत्र तपस्यतः मुनेः गरुडेन क्षुधितेन मीनपतौ भक्षणार्थं नीते दुःखितान् मीनान् दृष्ट्वा कृपया गरुडं शप्तवतः "अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति। सद्यः प्राणैर्विमुच्येत" इति दशमोक्तेः। ईदृशः शाप एव पाशस्तस्मात् यथा पाशवेष्टितेन प्रवेष्टुं न शक्यते एवं शप्तेन तत्र तथात्वात् सर्पहन्त्रा गरुडेन दुःसर्पं दुःखेन सृप्यते यस्तं "ईषद्दुःसुषु खल्" दुष्प्रवेशं कलिन्दात्मजायाः यमुनायाः नैल्यसाधर्म्येण श्रीमूर्त्तिरूपणोचितायाः नाभेस्तन्निष्ठत्वात् तत्सम्बन्धिनं ह्रदं पुटभेदविशेषं "वक्राणि पुटभेदाः स्युः" इत्यमरः। अवकलयन् जानन् अत्र कलिधातुर्ज्ञानार्थः। भजति स्वापराधरुष्टाद्गरुडाद्भीत्या तत्र स्थातुं गच्छति इत्युत्प्रेक्षा। अत्र सर्वत्र रूपकम्। अत्रोत्प्रेक्षेति संकरः॥२२॥

Digitized by srujanika@gmail.com

त्रिगुणमायाकार्यसंसारनिवर्तिकां रोमावलीं त्रिभिर्वर्णयति—

संसारक्षारवारांनिधितरणविधौ बद्धरामालिलीला
रोमाली कृष्टियष्टिर्घनवृजिनवनीलावनी भावनीया ।
पश्यामः श्याममूत्रं निहितमिव समं भूमिसीमाविभागं
कर्तुं भर्तुः शरीरे किल कलहजुषा यां कलत्रद्वयेन ।२३।

संसारेति—संसार एव क्षारवारांनिधिः लवणसमुद्रः कटुत्वेन हेयत्वात् संसारस्य क्षारसमुद्ररूपणम्, अन्यथा वारांनिधिरित्येतावता गतार्थः स्यात् । तस्य तरणविधौ लंघनकर्मणि बद्धा संबद्धा रामालि-लीला रामकृतसेतुलीला यया सा, यथा रामस्य सेतुः वानराणां सागरोत्तरणे हेतुः, एवमियं स्वचिन्तकानां संसारतरणे हेतुरित्यर्थः । तथा घना सान्द्रा अत्यन्ताभ्यासकृता या वृजिनवनी वनीत्वसाधर्म्यं दुश्छेदत्वात्, संसारोत्पादकदुरिताटवी तस्या लावनी लावनकरण-रूपा । स्वार्थस्य गम्यत्वात् लुप्रधातोः करणाधिकरणयोश्चेति ल्युट् । कृष्टियष्टिः खड्गदण्डः एवंविधा रोमाली प्रकरणात् नारायणस्येत्यर्थः । भावनीया चिन्तनीया । कलहजुषा सापत्न्यात् कलहं कुर्वता कलत्रद्वयेन श्रीधरणाख्येन ललनाद्वयेन भर्तुः शरीरे स्वस्वाभिलषितालिङ्गनाद्युपभोगार्थं समं तुल्यं भूमेः सीमाया, इत आरभ्य एतत्पर्यन्तमित्यवधेः विभागं कर्तुं निहितं प्रसारितं श्याममूत्रमिव मषीरंजितगुणमिव यां रोमावलीं पश्यामः उत्प्रेक्षामहे सा भावनीया इति । किलेति प्रसिद्धम् । अत्रापि रूपकोत्प्रेक्षयोः संकरः ॥ २३ ॥

नाभ्याः सारोजनाभ्या विलसदिव बहिर्भूय गर्भाज्जनन्या
बालत्वान्नीलरोमावलिनिभनिभृतं तन्नभोऽन्तर्निभाल्यम् ।
जाने यस्यौचिती सा कविभिरभिमता श्यामता खड्गलेखो-
पज्ञं सद्यःप्रसूतार्भकभृशशिशुतोपक्रमं क्षामता च ।२४।

नाभ्या इति—सारोजनाभ्याः सरोजनाभस्य इयं सारोजनाभी तस्याः नाभ्याः जनन्याः जनयित्र्याः गर्भात् मध्यात् कुक्षेश्च 'नाभ्या आसीदन्तरीक्ष'

Digitized by srujanika@gmail.com

मिति श्रुतेः । बहिर्भूय निर्गत्य उत्पद्येव विलसत् प्रकाशमानं बालत्वात् शिशुत्वात् केशत्वाच्च नीलरोमावलिनिभनिभृतं श्यामरोमरेखाद्यच्छन्नं रोमावलीत्युच्यते वस्तुतो नेदृशं, तन्नभः अन्तः हृदयान्तः निभाल्यं चिन्तनीयं यस्य नभसः खड्गलेखा उपज्ञा "उपज्ञा-ज्ञानमाद्यं स्या" दित्यमरः । कविभिरभिमता सम्मता सा श्यामता नीलत्वं तथा सद्यःप्रसूतस्यार्भकस्य भृशं शिशुत्वोपक्रान्ता शिशुता तस्याः उपक्रमः प्रथमक्रीड़ा श्यामता च औचिती स्वार्थेऽण् उचितेति जाने तर्कयामि । 'उपज्ञोपक्रमं तदाद्याचिख्यासाया' मिति नपुंसकम् । यत्सद्यो जायते तच्छ्यामं भवति श्यामत्वं साहजिकमेवेतिभावः । अत्र यदि आकाशस्य नित्यत्वेनाजन्यत्वं विभुत्वमिति नैयायिकाद्युद्घोषः, स वृथैव श्रुतिसम्मतत्वात् यथा "तस्माद्वा एतस्मादाकाशः सम्भूतः" । "नाभ्या आसीदन्तरीक्ष" मिति श्रुत्यभ्यासबलात् "यावद्विकारं विभागो लोकवदिति" ब्रह्मसूत्रे आकाशोत्पत्तिसिद्धान्ताच्च; तेन जन्यत्वेन परिच्छिन्नत्वादिकमुचितमिति । अत्र व्याजापह्नत्युत्थापितोत्प्रेक्षा । २४ ।

नाभीकूपे दिदृक्षाकुतुकनिपतिते श्रीदृशावुज्जिहीर्षोः
सज्जां रज्जुं स्मरस्य भ्रमरमयगुणां भ्रूधनुर्योगयोग्यम्
भ्रष्टां कण्ठोपकण्ठात् कमलजनिहितां नीलनालीकमालां
काञ्चीसक्ताश्मरश्मि स्मरतु मधुजितो राजितां
रोमराजिम् ॥२५॥

नाभिकूपेति—नाभ्येव कूपस्तस्मिन् दिदृक्षाकुतुकेनाऽयं नाभीकूपः कियद्गभीर इति दर्शनेच्छा-कौतुकेन निपतिते स्खलिते च तच्छोभादर्शनलग्ने च श्रीदृशौ लक्ष्मीनेत्रे उज्जिहीर्षोः उद्धर्तुमिच्छोः स्मरस्य प्रद्युम्नरूपेण स्वपुत्रस्य भ्रूधनुर्योगयोग्यं श्रीनारायणभ्रूचापसंयोगार्हं भ्रमरमयगुणां कामचापस्य भ्रमरगुणत्वप्रसिद्धेः तदभिन्नां ज्यां सज्जां उद्धरणाय प्रसारितां रज्जुमिव स्थितां रज्जुनैल्यार्थं भ्रमरमयगुणाभिन्नत्वं नाभीकूपे पतित—स्वमातृलक्ष्मीनयनोद्धरण—सम्भ्रान्तस्य स्वपुत्रस्य कामस्य स्वधनूरूपनारायणभ्रूयुगावरोपित-प्रसारित-भ्रमरमयगुणाभिन्नरज्जुत्वेनात्र रोमावलेरुत्प्रेक्षा । एवमुत्तरत्र सर्वत्र । कण्ठोपकण्ठात् भ्रष्टां

Digitized by srujanika@gmail.com

कमलजेन नाभिपद्मजन्मना पुत्रेण ब्रह्मणा जगन्निर्माणादौ पूजायां निहितां दत्तां नीलनालीकमालां नीलोत्पलमालामिव स्थितां काञ्ची-सक्ताश्मरश्मिं काञ्चीस्थितमहेन्द्रनीलोपलकिरणधारामिव स्थिताम् एवं राजितां शोभमानां मधुजितः श्रीनारायणस्य इत्यत्र मुरजित इत्युक्तिः साधीयसी । रोमराजिं स्मरतु ॥ २५ ॥

अथ चतुर्वर्गद्रविणागारकपाटं वक्षस्तटं चतुर्भिर्वर्णयति—

वक्षोधीक्षोभदक्षं नगरिपुनगरीनागरीणां गरीयः
सौन्दर्योद्गारि हृद्यं स्वहृदि भगवतो भावयेद्भक्तियुक्तः ।
विद्युल्लोलाऽपि यस्मिन् सलिलघनघनश्यामले प्रेमवश्या
पश्यास्थेमसीमा कषदृषदि लसद्धेमलेखेव लक्ष्मीः ।२६

वक्ष इति—नगरिपोरिन्द्रस्य नगर्याममरावत्यां या नागर्यः वराप्सरसः तासां धीक्षोभे बुद्धिचापल्ये दक्षं वीक्षणमात्रेण सुराङ्गनानङ्गरसतरङ्ग-वर्द्धनम् एतच्च नारायणतपःसमये प्रसिद्धम् । तत्र पौराणिकी कथाऽनु-सन्धेया । यतः गरीयः सौन्दर्योद्गारेण विसृत्वरलोकोत्तर—लावण्याति-शयेन हृद्यं हृदयङ्गमं भगवतः षडैश्वर्यपरिपूर्णस्य "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इति स्मृतः" श्रीनारायणस्य वक्षः भक्तियुक्तः भक्तः जनः स्वहृदि भावयेत् । सलिलघनः सान्द्रतया जलपूर्णः घन इव श्यामले घनस्य सलिलसान्द्रत्वं नीलिमा-तिशयार्थम् । अस्मिन् वक्षसि विद्युदिव लोला चञ्चलापि लक्ष्मीः प्रेम्णा वश्या सती कषदृषदि निकषोपले लसन्ती कषणेन प्रकाशमाना हेम-लेखेव आमा प्राप्ता स्थेमसीमा स्थैर्यावधिर्यया सा नित्यं तत्र स्थितिरि-त्यर्थः आस्ते इति शेषः । पश्य अत्र लक्ष्म्याः स्थिरतासम्बन्धासनक्रियायाः दृशिक्रियाकर्मत्वम्, तेनैकवाक्यत्वम् । न तु आस्ते तां पश्य इति वाक्य-द्वयं, पश्य मृगो धावतीति-वत् । परमचञ्चलाया लक्ष्म्या निरवधि स्थिरतासम्पादकस्य श्रीभगवद्वक्षसः सुराङ्गनाक्षोभकत्वं किं वक्तव्यमिति कैमुत्येनार्थापत्तिर्व्यज्यते । अत्रोपमालंकारः ॥ २६ ॥

Digitized by srujanika@gmail.com

श्रीवत्साङ्कस्य वत्सं स्मरतु चिरतरं भ्रातरावब्धिपुत्रौ
बिभ्रद् यत्नेन रत्ने वरमणिरमणीवर्गयुग्मे प्रधाने ।
लक्ष्मीसम्भोगलक्ष्मस्तनयुगललसत्कुङ्कुमं कौस्तुभोऽस्याः
लज्जालोपाय यस्मिंस्तिरयति तरुणार्कांशुसंकाशभासा ।२७

श्रीवत्साङ्कस्येति—अब्धिपुत्रौ अतएव भ्रातरौ, भगिनी च भ्राता च भ्रातरौ तौ कथंभूतौ वरमणीनां श्रेष्ठरत्नानां रमणीनां स्त्रीणां वर्गयोः युग्मे प्रधाने त्रिलोकस्थिततद्द्वितीयस्य स्वद्वयातिरिक्त-प्राधान्याभावात् रत्ने श्रेष्ठवस्तुनी यत्नेन बिभ्रत् रत्नानां यत्नेन धारणावश्यंभावात् । श्रीवत्साङ्कस्य नारायणस्य वत्सं वक्षः 'उरो वत्सञ्च वक्षश्च' इत्यमरः । चिरतरम् अति दीर्घकालं सर्वदेतियावत्, स्मरतु । यस्मिन् वत्से कौस्तुभः मणिः लक्ष्मी-सम्भोगस्य लक्ष्म तच्चिह्नरूपं स्तनयुगले लसत् स्वस्मिन् संक्रान्तं कुङ्कुमं काश्मीरं तस्या लक्ष्म्याः लज्जालोपाय अपानाशाय तरुणार्को नवोदिता-दित्यः तत्सदृशा भासा कान्त्या तिरयति आच्छादयति । भगवद्वक्षः संक्रान्तं लक्ष्मीस्तनकुङ्कुमं कुङ्कुमसदृशेन स्वरोचिषाऽऽच्छाद्य कौस्तुभः स्वभगिन्या लक्ष्म्या उपकारं करोतीति सम्भोगचिह्नलोपहेतुत्वेन लक्ष्मीकौस्तुभ-धारणौचित्यमिति वस्तुव्यञ्जनं, तच्चानुप्राप्तरूपकसंकीर्णम् ॥२७॥

धौतं लावण्यनीरैः शिशिरमपि रमाश्वासमंज्ञैः समीरैः
सान्द्री-भूतेन्द्रनीलैः सपट्टिमघटितं कुट्टिमं स्निग्धमुग्धम् ।
ध्यातव्यं माधवोरः सुरतकुसुमनः-स्रक्स्फुरत्पुष्पतल्पे
यस्मिन्नानन्दनिद्रां भजति मुनिमनो विस्मृताशेषतापम् । २८

धौतमिति—लावण्यनीरैः धौतं क्षालितं रमायाः लक्ष्म्याः श्वास-नामभिः समीरैः पवनैः शिशिरं शीतलं, चार्थेऽपि शब्दः । सान्द्रीभूतेन्द्र-नीलैः घनीभूतनीलमणिभिः सपट्टिम-घटितं पट्टिम्ना शिल्पनैपुण्येन सह घटितं निर्मितं, स्निग्धं मुग्धं च तत्, विशेषणसमासः । ईदृशं माधवोरः माधवस्य लक्ष्मीपतेः श्रीनारायणस्य वक्षः कुट्टिमं मणिबद्धभूमिरिति ध्यातव्यम्, उरसः शयनयोग्यकुट्टिमसादृश्यात् सुरतकुसुमनसां

Digitized by srujanika@gmail.com

कल्पद्रुमकुसुमानां स्रज एव स्फुरत्तुराय्यं तल्पं शय्या यस्मिन् ईदृशे, यस्मिन् उरसि मुनिमनः विस्मृतः अशेषः सर्वः आध्यात्मिकादिस्तापो यस्मिन्निति क्रियाविशेषणम् आनन्दनिद्राम् आनन्दः स्मरणाजन्यः स एव निद्रा तां निद्रावत्सकलविषयविस्मारकमानन्दमित्यर्थः, तद्ध्यानस्य तथा त्वात् भजति । रूपकम् ॥२८॥

दुर्द्धर्षं वैरि-वर्गैर्विततमतिदृढं पुण्डरीकाक्षवक्षो
वीक्षेत ध्यानदृष्ट्याऽमरनगरमहाद्वाररक्षाकवाटम् ।
चित्रं तत्पार्श्वयोस्ता घनमपि घटिता अर्गला दोर्गणाख्या
गर्वेणानर्गलानां समिति दितिभुवां स्वर्गमार्गं दिशन्ति ।२९।

दुर्द्धर्षमिति—वैरिवर्गैः दैत्यादिभिः रिपुसमूहैः दुर्द्धर्षं धर्षितुमशक्यं तत्र हेतवः विततं विस्तीर्णम् अतिदृढम् अतिशयेन दृढं स्थूलं बलवद्वा । "दृढं स्थूलबलयो" रिति निपातनात्, एवं कपाटधर्मवत्त्वात् । अमर-नगरस्य अमरावत्याः यन्महत् द्वारं तस्य रक्षार्थं कपाटमिव स्थितं दैत्य-निग्रहेण भगवत आदित्यपरिपालनात् । ईदृशं पुण्डरीकाक्षवक्षः ध्यानदृष्ट्या वीक्षेत ध्यायेदित्यर्थः । तत्पार्श्वयोः उरः-कवाटपार्श्वयोः घनं सांगुलीनधर्मवत्वेन निविडं यथा तथा घटिताः स्वतः-सिद्धयो निर्मिताः, "सर्वे नित्याः शाश्वताश्चेति" भगवद्विग्रहस्य नित्यत्वस्मरणात्, अर्गलस्य पक्षे पिहितकवाटदार्ढ्यार्थं पश्चान्निविडतया संहिता अपि ताः प्रसिद्धाः दोर्गणाख्याः बाहुचतुष्टयनाम्न्यः अर्गलाः कवाटविष्कम्भक-दारूणि समिति युद्धे गर्वेण वीराहङ्कारेण अनर्गलानां अप्रतिबद्धवीर-पराक्रमाणां दितिभुवां दैत्यानां हिरण्यकशिपुप्रभृतीनां स्वर्गमार्गं स्वर्ग-वर्त्म मोक्षमार्गं च "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं अभिलाषो-पनीतञ्च तत्सुखं स्वः पदास्पद" मिति स्वर्गस्य सुखत्वेन स्मरणात् तत्सुखस्य च मुक्त्यपरपर्यायत्वात् । "तदंशोऽपि यथुः स्मरणात् । 'विमुक्तिरन्यथाः स्वरूपं यथु' रिति श्रीभागवतोक्तेः । "ये ये हताश्चक्रधरेण दैत्या स्ते ते गता व निलयं तदीय" मिति स्मृतेश्च दिशन्ति प्रयच्छन्ति । दिशन्त्यनेन मार्गपिधायकं यतः-कवाट मन्तरेण, भुजार्गलामार्गं दर्शय-न्तीति चित्रम् । अत्र रूपकानुप्रासयोः संकरः ॥२९॥

Digitized by srujanika@gmail.com

अथ "तान्त्रिकाः परिचर्य्यायां केवलस्य श्रियः पतेः । अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथैव मे" इति श्रीभागवते द्वादशस्कन्धोक्तेः कौस्तुभस्याकल्पत्वेन श्रीभगवदङ्गत्वात् त्रिभिः श्लोकैस्त्रिलोकदुर्लभशोभं कौस्तुभं वर्णयति ।

उद्यत्प्रद्योतनाभो मणिरुरसि लसन् पद्मनाभस्य भाव्यो
यद्दीप्त्यास्तिलुप्ता द्युतिरमरशिरोरत्नखद्योतराशेः ।
किम्वान्यद्दैन्यमागाददहमहदहर्दीपवत् यत्समीपे
जैत्रं नेत्रं स्फुटं धूर्जटिनिटिलतटे शोचनीयस्वशोचिः ।३०।

उद्यत्प्रद्योतन इति—उद्यन् यः प्रद्योतयतीति प्रद्योतनः सूर्य्यः उद्यत्प्रद्योतनशतनिभमिति नारायणस्य ध्यानलिङ्गात्, तस्येव आभा यस्य सः । पद्मनाभस्य नारायणस्य उरसि वक्षसि लसन् शोभमानः एतेनोरस आकाशत्वं ध्वनितम् । मणिः कौस्तुभः वक्षसि मणिसत्त्वेऽपि तद्‌तिरिक्तवर्णमानगुणविशिष्टमणेरभावात् । भाव्यो ध्येयः । तस्य सूर्य्यसाधर्म्यं प्रस्तौति; कीदृशः अमरशिरोरत्नखद्योतराशेः देवनिकरशिरस्थमुकुटघटितमणिश्रेणि—ज्योतिरिङ्गणगणस्य द्युतिः शोभा, यस्य दीप्त्यास्तया तेजः-प्रसरणेन लुप्ता अस्तङ्गता भवतीति शेषः; अन्यत् किम्वा इतरेषां तेजसां वैरूप्यं किं वक्तव्यं; यस्य मणेः समीपे धूर्जटेः शिवस्य निटिलतटे ललाटपट्टे स्फुटं प्रकाशमानं जैत्रं प्रलयसमये त्रिभुवनदहनक्षमं नेत्रं दहनात्मकं तृतीयं चक्षुः अहर्दीपवत् शोचनीयं जगद्दाहकस्यास्य ईदृशी दशा जातेति शोच्यं स्वशोचिः स्वप्रकाशो यस्य तत्, यद्वा सुष्ठु अशोचिः शोचिरभावो यस्येति; एवं सत् महदैन्यमगात्प्रापत् । अहह खेदे कौस्तुभस्य व्यपदेशेन "स्वात्मज्योतिर्बिभर्त्त्यज" इति श्रीभागवतोक्तेः स्वात्मज्योतिः शुद्धचैतन्यमिति व्याख्यातम्; तस्य भासा सर्वमिदं विभातीति श्रुतेश्च । तस्मात् कौस्तुभस्य श्रीभगवत्तेजस्त्वेन सर्वतेजोभिभावकत्वं युक्तमिति भावः ॥ ३० ॥

Digitized by srujanika@gmail.com

उद्यन्तं भानुमन्तं जननयनमुदे कौस्तुभाख्यं वहन्तं
तद्वक्षो-व्योमभाजं भजतु निजहृदा पद्मरागाधिराजम् ।
तेजोजालानि बालातपपटलयता दिङ्मुखालोकहेतो-
र्येन क्षीरोदशायी हरिरधिशयितोऽभ्यसृक्सिन्धुमध्यम् ।

उद्यन्तमिति—जननयनानां मुदे प्रीत्यै आह्लादनायेत्यर्थः । कौस्तुभ इति आख्यां नामतां वहन्तं कौस्तुभस्य भगवत्तेजस्त्वेनाऽऽह्लादकत्वात् । परमार्थतः सूर्यमित्यर्थः । अतएव तद्वक्षः नारायणवक्ष एव व्योमा-काशं तद्भजतीति तं, पद्मरागाधिराजं पद्मरागाणां मणिविशेषाणां मध्ये अधिराजं परमश्रेष्ठं कौस्तुभस्य पद्मरागत्वं श्रीभागवते कथितम्; 'कौस्तुभाख्य मभूद्रत्नं पद्मरागं महोदधे' रिति । सूर्यपक्षे पद्मानां रागस्य विकशनेनाऽरुणिम्नः । अधिकं राजः प्रकाशो यस्मात्तं, राजृधातोर्घञर्थे कप्रत्ययः । उद्यन्तं प्रकाशमानं उदितञ्च भानुमन्तं प्रसरत्किरणं सूर्यंच निजहृदा भजतु भक्त इति शेषः । दिङ्मुखानां आलोकहेतोः प्रकाश-नार्थं सूर्यधर्मत्वात् । तेजो-जालानि किरणगणान् बालातपपटलयता बालातपसमूहं कुर्वता "तत्करोति तदाचष्टे" इति णिच् । येन कौस्तु-भेन क्षीरोदशायी हरिः नारायणः असृक्-सिन्धुमध्यम् अधिशयितः इति स्वमिति शेषः । अवाधि ज्ञातवान् "दीपजनबुधेति लुङि चिण् । "अधिशीङ् स्थासा" मिति कर्मत्वं, क्षीरसिन्धोः स्वगुणत्यागेन परगुणग्रहणात् तद्गुणालङ्कार. । स चानुप्रासस‌ंकीर्णः ॥ ३१ ॥

श्रीविष्णोः कृष्णकान्त्या मरकतहरिणीं स्वर्णवर्णां स्वमूर्त्तिं
भर्त्तुर्वक्षःस्थलस्था त्विनिरिति विदती श्रीर्यदन्तः-स्फुरन्तीम् ।
रुष्टा तुष्टा च तस्यामरुणरुचिरुषा वर्णसाम्याहृतायाम्
छव्या नव्यार्कमित्रं मणिरियममला ध्यायतामायतास्थैः ।३२।

श्रीविष्णोरिति—श्री लक्ष्मीः श्रीविष्णोः नारायणस्य कृष्णया श्यामया कान्त्या मरकतमिव हरिणीं हरिद्वर्णां "वर्णादनुदात्तात्तोपधात्तो नः" इति ङीप् तकारस्य नकारः । 'रषाभ्यां नोणः' इति णत्वं च । यदन्तः यस्य नारायणस्य अन्तः वक्षोमध्ये स्फुरन्तीं प्रतिबिम्बितां वक्षसः स्वच्छत्वात्

Digitized by srujanika@gmail.com

प्रतिबिम्ब स्वर्णवर्णामपि स्वमूर्त्ति भर्त्तुः पत्युः वक्षःस्थलस्था क्षितिरिति विदती जानती सती रुष्टा, तस्यां स्वप्रतिबिम्बमूर्त्तौ स्वोत्पन्नक्रोधारुणेन अरुणरुचिमत्यां मणेः कौस्तुभस्य वर्णसाम्येन शोणरुचित्वसादृश्येन आवृतायामाच्छादितायां सत्यां तुष्टा च मम क्रोधं ज्ञात्वा क्षितिर्भर्त्तुर्हृदयात् पलायिता इतिमत्वेति भावः । रुच्या कान्त्या नव्यार्कमित्रं नवोदितसूर्य्यसदृशी अमला निर्मला इयं मणिः कौस्तुभाख्या आमृताऽस्थैः परमादरयुक्तैःध्यायतां चिन्त्यतां ध्यै धातोः कर्मणि लोट् । मणेः स्त्रीत्वेन यथा लोके काचित्सखी स्वसख्याः मानेर्ष्याद्युत्पत्ति येन केनचिदुपायेन निवर्त्तयति तद्वदिति वस्तु व्यज्यते । तद्गुणालङ्कारः ॥ ३२ ॥

अत्र त्रिभि श्लोकैः त्रिगुणोत्तमसत्त्वगुणात्मकं श्रीवत्सं वर्णयति—

अर्केन्द्वक्षस्य वक्षस्यधिगतसुषमं श्याम-रोमालि-मौलौ
श्रीवत्सं वत्सलात्मा स्मरतु धवलिम-स्मेर रोमाङ्कुराङ्कम् ।
यं केलीबालवीरुच्छिरसि विकसितं दोहदस्य प्रदानात्
दर्शं दर्शं प्रसूनस्तबकमिव नवं मोदते पद्मसद्मा ॥ ३३ ॥

अर्केन्दू अक्षिणी यस्य तस्य श्रीनारायणस्य "इन्दुशब्दस्य घ्यन्तत्वेन पूर्वनिपाते प्राप्ते अर्कस्याभ्यर्हितत्वात् पूर्वनिपातः" श्यामरोमालिमौलौ तदग्रदेशे वक्षसि अधिगतसुषमं प्राप्तशोभोत्कर्षं धवलिमस्मेररोमाङ्कुराङ्कं धवलिम्ना स्मेरा श्व ये रोमाङ्कुरास्तदभिन्नाङ्करूपं श्रीवत्सं शुक्लरोमावर्तमयं श्रीभगवदसाधारणलक्षणं वत्सलात्मा वत्सले भक्तवत्सले भगवति आत्मा मनो यस्य स भक्तः यद्वा वत्सं वक्षः, स्मरणीयत्वेन लाति आदत्ते स्मरतीति यावत् वक्षःस्मरणेन श्रीवत्स स्मरणस्यावश्यकत्वात्, ईदृशः भक्तः स्मरतु । पद्मसद्मा लक्ष्मीः "डाबुभाभ्यामन्यतरस्याम्" मिति विकल्पेन डाप् । यं श्रीवत्सं दोहदस्य प्रदानात्, तत्प्रयोगेण दोहददानेनाऽकाले तरुवीरुदादयो नवफलपुष्पादिकं धारयन्तीति प्रसिद्धिः । केलिबालवीरुच्छिरसि क्रीडालताग्रे बालत्वं चानुत्पन्नपुष्पफलत्वं विकसितं नवप्रसूनस्तवकमिव दर्शं दर्शं कौतुकेन पुनर्दृष्ट्वा मोदते, इयं रोमालिबाललता महादोहददानेन

Digitized by srujanika@gmail.com

श्रीवत्सपुष्पगुच्छं धारयति किमिति लक्ष्मीः पुनः पुनर्दृष्ट्वा नन्दते इत्यर्थः । अत्र रूपकोत्थापितोत्प्रेक्षा ॥३३॥

कुर्वत्पाथोदमाथोद्यमसमयपयःफेनसम्पर्कतर्कं
तादृक् पीताम्बरोरोऽम्बरचरशरदच्छोदभृच्छेदलक्ष्यम् ।
चिन्त्यं श्रीवत्सचिह्नं चिरमुरसि कृतं रक्षणाय प्रजानां
जाने श्रीजानिना यद्गुणमतिगुणितं सात्वतैः सत्त्वसंज्ञम् ।

कुर्वदिति—पाथोधेः क्षीरसमुद्रस्य माथोद्यमसमये मथनारम्भकाले यः पयःफेनस्य क्षीरफेनस्य सम्पर्कः लगनं तत् कुर्वत् तादृक् स्वसदृशं यत्पीताम्बरस्य श्रीनारायणस्य उरः वक्षः तदेवाम्बरमाकाशं तत्र चरतीति चरः तद्गतः; शरदा हेतुभूतया अच्छः निर्जलत्वात् यः उदभृच्छेदः मेघखण्डः तद्वत् लक्ष्यं लक्षणीयं तर्कमित्यर्थः । ईदृशं श्रीवत्सं चिह्नं चिन्त्यम् । श्रीजानिना लक्ष्मीकान्तेन प्रजानां रक्षणाय चिरम् उरसिकृतं सात्वतैः वैष्णवैः अतिगुणितं बहुगुणितं सत्त्वसंज्ञं सत्त्वाख्यं गुणं यत्-चिह्नं जाने तर्कयामि "नेदं श्रीवत्सचिह्नं प्रजापालनाय भगवता हृदये धृतं सत्त्वगुणमिति जाने इति भावः, सत्त्वगुणस्य शुक्लत्वात् पालनहेतुत्वाच्च । अत्र " अजामेकां लोहितशुक्लकृष्णा " मिति श्रुतिः ।— "सत्वं रजस्तमइति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञा " इति श्रीभागवते च । अत्र वस्तूत्प्रेक्षाफलोत्प्रेक्षयोः संकरः ॥ ३४ ॥

भावं भावं स्वचेतःकुमुदमुदुदयोदीर्णसोमावदातो
रोमावर्त्तोऽसुरारेरुरसि-चर-रमा हासहृद्योऽनुमोद्यः ।
लावण्याम्भोनिधौ तद्वपुषि विपुषितोत्फेनिलावर्त्तमूर्त्ता
न प्रत्यावर्त्तनाय प्रभवति पतितं यत्र नेत्रं मुनीनाम् । ३५ ।

भावं भावमिति :—उरसिचररमाहासहृद्यः वक्षःस्थललावण्यलक्ष्मीहाससदृशतया हृदयङ्गमः स्वेषां भक्तानां चेत एव कुमुदं तस्य

Digitized by srujanika@gmail.com

मुदुदयाय आनन्दोदयाय आनन्दोत्पादनाय उदीतो यः सोमः तद्वदवदातः शुभ्रः सोमस्य कुमुदानन्दोत्पादनवत् श्रीवत्सस्य भक्तहृदयाह्लादकत्वम्। असुरारेः श्रीनारायणस्य रोमावर्त्तः आवर्त्तरूपो रोमसमूहः भावं भावं पुनः पुनर्भावयित्वा अनुमोद्यः अहो मम भाग्यं मदीयमनःकैरवप्रमोदकृते उदितोऽयं चन्द्र इति श्लाघयेत्। लावण्याम्भोनिधौ तद्वपुषि भगवद्गात्रे विपुषितः पृथुलः उत्फेनिलः फेनयुक्तः। यः आवर्तः जलभ्रमः तद्वन्मूर्त्तिः स्वरूपं यस्य तस्मिन्। यत्र श्रीवत्से पतितं मुनीनां मननशीलानां नेत्रं प्रत्यावर्त्तनाय तस्मान्निवर्त्तनाय न प्रभवति न शक्नोति। यथा आवर्त्ते पतितं वस्तु भ्रमति। ततो न निष्क्रामति तद्वदितिभावः। रूपकालङ्कारः॥ ३५॥

अथ षड्भिः श्लोकैः भावुकजुष्टकौशिकशरीरभारसम्पादकान् बाहून् वर्णयति :—

आजानाजानुलम्बाञ्छ्रुतिपथपथिकज्ञानवृद्धावलम्बान्
राहुद्विड् बाहुदण्डान्कलयतु चतुरः कृत्तपाषण्डदण्डान्
यानुज्झित्वा विवादं विषयविषरसोदन्यया धावितानां
संरोधार्थं गवामाश्रयति यतिजनः सत्रिदण्डैकदण्डः॥३६॥

आजानेति—आजानेन स्वभावेन जानुनी अभिव्याप्य लम्बन्त इति आजानाजानुलम्बास्तान् श्रुतिपथो वेदमार्गः तस्मिन् पथिकानां वेदतत्त्वविदामित्यर्थः। ज्ञानवृद्धानाम् अवलम्बान् आलम्बनान् वृद्धा दण्डमालम्ब्यमार्गे प्रयान्तीति प्रसिद्धम्। कृत्तपाषण्डदण्डान् पाषण्डाः पाषण्डस्वरूपाः। 'अत्र न्यायेन एकदेशानुवर्त्तीस्वीकारः' राक्षसाः असुराः पापस्य षण्डानि "षण्डं लिङ्गमिहोच्यते" इति श्रीभागवतोक्तेः। तेषां दण्डदायकान् चतुरः राहुद्विषः तच्छिरश्छेदकस्य श्रीनारायणस्य बाहवः एव दण्डास्तान् कलयतु भजतु 'कलिधातोरनेकार्थत्वात्'। सत्रिदण्डैकदण्डः त्रिविधा दण्डास्त्रिदण्डाः। एकोदण्डश्च तैः सह वर्त्तमानः त्रिदण्डा इति मध्यपदलोपी समासः। अन्यथा समाहारे ङीप् प्राप्त्या त्रिदण्डीति स्यात्। एवंभूतो यतिजनः जातावेकवचनम्। स त्रिदण्डः सैकदण्ड इत्यर्थः। विवादं बहुप्राप्त्यल्पप्राप्तिरूपम्। त्रिदण्डिनो बाहु-

Digitized by srujanika@gmail.com

दण्डत्रयग्रहणात् एकदण्डस्य एकबाहुदण्डग्रहणात् । स्वस्वदण्डानुरूपेण बाहुदण्डग्रहणस्यौचित्यात् । यद्वा त्रिदण्डिनो रामानुजानुयायिनः चिदचिद्विशिष्ट श्रीनारायणस्याद्वैतं मन्यन्ते वस्तुतस्तु अद्वैतमेव । एकदण्डिनः शङ्करानुयायिनः निराकारनिर्धर्मकस्य ब्रह्मणः अद्वैतं मन्यन्ते । तेषां साकारनिराकारस्वरूपात् द्वैतत्वे कलहः । ग्रन्थविस्तरभयादेतत्प्रपञ्चो न लिखितः । उज्झित्वा त्यक्त्वा विषया एव विषरसाः परिपाके दुःखदातृत्वात् "परिपाके विषमिवेति" गीतोक्तेः । तेषु या उद्गन्धा तृष्णा तया हेतुभुतया धावितानां शीघ्रं गच्छन्तीनां धावः शीघ्रगः । गवाम् इन्द्रियाणां धेनूनाञ्चसंरोधार्थं गा विषय-विषरसेभ्यः संरोद्धुं निवर्त्तयितुमित्यर्थः । यान आश्रयति भजते । मौनानीहानिलायाम—वाग्देहमनसामिमे । त्रयो दण्डाः सदा धार्य्या वेणुभिर्नभवेद् यतिरति स्मृतिः । दण्डिनो दण्डस्य गवादिनिवारणार्थत्वात् । एतेन यतिजनस्य पाशुपाल्योत्प्रेक्षा ध्वनिः स्मात्र रूपकोत्थापिता ।३६।

कस्तूरीकर्द्दमं श्रीकुचकलशपरीरम्भसंरम्भलग्नम्
मग्नं सान्द्रेन्द्रनीलद्युति जयिनिजरुङ्निर्भरे निह्नुवानान्
ध्यायेद्दोष्णोऽथ विष्णोर्मधुकरनिकरैर्वर्णगन्धेन दूरा-
दाकृष्टैः सन्निकृष्टैः पुनरनधिगतो हन्त यद्वर्णगन्धः ।३७।

कस्तूरीति—अथ श्रीवत्सध्यानान्तरं, मङ्गलं वा अथ शब्दस्य मङ्गलार्थत्वात् । विष्णोः श्रीनारायणस्य श्रियः लक्ष्म्याः कुचकलशपरीरम्भे स्तनकुम्भालिङ्गने "उपसर्गस्य घञ्यमनुष्ये बहुलमिति" दीर्घः । संभ्रमेण त्वरया लग्नं त्वरितस्य पङ्कादिसंसर्गाऽविचारात् । सान्द्रेन्द्रनीलद्युतिजयिनीनां निजरुचां निर्भरे प्रवाहे मग्नं कस्तूरीकर्द्दमं लक्ष्मीस्तनाङ्गरागरूपं निह्नुवानान् आच्छादयतः दोष्णः बाहून् ध्यायेत् । वर्णगन्धेन वर्णानुरूपेण सौरभेण वर्णलेशेन वा नीलोत्पलबुद्ध्या दूरात् आकृष्टैः अतएव सन्निकृष्टैः मधुकरनिकरैः यद्वर्णगन्धःयेषां वर्णानुरूपो गन्धः सौरभ्यं, यत्कान्तिलेशश्च पुनर्नाधिगतः प्राप्तः हन्त खेदे वर्णगन्धाकृष्टानां भ्रमराणां सन्निकर्षेपि वर्णगन्धाप्राप्तया विरोधालङ्कारः । वस्तुतस्तु भगवद्वाहुवर्णनस्य स्निग्धत्वसौकुमार्याद्यतिशयेन रूक्षाणां भ्रमराणां तदलाभ इति भावः ।३७।

Digitized by srujanika@gmail.com

सानन्दं मन्दराद्रेः क्षितियुवतिकुचोत्तुङ्ग मालिङ्गय शृङ्गं
नानाधात्वङ्गरागच्छुरणशबलिताः शूरशृङ्गारिवेशम् ।
रोमाञ्चैर्निर्विशेषं व्यदधुरुदधिजोद्वाहकाले पुरा ये
तान् भूषाभोगभाजो भुजगशयभुजान् भावना-
भिर्भजेत । ३८ ।

सानन्दमिति :—ये भुजाः पुरा समुद्रमथनसमये क्षितियुवति-कुचोत्तुङ्गं महीमहिलास्तनोन्नतं मन्दराद्रेः शृङ्गं शिखरं सानन्दम् आलिङ्गय नानाधातवः गैरिकादयः एवाङ्गरागाः चन्दनाद्यनुलेपनद्रव्याणि तेषां छुरणेन संसर्गेण शबलिताः चित्रिताः उदधिजायाः लक्ष्म्याः उद्वाहकाले विवाहसमये शूरशृङ्गारिवेशं शूरस्य वेशं समुद्रमथनोपयोगिकं शृङ्गारिणः कामुकस्य वेशं लक्ष्मीसम्भोगोपयोगिकं रोमाञ्चैः जलधिमथनोत्साहजनितैः निर्विशेषं शूरशृङ्गारिसाधारणं रोमाञ्चस्य वीरशृङ्गारोभयरससाधारणत्वात् व्यदधुः । भूषाणामाभोगम् अतिशयं भजतः तान् भुजगशयभुजान् शेषशायिनः श्रीनारायणस्य बाहून् भावनाभिः ध्यानपौनःपुन्येन भजेत । रूपकोत्थापितरसवदलङ्कारः । ३८ ।

निष्कम्पं कैटभस्याप्यतिविकटभुजान् वज्रगाढप्रहारान्
सोढारो भूयसोऽब्दान् त्रिभुवनभवनस्तम्भसम्भावनार्हाः
पर्य्यासं पारिहार्य्याङ्गदमयवलयै रत्नकीलानुविद्धैः
दार्ढ्याढ्यं भावुकास्ते दनुजमदभिदो बाहवो भावनीयाः ३९

निष्कम्पमिति—कैटभस्य तन्नाम्नोऽसुरस्य अति विकटाः भयङ्कराः ये भुजाः वज्रगाढप्रहाराः दोःस्तम्भदम्भोलिनिर्भरपाताः, तान् निष्कम्पं चलनशून्यं यथातथा भूयसोऽब्दान् बहुसंवत्सरान् अत्यन्त-संयोगे द्वितीया । "युयुधे भगवान् हरिः । पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः" इतिमार्कण्डेयपुराणात् । सोढारः सहमानाः त्रिभुवनमेव भवनं तदवष्टम्भस्तम्भा इति या सम्भावना उत्प्रेक्षा तामर्हन्तीति तद्योग्याः । त्रिभुवनरक्षकत्वात् रत्नानां कीलाः ज्वालाः त एव कीलाः

Digitized by srujanika@gmail.com

शङ्कवः तैरनुविद्धैः दार्ढ्यार्थं विन्यस्तैः, पारिहार्य्याः करभूषणानि अङ्गदानि बाहुभूषणानि तन्मयानि तद्रूपाणि वलयानि तैः स्तम्भानामतिदृढत्वार्थं निर्मितैः लोहपट्टैः पर्य्याप्तं यथेष्टं दार्ढ्येनाढ्यं भावुकाः दार्ढ्यसम्पन्नाः दनुजमदभिदः दैत्यारेः नारायणस्य बाहवः भावनीयाः । अत्र भुजेषु स्तम्भत्वारोपणेन रूपकोत्प्रेक्षयोः संकरः ॥३९॥

दिक्पालानां वरेण्यं वपुरसुरवधे दीक्षितान् क्षत्रियाणां
जन्मक्षेत्राणि बाहून् हृदि वहतु बहूकृत्य भृत्यप्रियस्य ।
लोकानां पालनार्थे नियममुपयतां शात्रवत्रासकानां
ज्ञातं राज्ञां स्वकीयप्रभवगुणभवो लोकपालानुभावः ॥४०॥

दिक्पलानामिति—दिक्पालानां इन्द्रादीनां वरेण्यं वपुः, श्रेष्ठं शरीरम् इन्द्रादीनां पराजयेऽपि स्वकारणभुजीनां पराजयाभावाद् वरेण्यत्वं "इन्द्राद्यो बाहव आहुरुस्रा" इति भागवतोक्तेः । असुरवधे दैत्यहनन रूपयज्ञे दीक्षितान् सञ्जातदीक्षान्, दीक्षितस्य प्रतिवर्षं पश्वालम्भनवद् बाहूनां दैत्यवधावश्यम्भावात् क्षत्रियाणां जन्मक्षेत्राणि "बाहू राजन्यः कृतः" इति श्रुतेः, भृत्यप्रियस्य भक्तवत्सलस्य श्रीनारायणस्य बाहून् बहूकृत्य सत्कृत्य हृदि वहतु । पूजापूर्वकं भावयेत् इत्यर्थः । लोकानां पालनार्थे रक्षणार्थं नियममुपयतां प्राप्तवतां "राज्ञो हि परमो धर्मः प्रजापालनमुत्तम" मिति स्मृतेः । शात्रवत्रासकानां शत्रुभयजनकानां "दस्युशात्रवशात्रव" इत्यमरः । राज्ञां लोकपालानुभावः लोकपालनरूपः प्रभावः स्वप्रभवः स्वकारणं बाहवः तद्गुणः दुष्टनिग्रहशिष्टपालन रूपः तज्जन्य इति ज्ञातः कारणगुणाः कार्य्ये संक्रमन्तीति न्यायात् । यद्वा—"अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृपः ।" इति स्मृतितः । लोकपालानुभावः लोकपालानाम् इन्द्रादीनामनुभावः । ऐश्वर्यतेजोदण्डधरत्वादिः स्वप्रभवगुणभवः स्वसमानकारणगुणजन्यः यथा लोके एकक्षेत्रजानां शस्यानां समानगुणत्वं तद्वदितिभावः इति ज्ञातम् । अत्रोत्प्रेक्षाऽलंकारः ॥४०॥

Digitized by srujanika@gmail.com

दृप्यद्दुर्दान्तदैत्यर्षभदमनसहं भूरिभारातुराया
स्तदवद्विश्वम्भराया द्रढिमबलमवष्टम्भयोग्यं दधानान् ।
ध्यायेद् योगर्द्धिसिद्ध्यै त्रियुगभुजयुगान् सांयुगीनारिहन्तुः
किंवा कालात्मनोऽस्यावयवयुगयुग द्वन्द्व रूपानुरूपान् ।४१।

दृप्यद्दुर्दान्त इति—दृप्यतां दृप्तानां दुर्दान्तानां दुर्दमानां दैत्या एव ऋषभाः वृषास्तेषां दमनसहं बलहान्या पुनःपुनर्बन्धनेन च शिक्षाप्रदं युगानां दुष्टबलीवर्द्ददमनकारकत्वात् तद्वत् । यथा दमनसहत्वं तथा महाभारवहनसहत्वञ्च । भूरिभारातुरायाः दुष्टदैत्यभारखिन्नायाः विश्वम्भरायाः पृथिव्याः अवष्टम्भयोग्यं अवलम्बनयोग्यं द्रढिमा दार्ढ्यं तद्रूपं बलं दधानान् युगानामतिशयभारवहनक्षमत्वात् । त्रियुगभुजयुगान् त्रियुगः सत्यादियुगत्रये नानावतारैः प्रकाशमानः श्रीनारायणः तस्य कृष्णः "कलौ यदभवस्त्रियुगोऽथ सत्यं" श्रीभागवतोक्तेः । यद्वा त्रीणि युगानि ऐश्वर्यादीनि षट् यस्य; ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इति स्मृतः इति स्मरणात् । भगवतः भुजा एव युगा रथशकटादिकर्षणार्थं अश्वबलीवर्द्दादिस्कन्ध वाह्यानि स्थूलवृत्तनिर्मितकाष्ठानि तान् योगर्द्धिसिद्ध्यै समाधिसम्पत्ति जन्यसिद्धिप्राप्तये ध्यायेत् । किं वा पक्षान्तरेण सांयुगीनारिहन्तुः रणसाधुशत्रुहन्तुः अतएव तेषां कालात्मनः यमवत् संहारकस्य "कालोऽस्मि लोकक्षयकृत् प्रवृद्ध इति गीतोक्तेः । स्वतः कालात्मनः श्यामस्वरूपस्य मासानां मार्गशीर्षोऽस्मि ऋतूनां कुसुमाकर इति मासर्त्तुसमष्टिपरार्द्धाभिन्नकालस्वरूपस्य अस्य नारायणस्य अवयवरूपाणां युगानां स यप्रभृतीनां युगद्वन्द्वं युगयुग्मं चतुष्टयं तद्रूपस्य तत् स्वरूपस्य अनुरूपान् कालावयविनो भगवतः स्वावयवभूतसत्यादि युगचतुष्टयरूपानितिभावः भुजान् ध्यायेदित्यन्वयः। रूपकालंकार ।।४१।।

अथ द्वाभ्यां द्विगुणसौन्दर्य्याकरान् करान वर्णयति ।

दोर्वृन्देन्दीवरस्रक्चयचरमचराम्भोजचातुर्य्यभाजां
ध्यायेच्चातुर्भुजानां विधिनिटिललिपेरुत्किराणां कराणाम् ।
दमालम्भाश्चारुणारुत्मनकनकघटाटोपवत्सु स्तनेषु
न्यस्ता ये भद्रकुम्भोपरि परिविलसत्पल्लवत्वं लभन्ते ।४२।

Digitized by srujanika@gmail.com

दोर्वृन्देति—दोर्वृन्दमेव इन्दीवरस्रक्चयः नीलोत्पलमालाकुलं तस्य चरमचराणां अन्तिमभागभाजाम् अम्भोजानां यश्चातुर्य्यं विन्यासकौशलं तद्भजतीति तेषां मालाकाराः समानवर्णपुष्पैर्मालां ग्रथ्नन्ति तत्र तदितरवर्णपुष्पगुच्छं मूले विन्यस्यन्तीति लोके प्रसिद्धिः । विधिनिटिललिपेः तादृशैश्वर्य्यव्यञ्जकललाटाक्षरपङ्क्त्याः उत्किराणां उट्टङ्कनकर्तॄणां चराचरसत्त्वसत्ललाटलिपिलेखकस्य चतुर्मुखस्य परमेष्ठित्वसूचकनिटिलाक्षरविन्यासाक्षरचणानां चातुर्भुजानां चतुर्भुजस्य नारायणस्य सम्बन्धिनां युगपच्चतुर्मुखललाटलिपिलेखनसामर्थ्य-व्यञ्जनाच्चातुर्भुजानामिति परिकरालङ्कारः । कराणां ध्यायेत्, करान् इत्यर्थः । स्मृत्यर्थत्वात् कर्मणि षष्ठी । इमालक्ष्म्योः क्षिति-रमादेव्योः श्यामपीतवर्णत्वात् चारूणां गारुत्मतकनकघटानां चनुर्णां यः आटोपः आरम्भः तद्भवत्सु तद्भवघटसदृशेषु स्तनेषु न्यस्ताः सम्भोग समये निहिताः ये कराः भद्रकुम्भोपरि पूर्णकुम्भोपरि सर्वतः विलसत् शोभमानं यत्पल्लवत्वं तल्लभन्ते । त्रिजगन्मङ्गलसम्पादकक्ष्मालक्ष्मीकुच-कुम्भपल्लवभावं वहन्तीति भावः । परिकरालंकारः ॥४२॥

कर्त्तुं मुक्तीश्चतस्रः स्वरुचिसमुचितं योगिसाद्यौगपद्ये
नोद्यच्छन्तः पुमर्थोपणि कविपणयः पाणयोऽजस्य भाव्याः।
यैर्मुष्टौ मुष्टिकृद्भिरपि युधि मधुना कैटभेनाऽपि सार्द्धं
ताभ्यां स्रष्टुः शिरोभ्यो वितरितुमभयं बद्धमुष्टित्व-
मौज्झि ।४३।

कर्त्तुमिति—चतस्रः मुक्तीः सालोक्यसार्ष्टिसामीप्यसारूप्याः । सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः । इति मुक्तेः प्राञ्चविध्यं श्रीभागवतोक्तम् ।

तत्र एकत्वस्य सायुज्यमुक्तेः भक्तैरनादराच्चतस्र इत्युक्तम् । स्वरुचेः स्वाभिलाषस्य समुचितं यथातथा भक्तश्रद्धानुरूपं, योगिसात् योगीनाम-धीनाः कर्त्तुं यौगपद्येन एकदा उद्यच्छन्तः उद्यताः पाणीनां चातूरूप्यात्

Digitized by srujanika@gmail.com

पुमर्थानां धर्मार्थकाममोक्षाणामापणिकानां विपणय: पण्यवीथय: भक्ति-मूल्येन धर्मादिपण्यविक्रयस्थानानि अजस्य श्रीनारायणस्य पाणयः कराः भाव्याःचिन्त्याः । युधि युद्धे मधुना कैटभेनाऽपि सार्द्धं ताभ्यां सह मुष्टी-मुष्टिरुष्टैः मुष्टिप्रहारयुद्धप्रवृत्तिकुपितैः यैः पाणिभिः ताभ्यां मधु कैटभाभ्यां सकाशात् स्रष्टुः ब्रह्मणः शिरोभ्यः अभयं मधुकैटभाऽपादानक-भयाभावं वितरितुं दातुं बद्धमुष्टित्वम् औज्झि त्यक्तम् । मधुकैटभयुद्धे बद्धमुष्टयोऽपि ब्रह्माभयदाने सरला बभूवुरितिभावः । मुष्टिबन्धनसमये मुष्टित्यागः कृत इति विरोधः ॥४३॥

अथैकेन श्लोकेन सुषमाद्वैतभाजामङ्गुलीनां वर्णनमारभते :—

आबद्धायानधोऽधो भृशमनिशमपां रत्नरोचिर्मयीनां
पूर्णा स्वर्णालवालावलिरिव कलिता भार्मणी
सोर्मिकाली ।
विद्वत्पूज्यस्य रज्यन्नखमृदुलदलानङ्गुलीभङ्गियुक्ता-
नारक्तान् भक्तवाञ्छाघटनसुरविटप्यङ्कुरान्
संस्मरेत् तान् ।४४।

आबद्धेति—यानधोऽधः 'आम्रेडिताधःशब्दयोगे द्वितीया' । आबद्धा अनिशं रत्नरोचिर्मयीनाम् अङ्गुलीयकखचितमणिकिरणरूपाणामपां भृशं पूर्णा पूर्णयोगे "शेषे-षष्ठी" भार्मणी भर्म स्वर्णम् तत्सम्बन्धिनी सा प्रसिद्धा ऊर्मिकाली अङ्गुलीयकश्रेणी स्वर्णालवालावलिरिव हाटकालवालधाटिकेव कलिता गृहीता । रज्यन्तो रक्ता नखा एव मृदुलानि कोमलानि दलानि येषां तान् । अङ्गुलीनां भङ्ग्या प्रकारेण युक्तान् अङ्गुलिरूपेण प्रतीयमानानित्यर्थः । आरक्तान् विद्वत्-पूज्यस्य श्रुति-स्मृति-सकल-शास्त्रैश्चपूजनीयस्य श्रीनारायणस्य तान् प्रसिद्धान् भक्तानां वाञ्छाः धर्मार्थ-काममोक्षभक्तयः तद्घटकान् तत्सम्पादनार्थं पञ्चधोत्पन्नान् सुरविटप्यङ्कुरान् सुराएव विटपाः शाखाविस्तारा विद्यन्ते यस्य सः सुरविटपी नारायणः स एव कल्पद्रुमः तस्याङ्कुरान् "इन्द्रादयो बाहव आहुरुस्रा" इति, "पर्यस्तदोर्दण्डसहस्रशाख"—मिति च श्रीभागवते । श्रीभगवद्भुजशाखाणां देवरूपत्वात् सुरविटपित्वं तस्य

Digitized by srujanika@gmail.com

सङ्गतम् । तस्याङ्गुलि-रूपानङ्कुरान् संस्मरेत् । अत्र भगवदङ्गुलिषु कल्पद्रुमाङ्कुरारोपणात् ऊर्मिकादि—प्रवालबालादिरूपणाच्च सावयवरूपकालङ्कारः ॥४४॥

अथ दशभिः श्लोकैः दशदिग्भयहरणानां चक्रादिप्रहरणानां वर्णनमारभते :—

कम्बुश्चक्रञ्च पाथोरुहमथ च गदा तेषु चिन्त्यानि कान्ता-
कम्बुग्रीवानितम्बाननपृथुलतरोरुप्रकाण्डाकृतीनि ।
जानीमः पान्यजस्रं निजकर-कमलैस्तत्तदङ्ग प्रियाया—
श्चित्तासङ्गं दधानः कलयति कमलाकामुकः कामतातः ।४५।

कम्बुश्चक्रमिति—तेषु पूर्ववर्णितेषु कम्बुः पाञ्चजन्यं चक्रं सुदर्शनम् अथ पाथोरुहं लीलापद्मं गदा च कौमोदकी समुच्चयार्थं चकारद्वयम् । कान्तायाः श्रीदेव्याः कम्बु-ग्रीवा च त्रिरेखा कण्ठनाला, नितम्बश्च कटि-पश्चाद्भागः, आननं च मुखं, पृथुलतरोरु-प्रकाण्डश्च अतिशयेन पृथुः ऊरुरेव प्रकाण्डः प्रकाण्ड-सदृशः, ऊरुः सक्थि, तेषामाकृतिरिव आकृतिर्येषां तानि, कम्बु-सादृश्यं ग्रीवायाः, चक्र-सादृश्यं नितम्बस्य, पद्मसादृश्यं मुखस्य, गदा सादृश्यम् ऊरोः, एवं क्रमेण ग्रीवादिसादृश्यवन्ति कम्ब्वादीनि चिन्त्यानि ध्येयानि, कमला-कामुकः कामुकत्वेऽपि इतरवत् कामानभिभवं दर्शयति कामतात इति पुत्रस्य तातानभिभावकत्वात् । श्रीनारायणः प्रियायाः लक्ष्म्यास्तत्तदङ्गे कम्बु-ग्रीवाद्यवयवे चित्तासङ्गं हृदयासक्तिं दधानः सन् निजकर-कमलैः यानि अजस्रं कलयति गृह्णाति इति प्रतीमः । कामुका हि नित्यं कान्तास्फूर्तये तदङ्गसदृशं किमपि कलयन्तीति प्रसिद्धम् । अत्र कम्ब्वादीनां कान्ताकम्बुग्रीवाद्यङ्ग-स्मृतिजनकत्वेऽपि न स्मृति-मदलङ्कारः । ४५ ।

अत्र अङ्गो-पाङ्गायुध-कल्पमिति पूर्वोक्तरीत्या चक्रादीनां भगवदङ्गत्वेन प्रथमं श्लोकद्वयेन चक्रं वर्णयति ।

चक्रं चिन्त्यं प्रणीताद्भुतरसमहितं लोहितं राहुकण्ठा—
त्पीत्वेवाकुण्ठितायुः स्फुरति न च जराजर्जरा यस्य धारा ।
यत्सख्यं वाहिनीनां न्यविधात शतशः स्पर्द्धमानारिमूर्द्ध—
च्छद्मान्याच्छिद्य पद्मान्यमरजनमुदे स्राक् स्रजः
सन्दधानाम् ।४६।

Digitized by srujanika@gmail.com

चक्रं चिन्त्यमिति—श्रीनारायणस्य करस्थितं चक्रं सुदर्शनाख्यं चिन्त्यम्, यस्य धारा राहुकण्ठात् प्रपीतामृतरससहितं लोहितं पीत्वेव अकुण्ठितायुः चिरायुः, जराजर्जरा न स्फुरति सुधापाना-च्चिरायुष्ट्वजराभावौ प्रसिद्धौ । यथोक्तं श्रीशङ्करस्वामिभिः "सुधामास्वाद्य प्रतिभयजरामृत्युहरणी" मिति । यच्चक्रं स्पर्द्धमानानामरीणां दैत्यानां मूर्द्धान एव कञ्जं येषां तानि तद्रूपाणि पद्मानि आच्छिद्य छित्वा अवचित्य च अमरजनमुदे स्राक् शीघ्रं स्रजः सृज्यमानं सत् 'लवनयोर्लत्वोः क्रियायाः' 'लृटः सद्वे' तिहेतौ लृटः शानच, मुगागमश्च । शतशः शतवारान् वाहिनीनां दैत्यसेनानां नदीनाञ्च मध्यं न्यविशत प्राविशत् "नेर्विश" इत्यात्मनेपदम् । अत्र श्लेषेण वाहिनीप्रवेशस्य नदीप्रवेशेन अरिमूर्द्धाहरणस्य पद्माहरणेन रूपणात्तदुत्थापितोत्प्रेक्षा, इवादिपदाभावात्सा च गम्या ॥४६॥

चक्रं शक्रारिशत्रोर्विमृशतु मनसा लालसोल्लासलोलै-
र्ज्वालाजिह्वा-सहस्रैः प्रकटितविकटाटोपतर्षप्रकर्षम् ।
दैत्यासृक्सिन्धुसङ्घैः किल कलसजनिं जेतुमापीयमानै-
र्यस्याल्पाप्यार्द्रताऽनाभ्युदयति हृदये रोषशुष्मोष्मशुष्के ॥

चक्रमिति—लालसाया महातृष्णाया उल्लासेन उद्रेकेण अति-शयेनेत्यर्थः लोलैश्चञ्चलैः ज्वाला एव जिह्वा स्तासां सहस्रैः, प्रकटितः प्रकाशितः विकटाटोपः भीषणारम्भः तर्षप्रकर्षः तृष्णातिशयो येन तत् शक्रारिशत्रोः दैत्यारेः श्रीनारायणस्य चक्रं सुदर्शनं मनसा विमृशतु अत्र विमर्शः स्मरणम् स्मरतु भक्त इति शेषः । कलसजनिम् अगस्त्यं जेतुमेकसिन्धुपिबं तिरस्कर्तुमापीयमानैः अतिशयेन पीतैः दैत्यासृक्-सिन्धुसङ्घैः अनेकासुररुधिरसागरैः रोषशुष्मा क्रोधाग्निः तस्य उष्मणा सन्तापेन शुष्के यस्य हृदये तद्रूपे मध्ये च अल्पाऽपि आर्द्रता सरसत्वं दैत्यहनने दयार्द्रता च नाभ्युदयति नोदेति । सुदर्शनस्य धाराशं तच्छिन्ना-नेकासुरासृक्सिन्धवः शुष्यन्ति कृता वा मध्यदेशमीयुरिति भावः । अत्र अनेकासृक्सिन्धुपानस्य कलसजनिजयेन उत्प्रेक्षणाद्धेतूत्प्रेक्षा, सा च पानातिशयेऽपि हृदयार्द्रत्वविरोधेन संकीर्णा ॥४७॥

Digitized by srujanika@gmail.com

शार्ङ्गं तं खल्वऽधीयात् प्रलयघनघटागर्जितौजस्वि-घोषै-
र्यः कृत्वाऽनेककृत्वोऽनुसमरमसुहृद्गर्भिणीभ्रूणहत्याः ।
प्रायश्चित्तं विधत्ते विधिविहितमरुत्पूरणेन प्रयत्नात्
प्राणायामप्रयासी प्रणवगुणनिकासादरः सूक्ष्मनादैः ।४८।

शार्ङ्गमिति—तं शार्ङ्गं पाञ्चजन्यं खलु निश्चितम् अधीयात् स्मरेत् । अधिपूर्वस्य इक्स्मरणे धातो लिङिरूपम् । यः प्रलयघनघटागर्जितौजस्विघोषैः प्रलयाब्दघोरस्तनितैः अनुसमरं युद्धमनु लक्षीकृत्य असुहृदां दैत्यानां यद्गर्भिणं गर्भिणीसमूहः तस्य भ्रूणाः गर्भस्थितजन्तवः तेषां हत्याः हननानि अनेककृत्वो बहुवारान् कृत्वा विधिना दैवेन यदृच्छया यन्मरुत्पूरणं विधिना शास्त्रोक्तेन पूरककुम्भकरेचकविधानेन विहितं मरुत्पूरणं तेन हेतुना सूक्ष्मनादैः श्रीभगवन्मुखपवनपूरणाभावेऽपि दैत्यादितरमरुत्पूरणध्वनिभिरित्यर्थः । प्रणवस्य गुणनिका पुनःपुनरावृत्तिः तस्यां सादरः प्रयत्नात् प्राणायामप्रयासी, प्राणायामे प्रयासयुक्तः सन् प्रायश्चित्तं विधत्ते इवेत्युत्प्रेक्षा । पापहरणप्रायश्चित्ते मनुनोक्तं यथा 'तिलहोमो देव्ययुतं प्राणायामशतत्रयम् । समुद्रगनदीस्नानं सममेतच्चतुष्टय' मिति 'सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश । अपि भ्रूणहनं मासात्पुनन्त्यहरहःकृता' इतिच । अत्र इवादिपदाभावेन गम्योत्प्रेक्षा । भ्रूणहत्या प्रायश्चित्ताऽभावेऽपि तत्सम्बन्धवर्णनात् अतिशयोक्तिः ॥४८॥

सौरभ्यारभ्यमाणर्द्धिभिरधरसुधासाधुमाधुर्य्यधुर्य्यैः
पीतैः पीताम्बरस्यास्यवनजपवनैर्निर्भरं पूरणीगर्भैः ।
रुन्धानस्सुगवस्तरक्षोऽसुपवनपिबतापीवरीं वर्वरीं वा
कामं कौमोदकीं यो हसति स मनसा कम्बुराट्
चुम्बनीयः । ४९ ।

सौरभ्येति—सौरभ्येण आरभ्यमाणर्द्धिभिः सौगन्ध्यारब्धसमृद्धिभिः अधरसुधासाधुमाधुर्य्यधुर्य्यैः—अधरसुधामधुरिमधूर्वहैः पीतैः पुनःपुनरास्वादितैः पीतरम्बरस्य श्रीनारायणस्य आस्यमेव वनजं पद्मं तत्सम्बन्धिभिः पवनैः श्रीभगवन्मुखपवनस्य सहजसौरभ्यधरसुधामा-

Digitized by srujanika@gmail.com

धुर्य्याविशिष्टत्वेन पानातिरेकात् निर्भरमत्यन्तं पूर्णगर्भः । यः रक्तासृजां कठिनदेहत्वाद् असिंग्धासृजां वस्तो मेषस्तत्सदृशानां रक्षसां मालि-सुमालिप्रभृतीनामसवः प्राणपवनाः तत्पिबता तत्पायित्वम् पाधातोः शप्रत्यये पिवादेशः तया पीवरीं पृथुलां कौमोदकीं वर्वरीम् अस्त्रवलयादि-विशिष्ट घटमानतोन्नताम् वर्वरस्त्रियं वा पामरस्त्रियमिव, इवार्थे वाशब्दः, 'वर्वरः पामरे केशे चक्रके ना च दन्तुरे' इति मेदिनी । कामं यथेष्टं हसति आवयोः श्रीभगवत्करस्थितिसाम्ये अपि ममेदृशं पानं तव तादृशं पानम् अतो मयि भगवत्पक्षपातो महीयानिति परिहसति । स कम्बुराट् शङ्खराजः पाञ्चजन्यः मनसा चुम्बनीयः श्रीभगवदधरसुधापानमधुर-मूर्त्तितया कान्ताधरवच्चुम्बनेनास्वादनीयः, ध्येय इत्यर्थः । अत्र पाञ्च-जन्यस्य कौमोदकीहसनासम्बन्धेऽपि तत्सम्बन्धवर्णनादति—शयोक्तिः । ४६ ।

एवं पृथग् वर्णयित्वा चक्रशङ्खौ सह वर्णयति :—

चक्रं वृक्णारिचक्रं परिचरतु धिया चण्डरुङ्मण्डलाभं
कम्बुं चाडम्बरेणानिभृतममृतरुग्बिम्बसंवावदूकम् ।
यौ कालिन्द्योघकल्पे हरिरुचिनिचये तस्य चक्षूभवन्तौ
स्नेहेन स्वानुबिम्बाविति किमुभयतः पश्यतः पुष्पवन्तौ ।५०।

चक्रमिति—वृक्णारिचक्रं छिन्नशत्रुसैन्यं चण्डरुङ्मण्डलाभं मार्त्तण्डमण्डलसदृशं चक्रं सुदर्शनमाडम्बरेण शोभारम्भेण अनिभृतम् अनाच्छन्नं प्रकाशमानमित्यर्थः नतु चन्द्रवत् क्षीणम् अमृतरुग्बिम्ब-संवावदूकं शशिबिम्बसंवदनशीलं तत्सन्निभमित्यर्थः । कम्बुं पाञ्च-जन्यञ्च युगपत् सुदर्शनपाञ्चजन्यौ धिया ध्याननिष्ठबुद्ध्या परिचरतु से-वताम् परिचरणञ्च ध्यानेन तच्छोभायाः पुनः पुनः परिशीलनम्, भक्त इतिशेषः । तस्य नारायणस्य चक्षूभवन्तौ "कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्वि" रिति च्विः, "अरुर्मनश्चक्षु" रिति चक्षुषोऽन्त्यषकारलोपः, "च्वौ" चेति पूर्वस्योकारस्य दीर्घः । नेत्रीभूतौ पुष्पवन्तौ सूर्य्याचन्द्रमसौ यौ चक्र-

Digitized by srujanika@gmail.com

कज्जू कालिन्दीं।घकल्पे यमुनानीरपूरसदृशे हरिरुचिनिचये नारायणकान्तिकदम्बे स्वानुबिम्बाविति निजप्रतिबिम्बाविति स्नेहेन उभयतः उभयोः पार्श्वयोः पश्यतः किमित्युत्प्रेक्षा । ५० ।

ध्यातव्यं दिव्यमब्जं दितिजविजयिनो यत्सदेशस्पृशोऽब्ज-
श्रीसर्वस्वच्छिदोऽदोवदनपदजुषो भीतमम्भोजराजात् ।
नित्यं निद्रादरिद्रं विसृजति मधुनो विप्रुषोऽश्रुबिन्दून्
बन्धुस्नेहानुबन्धात्करसरसिरुहाश्लिष्यताश्वास्यते च ।५१।

ध्यातव्यमिति—अत्र पद्मस्यायुधत्वाभावेऽपि आकल्पत्वात् वर्णनम् । दनुजविजयिनः दानवारेः श्रीनारायणस्य दिव्यम् अलौकिकं करस्थं लीलापद्मं ध्यातव्यं ध्यैधातोस्तव्यप्रत्ययः । यस्य स देशः समानो देशः समीपं तत्स्पृशः स्वसमीपस्थात् । अब्जानां यावत्पद्मानां श्रीसर्वस्वच्छिदः सकलसम्पदपहारकत्वात् । अमुष्य श्रीनारायणस्य वदनपद्मजुषः तदभिन्नत्वात् । अम्भोजराजात् पद्मसार्वभौमात् भीतं यत्पाणिस्थितं पद्मं नित्यं निद्रादरिद्रं सत् दिव्यत्वात् नित्यविकसितं भीतत्वान्निद्राशून्यत्वञ्च मधुनः मकरन्दस्य विप्रुषः बिन्दून् अतएव अश्रुबिन्दून् अश्रुजलकणान् विसृजति त्यजति व्यस्तरूपकं भीत्या रोदितीत्यर्थः । करसरसिरुहा भगवत्पाणिपद्मेन बन्धुस्नेहानुबन्धात् बान्धवप्रेमसम्बन्धात् बन्धुत्वञ्च स्वकान्तिसदृशकान्तिमत्त्वम् आश्लिष्यता आलिङ्गता आश्वास्यते च । बन्धवो हि निजबन्धुं रोजादित्रासविह्वलम् आश्वासयन्ति । आश्वासनं च वयं भगवदीयाः अस्माकं परस्परभयं नास्ति, मुखपद्मञ्च अस्मदतिरिक्तपद्मश्रीलुण्ठाकमिति । अत्र इवादिवाचकाभावात् गम्योत्प्रेक्षा ॥ ५१ ॥

कञ्जं युञ्जीत चेतस्यजितकरसरोजाधिराजेन जित्वा
जीवग्राहं गृहीतं दलितमनितरां वाहुजप्रौढिभाजा ।
पुष्टाः सर्वस्वपोषं मधुरमधुभृतेरक्षमा बन्धमोक्षे
यस्यादूरे रुदत्यो भ्रमरपरिषदः संभ्रमेण भ्रमन्ति ।५२।

Digitized by srujanika@gmail.com

कञ्जमिति—चेतसि कञ्जं श्रीनारायणपाणिस्थितं पद्मं युञ्जीत समाधिना भावयेत्। तत्कीदृशं बाहुजप्रौढिभाजा बाहुजन्यतत्कर्ष एव बाहुजप्रौढिः क्षत्रियोत्कर्षः तद्भाजा "बाहुजः क्षत्रियो विराट्" इत्यमरः। अजितस्य श्रीनारायणस्य साभिप्रायविशेषणत्वात् परिकरः। मधु-कैटभजेतुः पुष्करविजयो न दुष्कर इति भावः। कर एव सरोऽधिराजः तेन जित्वा जीवग्राहं गृहीतं जीवं गृहीतमित्यर्थः 'समूलाकृतजीवेषु हनकृञ्-ग्रहः' इति कर्मणि णमुल्। अतितरां दलितं विकसितं जयेन प्रहार-पीडितं च मधुरैः मधुभिः मकरन्दैः भृतैः भरणात्पोषणाद्धेतोः सर्वस्व-पोषं पुष्टः सर्वस्वेन पुष्टः 'स्वे पुष' इति करणे णमुल्। भूभृत्युपकाररूपे बन्धमोक्षे भगवत्करग्रहणमुक्तिरूपे अक्षमाः असमर्थाः भ्रमरपरिषदः भृङ्गसमूहाः रुदत्यः सत्यः भ्रमरझङ्कारस्वनेनेति भावः। यस्य अदूरे समीपे सम्भ्रमेण त्वरया भ्रमन्ति बलवता स्वप्रभौ गृहीते तदनुजीविनः तन्मोचनासमर्थाः तत्समीपे रुदन्ति इति भावः। इयमपि गम्योत्प्रेक्षा, श्लेषरूपकसंकीर्णा ॥५२॥

पीत्वा मांसोपदंशं युधि रुधिरसुरां पाट्यमानासुरोरः-
पट्टव्याघट्टघोषाट्टहसितविकटं क्षीबभावान् नटन्ती ।
या प्रीतिं प्रेतभर्तुर्व्यधित धृतवसालेपनेपथ्यरौद्री
तस्या ध्यायेदसाध्याहितहृदयगदाभोगदाया गदायाः ॥५३॥

पीत्वेति—युधि मांसेन उपदंशं रुधिरं सुरां पीत्वा असुराणामिति शेषः "उपदंशस्तृतीयायाम्" मिति णमुल्। दश्यमानस्य मांसस्य प्रीतिं प्रति करणत्वात्तृतीया"। मद्यपाः किञ्चिदुपदश्य मद्यपानं कुर्वन्तीति प्रसिद्धम्। क्षीबभावात् मत्तत्वात् पाट्यमानानि यानि असुरोरःपट्टानि कठिनकैटभादिदैत्यफलकानि तेषु यो व्याघट्टः प्रहरणवेगेन पुनः पुनः संघट्टः तेन यो घोषः स एवाट्टहसितं मदिरापानानुभावरूपं तेन विकटं भङ्गुरं यथा तथा नटन्ती प्रहारप्राचुर्यादितिभावः। या गदा धृतं वसा-लेपनेपथ्यं दैत्यहननमेदः-पङ्कोपदेहप्रसाधनं तेन रौद्री भीषणा, मत्ता हि भूमिलुंठनादिना पङ्किलगात्रा भवन्ति। प्रेतभर्तुः यमस्य कस्यचिद्राक्षसस्य प्रीतिं व्यधित विहितवती। यमस्य स्वपुरगतदैत्य-प्रेतबाहुल्येन

Digitized by srujanika@gmail.com

स्वाधिकाराधिक्यात् । असाध्याः अन्यैर्हिंसितुम् अशक्याः ये अहितास्तेषां हृदये गदाभोगः चिन्तारूपः रोगातिशयः तं ददातीति सा तस्याः । गदायाः कौमोदक्याः ध्यायेत् तां ध्यायेदित्यर्थः । "अधिगमार्थत्वात् कर्मणि षष्ठी" । अत्र सावयवरूपकालङ्कारः ॥ ५३ ॥

आमन्ती दिष्टगत्या ऽहितवृषपिशितं प्राश्य मातङ्गकुम्भात्
पीत्वा चाजौ मदाम्भस्तदनुशययुता या नखांशुच्छलेषु ।
स्नान्ती गङ्गाजलेषु व्रतयितुमिव तद्द्योषितां गोपयोऽधोक्
प्रायश्चित्तं भजन्तीं महयतु महतीं तां गदां धर्मसेतोः ।५४।

आमन्तीति—दिष्टगत्या अनेन पथा गत्वा इमं मारयेति भगवता दिष्टा आज्ञप्ता या गतिस्तया दैवगत्या च सर्वस्य दैवाधीनत्वात् या आजौ युद्धे अहितवृषाः अहितेषु वृषाण इव, वृषभा इव, उभयथा शत्रुश्रेष्ठाः तेषां पिशितं मांसं तदेवाहितं पातकोत्पादनात्, वृषपिशितं गोमांसमित्यर्थः । प्राश्य खादित्वा मातङ्गकुम्भात् करिशिरोमांसपिण्डात् चाण्डालघटाच्च "चाण्डालप्लवमातङ्गे" त्यमरः । मदाम्भः दानजलं मादकमम्भः अम्भःसदृशं मद्यम् इत्यर्थः पीत्वा स्वघातस्फुटितशत्रुवक्षोगजकुम्भमांसदानानां स्वस्मिन् लगनं प्राशनपानतया उत्प्रेक्षितं तथाच भगवत्पाणिप्रेरणेन रणगतदैत्यवक्षः पाटनतदीयगजकुम्भस्फोटनादिकं कृत्वा तदनु तदनन्तरं शययुता हस्तयुक्ता च सती "पञ्चशाखः शयः पाणि" रित्यमरः, अन्यत्र पक्षे तदनुशययुता ताभ्यां गोमांसभक्षण-मद्यपानाभ्यां यः अनुशयः पश्चात्तापः तेन युता अहो मया इदमकर्तव्यं कृतम् इति अनुतप्ता सती पश्चात्तापस्य पापनाशकत्वात्, यथाह मनुः "कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते । नैवं कार्य्यं पुनरिति निवृत्त्या पूयते तु सः" इति । नखांशुच्छलेषु निजधारकंकरनखरकरकपटेषु तद्विभ्रमेष्वित्यर्थः । गङ्गाजलेषु स्नान्ती गङ्गाजलस्य परमपावनत्वात् तथाच महाभारते "अपिचाण्डालभाण्डस्थं यज्जलं पावनं महत् । सेयं गङ्गा कुरुश्रेष्ठ यथेष्टमवगाह्यताम्," इति । व्रतयितुं इव व्रतं कर्तुमिव तद्द्योषितां रणहतदैत्यस्त्रीणां गावः दृष्टयः नेत्राणि ता एव गावः धेनवः तासां पयः अश्रुजलं तदेव पयः क्षीरं अधोक्

Digitized by srujanika@gmail.com

दुद्रोह । यथाह मनुः—"तप्त कृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् । प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः, अपां पिबेत्तु त्रिपलं द्विपलन्तु पयः पिबेत् । "एवं ध्यानातिशयेन प्रायः बाहुल्येन चित्तं चरन्तीं गच्छन्तीं ध्यातां अन्यत्र प्रायश्चित्तं पापापनोदनविधिमाचरन्तीं गङ्गाजलस्नानपयोव्रतयोः पापनाशकत्वात् महतीं दीर्घां प्रायश्चित्तवंशात्पूज्यां च धर्मसेतोः धर्ममर्य्यादास्थापकस्य श्रीनारायणस्य गदाप्रायश्चित्तकारकत्वेन साभिप्रायं विशेषणं तां गदां महयतु पूजयतु भक्त इति शेषः । अत्र श्लेषोत्थापित प्रायश्चित्तध्वनिः ॥५४॥

अथ श्लोकत्रयेण रेखात्रयविशिष्टस्य श्रीनारायणकण्ठस्य वर्णनमारभते ।

सोत्कर्षं कंकणांकैः सरसिजवसतेरश्लथाश्लेषमग्नै-
र्वैकुण्ठाधीशकण्ठ स्फुटदरसुषमा नादरो भावनीयः
यत्सौभाग्याभिभूतो निजनिकटचरःपाञ्चजन्योऽपि चिन्ता
जन्यं शून्यान्तरत्वं प्रकटयतितरां पाण्डुभूयं च भूयः ।५५।

सोत्कर्षमिति—सरसिजवसतेः पद्मालयायाः अश्लथाश्लेषेण गाढालिङ्गनेन मग्नैः निमग्नैः कङ्कणांकैः वलयचिह्नैः सोत्कर्षं तादृशोत्कर्षस्य रसिकसौभाग्यव्यञ्जकत्वात् । स्फुटः दरस्य साभिरव-दक्षिणावर्त्तशङ्खस्य सुषमायाः परमशोभायाः अनादरो यस्मात् स वैकुण्ठाधीशस्य श्रीनारायणस्य कण्ठः भावनीयः । दरसुषमानादरमाह यदिति—यत्सौभाग्येन लक्ष्मीभुजा श्लेषकङ्कणकलाङ्कनलाभरूपेण अभिभूतः तिरस्कृतः तत्र तस्याभावात् निजस्य निकटचरः पार्श्वस्थः, न तु दूरस्थः पाञ्चजन्यः आकृत्या सदृशोऽपि स्निग्धत्रिरेखवृत्तोज्ज्वलत्वादिविशिष्टेऽपि लक्ष्मीभुजाश्लेषप्राप्त्यभावेन चिन्ताजन्यं शून्यान्तरत्वं सच्छिद्रमध्यत्वं स्वसदृशाभिभवेति कर्त्तव्यतामूढत्वञ्च भूयः पुनः भूरि वा, पाण्डुभूयं पाण्डुत्वञ्च चिन्तानुभवद्धयोतत् प्रकटयतितराम्, अतिशयेन प्रकटयति । अत्र पाञ्चजन्यस्य स्वतःसिद्ध-शून्यान्तरत्वपाण्डुतयो-र्भगवत्कण्ठाभिभवजन्यचिन्तानुभावत्वेनोत्प्रेक्षा सा च व्यञ्जकाभावाद्गम्या ॥५५॥

Digitized by srujanika@gmail.com

त्रय्याः सञ्चारपद्यामिव निजवचसस्तां त्रिरेखां दधाने
सोत्कण्ठं कण्ठदेशे दिशतु किल मतिं केलिकण्ठीरवस्य।
अध्वन्या सिन्धुकन्यादृगधिरुचितया यत्र चित्रीयमाणे
चित्रायां प्राप्य यात्रामिव नहि पुनरावर्त्तते मोदमाना।५६।

त्रय्या इति—निजवचसः स्वसरस्वतीरूपायाः त्रय्याः वेदत्रयस्य सञ्चारपद्यामिव सञ्चरणसरणिमिव तां महापुरुषलक्षणव्यञ्जिकां त्रिरेखां रेखात्रयं दधाने केलिकण्ठीरवस्य क्रीड़ानरसिंहमूर्त्तेः श्रीनारायणस्य कण्ठदेशे सोत्कण्ठं सोत्सुक्यं मतिं दिशतु ददातु भक्त इति शेषः।—

ध्यायेदित्यर्थः—किलेति प्रसिद्धौ, अधिरुचितया अधिककान्तिमत्त्वेन चित्रीयमाणे विस्मापयमाने (नमो वरिवश्चित्रङः क्यच् इति क्यच्) यथा नरहरिरूपे कण्ठस्यातिशोभनत्वं मयानुभूतमेवं नारायणरूपेऽपीति लक्ष्म्या अद्भुतरसजनके चित्रानक्षत्रवदाचरिते यत्राध्वन्या पान्थरूपा सिन्धुकन्यादृक् लक्ष्मीदृष्टिः चित्रायां तन्नाम्नि नक्षत्रे यात्रां गमनं प्राप्येव मोदमाना आनन्दिता तच्छोभादर्शनजनिताश्चर्य्यरसमग्ना सती पुनर्नावर्त्तते। ततो न वहिर्भवति, हि निश्चितं, नह्यावर्त्तते वा भगवत्सौन्दर्य्यस्य तथात्वात्। तथाच श्रीभागवते "प्रत्याकृष्टुं नयन अवला यत्र लग्नं न शेकुरिति चित्रागमनफलं ज्योतिषे "नन्दन्ते न निवर्त्तन्ते चित्रास्वात्योर्गतानिरा इत्यत्र लक्ष्मीनायकस्य भगवत्कण्ठान्तःसौन्दर्य्यदर्शनाश्चर्य्यादनावर्त्तनं चित्रानक्षत्रगमनफलत्वेनोत्प्रेक्षितम्॥ ५६॥

अर्चिर्वर्त्माध्वनीना वरवचनमयान् यद्ध्वनीनात्मनीना
नीहन्ते यं पवित्रं विरचयति जनो दीर्घदर्श्यर्घपात्रम्।
भक्तानां भागधेयान्वित उदितघनो मुक्तिमुक्ताप्रसूते-
स्तस्यादः कण्ठकम्बोः शुभविभवभुवोऽध्येतु मध्ये
समाधिः।५७।

अर्चिर्वर्त्मेति—अर्चिर्वर्त्मनि "अग्नि-ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" इति गीतोक्तेः। अर्चिमार्गे देवयाने अध्वनीना "अध्वनो

Digitized by srujanika@gmail.com

यखदिति ख प्रत्ययः । पथिकाः भगवत्प्राप्तये तेन जिगमिषन्तः वरस्य श्रेष्ठस्य भगवतः वचनं वेदः तन्मयान् तत्स्वरूपान् यस्य कण्ठस्य ध्वनीन् बृहदारण्यक प्रोक्तार्चिर्मार्गे प्रतिपादकान् आत्मनो हितान् आत्मनीनान् "आत्मविश्वजनेति ख" प्रत्ययः । गमनसमये शङ्खध्वनेर्गमनप्रयोजन साधकत्वात् "यद्वा ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कण्ठंभित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ" इति शिक्षोक्तस्य प्रणवस्य कण्ठ-ध्वनित्वं तस्मात् । ॐ मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्, यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः । इति गीतोक्तेः । प्रणवं आत्मनीनं ईहन्ते इच्छन्ति दीर्घदर्शी विद्वान् जनः पवित्रं यं अर्घ्यपात्रं विरचयति, शङ्खस्यार्घपात्रत्वप्रसिद्धेः अर्घस्य पूजाविधेः पात्रं भाजनं तद्योग्य-मित्यर्थः । "मूल्ये पूजाविधावर्घः" इत्यमरः । अत्र पूजाविधानमेव, "ध्यानयज्ञास्तथा परा" इति गीतोक्तेः भक्तानां भागधेयाब्धितः भाग्यसिन्धोः उदितवतः उत्थितस्य शङ्खस्य सिन्धूत्पत्तिः प्रसिद्धा, मुक्ति मुक्ताप्रसूतेः मोक्षमौक्तिकजनकस्य शङ्खस्य मुक्तिजनकत्वं रत्न शास्त्रे "करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि मुक्ताफलानि प्रथितानि लोके" इति । अतएव शङ्खसादृश्यात् शङ्खकार्यस्य शुभ-विभवस्य शुभातिशयस्य भुवः उत्पत्तिस्थानस्य तस्य अदःकण्ठकम्बोः अमुष्य श्रीनारायणस्य कण्ठएव कम्बुस्तस्य तमित्यर्थः । मध्ये समाधि, समाधिर्ध्यानस्य पराकाष्ठा तन्मध्ये । पारे मध्येषष्ठ्या" वेत्यव्ययीभाव, अध्येतु स्मरतु भक्त इतिशेषः, अधिगर्थेतिकर्मणि षष्ठी रूपकालङ्कारः ।५७।

अथाकल्परूपत्वात्त्रिभिः श्लोकैस्त्रिगुणमायारूपां वैजयन्तीं वर्णयति—

मोक्षश्री वैजयन्तीं मुनिनियममुषः षड्द्विषस्तर्जयन्ती-
मन्तः स्वान्तं दधीन्मेदधिमधिशयितु वैजयन्तीं जयन्तीं
लब्धश्रीशार्ङ्गसङ्गां मधुपृषतशत स्वेदसन्दोहसान्द्रां
यां वाजव्याज सज्जव्यजनमलिवधूराजयो वीजयन्ति ।५८

मोक्षश्रीति—मोक्षश्रियः वैजयन्तीं जयपताकां मुनीनां नियममुषः अहिंसादिधनतस्करान् षड्द्विषः कामादीन् शत्रूंश्च तर्जयन्तीं जय-पताकायास्तर्जनहेतुत्वात् । अतएव जयन्तीं परमोत्कर्षेण वर्त्तमानां उदधि

Digitized by srujanika@gmail.com

समुद्रं अधिशयितुः क्षीराब्धिशायिनः श्रीनारायणस्य "अधिशीङ्स्थासां कर्मणि" आधारस्य उदधेः कर्मत्वं। वैजयन्तीं आपादलम्बिनीं-वनिता-पुष्पमयीं मालां "आपाद लम्बिनीमाला वैजयन्ती प्रकीर्त्तिता" इति गौतमीये। अन्तः स्वान्तं स्वान्तमध्ये 'अव्ययं विभक्त्या' विभक्त्यर्थेऽव्ययीभावः दधीत धारयतु ध्यायेदित्यर्थः। लक्ष्मः श्रीशस्य अङ्गसङ्गो यया तां एतेन वैजयन्त्याः स्त्रीत्वेन पुरुषसम्भोगो ध्वनितः। मधुपृषतशीतान्येव स्वेदसन्दोहः तेन सान्द्रां यां पुष्पसौरभमिलितां अलिवधूव्याजतः सखी-रूपाः व्याजव्याजेन उद्धूयन-चलित-पक्षकपटेन सज्जव्यजनं चालित-तालवृन्तं यथातथा वीजयन्ति। सम्भोगश्रान्तस्वामिन्याः सखीतालवृन्त चालनकृतस्वेदापनयनमत्र ध्वनितं "गम्योत्प्रेक्षा"।५८।

माला वैकुण्ठकण्ठग्रहमहबहुला मोदमभ्युल्लसन्ती
स्मार्य्या सिन्धोः कुमार्य्यास्तुलयितुमिव दोःसौकुमार्य्यं
प्रगल्भाम्।
यां पद्मासद्मपुष्टाः कलितकलकलाः पक्षलक्षेण पाणीन्
वारं वारं धुवत्यो मधुपयुवतयः साहसाद्वारयन्ति।५९।

मालेति—वैकुण्ठस्य नारायणस्य कण्ठग्रहमहे कण्ठाश्लेषोत्सवे बहुलामोदं प्रभूतानन्दं स्पर्शसुखानुभवात् बहुसौरभ्यञ्च भगवदङ्ग-सौरभमिश्रणात्, क्रियाविशेषणं, अभ्युल्लसन्ती शोभमाना माला वैजयन्ती नाम्नी स्मार्य्या ध्येया। सिन्धोः कुमार्य्याः लक्ष्म्याः दोः सौकु-मार्य्यं भुजयुगमार्दवं भगवता निजकण्ठग्रहाधिकारे द्वयोरभिकृतत्वात् तुलयितुमिव प्रगल्भां यां मालां पद्मासद्मसु पद्मेषु तद्गृहेषु च पुष्टाः मधुपयुवतयः दासीरूपाः कलितकलकलाः कलिता गृहीताः कलस्या-व्यक्तमधुरध्वनेः कलाः चातुर्य्याणि ता एव कलकलाः कोलाहलाः याभिस्ताः लक्ष्मीगृहपोषणेन तत्पक्षपातौचित्यात् कलहं कृत्वा वार वार पक्षलक्षेण पक्षव्याजेन पाणीन् धुवन्त्यः सत्यः स्त्रीणां कलहे पाणिचालन प्रसिद्धेः साहसात् लक्ष्मीभुजासौकुमार्य्यतुलनरूपात् वारयन्ती "विवादश्च विवाहश्च समयोरेव शोभते" इतिन्यायेन त्वं न्यूनरूपा इयमत्यु-त्कृष्टा युवयो स्तुलनं न युक्तमिति वदन्तीति ध्वनितम्। अत्र मालायाः

Digitized by srujanika@gmail.com

लक्ष्मीभुजसौकुमार्यतुलनासम्बन्धेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिः । ५९ ।

भूतग्रामं चतुर्द्धा विरचयतुमलं पञ्चभूतस्वरूपां
पूज्यां वर्णैश्चतुर्भिः स्थितिचतुरतरैः पञ्चवर्णात्मिकाञ्च ।
भेत्तुं चित्तं रमाया रतिरमणकृतां बाणसम्पूर्णतूर्णीं
मालां ध्यायेत्तमामुत्तमकुसुममयीमप्रमेयात्मशक्तेः ।६०।

भूतग्राममिति—भूतग्रामं भूतसमूहं चतुर्द्धा चातुर्विध्येन जरायुजाण्डजस्वेदजोद्भिज्जरूपेण विरचयितुमलमित्यर्थः पञ्चभूतस्वरूपां मालायाः पञ्चवर्णा कुसुमरूपत्वेन पञ्चभूतमयत्वोत्प्रेक्षा ।

उपासनाशास्त्रे वैजयन्त्या मालाया रूपत्वेन तस्याः पञ्चभूतकारणत्वात्कार्यकारणाभेदोक्तिः । स्थितिः स्वस्वमर्य्यादा तस्यामतिशयचतुरैः स्वस्वधर्मस्थितैः चतुर्भिर्वर्णैः ब्राह्मणादिभिः पूज्यां पञ्चवर्णात्मिकां शुक्लनीलरक्तपीतहरिद्वर्णपुष्पाणां यथास्वघटनाकौशलेन निर्मितां रमायाश्चित्तं भेत्तुं रतिरमणेन कामेन कृतां वाणसम्पूर्णतूर्णीं कामबाणानां कुसुमरूपत्वात् मालायास्तत्कल्पितत्वाच्च तामिव स्थितां उत्तमकुसुममयीं कल्पद्रुमकुसुमकल्पितां अप्रमेयात्मशक्तेः प्रमाणागोचरत्रिभुवनसृष्ट्यादिरूपस्वसामर्थ्यस्य महाशक्तिर्माया वा मालारूपेण तद्धारणात् तस्य मालां वैजयन्त्याख्यां ध्यायेत्तमां अतिशयेन ध्यायेत् "तिङश्चेति" तिङन्तात्तमप्प्रत्ययः । "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" इति तमप् आम् । अत्र भूतग्रामचतुष्ट्यविरचकत्वेऽपि पञ्चभूतात्मकत्वेन चतुर्वर्णपूज्यत्वेऽपि वर्णपञ्चात्मकत्वेन विरोधः । मालाया रमाचित्तभेदनार्थं कामस्य वाणपूर्णतूणीत्वेनोत्प्रेक्षा । अनयोरेकाश्रयस्थितत्वाच्च सङ्करः । ६० ।

चन्द्रन्मन्दस्मिते मौक्तिकस्पृगधरपुटं किञ्चिदुत्फुल्लगण्डाभोगं भ्रूचापविक्षेपणचपलयुगं सान्द्रचन्द्राद्रिकाधिश्वासामोदानुपादानुसरदलिगणोर्गीतिनासागुणोघं स्वालेख्यालेख्य सद्भ्रूलतमथवदनं दानवारेर्विभाव्यं ।६१।

Digitized by srujanika@gmail.com

अथ षड्भिः श्लोकैः लक्ष्मीषडिन्द्रियानन्दजनकं श्रीमुखं वर्णयति चन्दन्मन्देति—अथ वैजयन्तीध्यानानन्तरं चन्दता आह्लादयता मन्द-स्मितेन उल्लसत् शोभमानं अधरपुटं यस्मिन् किञ्चिदुत्फुल्लः स्मितव-शात् उत्सूनः गण्डाभोगः कपोलपूर्णत्वं यस्मिन् भूयो विकाशि भक्तेषु करुणया बहुविस्तीर्य्यमाणं ईक्षणकमलयुगं यस्मिन् सान्द्रचन्द्रस्य षोडश-कलापूर्णचन्द्रस्य ऋद्धिं शोभातिशयं बाधत इति तत् श्वासामोदानुमोदेन निश्वसितानिलसौरभानन्देन अनुसरद्भिः अलिगणैः गीतः नासागु-णोघः भृङ्गाररूपस्तोत्रपदकदम्बेन कमलादिदुर्लभसौगन्ध्यास्पद-श्वासजनकरूपो यस्य तत् स्वालेख्ये सुचित्रे आलेख्ये लेख्यमानेव स्थिता सती शोभना भ्रूलता यस्मिन् ईदृशं दानवारेः श्रीनारायणस्य वदनं विभाव्य ध्येयं भक्तेनेति शेषः, अत्र स्वरूपोक्तिः । ६१ ।

विभ्रद्वर्हिर्मुखानां मुखमिति जनकस्यानुरूपं स्वरूपं
यद्भूर्ज्वालाह्वजिह्वः कवलयति हविर्जुह्वतां सप्तजिह्वः ।
विप्रः कव्यप्रियाणामपि लपनतया तृप्तये न्युप्तभोजी ।
न्यस्येदास्ये मनोऽस्मिन्नखिलमखभुजस्तस्य विश्वम्भरस्य
। ६२ ।

विभ्रदिति—यस्माद्भवतीति यद्भूर्यज्जन्मा "मुखादग्निरजायत" इति श्रुतेः । जनकस्य मुखस्य पितुः अनुरूपं मुखपुत्रस्य मुखत्वौचित्यात् वर्हिर्मुखानां देवानां मुखमिति स्वरूपं विभ्रत् ज्वालाह्वाः ज्वालानाम्न्यः सप्तजिह्वाः कालीप्रभृतयो यस्य सः सप्तार्च्चिरग्निर्जुह्वतां होतॄणां ऋत्व-प्रभृतीनां हविः पुरोडाशादिकं कवलयति ग्रसति, ज्वालारूपाभिर्जिह्वाभिरित्यर्थः । उभयोः कवलसाधनत्वात् यद्भूर्विप्रोऽपि "ब्राह्मणोऽस्य मुखमासीत्" इतिश्रुतेः,कव्यप्रियाणां पितॄणां लपनतया मुखत्वेन" पृथिवी ते पात्रमिति मन्त्रेण ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमीति ब्राह्मणमुखा-धिकरणककव्यहवनश्रुतेः, पितृतृप्तेर्ब्राह्मणमुखसाध्यत्वात् तस्य पितृमुखत्वं । एतेनास्य स्वजनकानुरूपस्वरूपत्वं ध्वनितं, पितृतृप्तये न्युप्तानां पितॄनुद्दिश्य दत्तानां भोजी भोक्ता भवतीतिशेषः । "पितृदानं निवापः स्यादित्यमरः, अतएवाखिलमखभुजः सकलयज्ञेषु देवपैत्र्येषु

Digitized by srujanika@gmail.com

हव्यकव्यभुजः तस्मात् विश्वम्भरस्य सकलपोषकस्य "देवान् भावयतानेन ते देवा भावयन्तु वः." इति गीतोक्तेः । प्राणोपहाराच्च—यथेन्द्रियाणां तथैव सर्वार्हणामच्युतेज्या—इति श्रीभागवतोक्तेः—भगवत्पूजायाः सर्वपूजारूपत्वात् तस्य श्रीनारायणस्य अस्मिन् देवपितृमुखदहनादिजनके आस्ये श्रीमुखे मनः न्यस्येत् निदध्यात् ध्यायेदित्यर्थः । अत्र न्यासस्य ध्यानेन तदेकनिष्ठत्वं बोध्यं अत्रगम्योत्प्रेक्षा । ६२ ।

रुद्रेण द्रुह्यमाणः किलकुसुमशरस्तत्प्रतीकारहेतो-
रस्मादुत्पत्स्यमानः सुहृदि निहितवान् जैत्रशस्त्राणि यत्र ॥
राजीवे बन्धुजीवे दृगधरयुगले वज्रपुष्पं च नासां
पंचेषून् अधनुश्चार्पयतु मतिमिह श्रीमुकुन्दाननेन्दौ ॥६३॥

रुद्रेणेति—रुद्रेण शिवेन स्वसमाधिभङ्गात् द्रुह्यमाणः नेत्रानलदाहेन द्रोहं प्रापितःकिलेति प्रसिद्धः । कुसुमशरः कामः अत्र विशेषणस्य साभिप्रायत्वात् परिकरः, तस्य शिवस्य प्रतीकारहेतोः शङ्कर वैरशुद्ध्यर्थं वैरशुद्धिः प्रतीकार इत्यमरः। अस्मात् नारायणात् श्रीकृष्णावतारे प्रद्युम्नरूपेण उत्पत्स्यमानः बाणयुद्धे पित्रा सह भवपराभवार्थं जनिष्यमाणः चन्द्रकन्दर्पयोः मैत्री प्रसिद्धिः सुहृदि मित्रे श्रीमुकुन्दाननेन्दौ जैत्रशस्त्राणि त्रिभुवन जेतृणि शस्त्राणि, शरशरासनानि कानि तानीत्यपेक्षायामाह, दृगधरयुगले दृशोरधरयोश्च रयुगले "द्वन्द्वात्परस्य युगलशब्दस्योभयसम्बन्धात्" दृग्युगलं राजीवे पद्मे अधरयुगलं बन्धुजीवे बन्धूकपुष्पे नासां वज्रपुष्पं तिलपुष्पं च "बज्रपुष्पंतिलस्ययदि"त्यमरः । इति पञ्चेषून् पञ्चबाणान् व्यस्तरूपकं, भ्रूरेव धनुः तत्र निक्षेप्तव्यस्य गणनावश्यकत्वादेतदुक्तं निहितवान् निक्षिप्तवान् । गुरुकार्य्यचिकीर्षया दूरदेशं जिगमिषन्तः स्वमित्रे निजसर्वस्वं निक्षिपन्तीति प्रसिद्धिः, इहास्मिन्श्रीमुकुन्दाननेन्दौ श्रीनारायणमुखचन्द्रे मतिं अर्पयतु यथा कामस्तथा संसारजिगीषाप्रवृत्तो भक्तस्तत्र मतिं निक्षिपत्विति ध्वनितं अत्र रूपकालङ्कारः ॥ ६३ ॥

Digitized by srujanika@gmail.com

स्वः सोमोदेवतास्मै हविरपि हृदयं पुंस्प्रवृत्तिं सृजन्ती
संयातायातसंज्ञाञ्चलभृदभिधयाश्वासमूर्तिः श्रुतिश्च ।
तत्साकांक्षालिमाला-स्वनितनुतिपरासंनिधिस्यार्थवादः
कुर्वीता दोमुखस्य स्मरणमखमतो मुक्तिकामोऽधिकारी
॥ ६४ ॥

स्वः सोम इति—अतः स्मरणमखोपयुक्तसामग्रीलाभात्, अधिकारी मुक्तिकामः अदोमुखस्य स्मरणमखं कुर्वीतेत्यन्वयः । अधिकर्तु शीलमस्य अधिकारी "ताच्छील्ये णिनि" "शान्तोदान्त-स्तितिक्षु" रित्यादि श्रुत्या शमदमादिसम्पन्नस्यैव तादृशस्मरणाधि-कारात् । यथा कात्यायनेनोक्तं अधिकारसूत्रे—"ब्राह्मणादीनामेवाग्नि-ष्टोमादि कर्मण्यधिकारः नतु तदितरेषां अश्वोत्रियादीनां" एवं "ज्ञान काण्डे मुमुक्षोरेव तादृशस्मरणेऽधिकारः, नान्येषां कर्मपराणां । मुमुक्षुर्वैशरणमहं प्रपद्ये" इति श्रुतेः । मुक्तिं कामयत इति मुक्तिकामः "कर्मण्यण्" अदो मुखस्य उपक्रान्तत्वात् । अमुष्य श्री नारायणस्य मुखं तस्य अदो मुखस्य इत्येकं पदं । अथवा पदद्वयं अदः नास्ति दाः यस्य तस्य दो अवखण्डने इति धातोः क्विप्, अखण्डितस्य परिपूर्णस्य व्यापकस्य एतादृशत्वं प्रथमश्लोकव्याख्यायामेवोक्तं । स्मरणमेव मखस्तं अत्र स्मरणं ध्यानमेव नतु स्मृतिः मुक्तिकामाधिकारित्वात् पूर्वदृष्टस्य तत्सदृशदर्शने स्मरणं जायते अदोमुखं तथा न भवतीति । "आत्मावारे द्रष्टव्य" इतिश्रुतेः श्री भागवते च "श्रोतव्यः कीर्तितव्यश्च स्मर्तव्य श्चेच्छताभय"मिति तस्मादसदोमुखध्यानमखं कुर्वीत, स्मरणमखक्रिया-फलस्य मोक्षस्य यागफलस्य स्वर्गादेरिव कर्त्रभिप्रायत्वात् स्वरितञित इत्यात्मनेपदं यजेत इतिवत्। स्मरणस्य मखत्वेन रूपणात् मखस्वरूपं निरूपयति । स्वः सोम इत्यादिना यज्ञस्य द्रव्य देवता त्यागरूपत्वात् देवतामाह । स्वः आत्मा स्वकं सोमो देवता सोमनाम्नी देवता श्रीमुखस्य पूर्णं समानत्वात् "स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रिया" मिति मेदिनी ।

Digitized by srujanika@gmail.com

अस्मै सोमाय पतमुद्दिश्य इत्यर्थः । हविः तत्तद्देवतोद्देश्यक यहलब्धुधिकरणकप्रत्येप्यद्रव्यरूपं,पतेन त्याग उक्तः हविर्द्रव्यं हृदयंहृदयस्य द्रव्यत्वेन रूपणं करणत्वसाधर्म्येण "मनसैवानुद्रष्टव्यं" इत्यादिश्रुत्या मनसो ध्यानकरणत्वेन प्रतिपादनात् यथा दध्ना जुहोतीत्यादि । एवं यागस्वरूपमुक्तं, यागस्य च विधिवाक्यप्रतिपाद्यत्वेन तदपेक्षायामाह । यातायातसंज्ञाछलभृदभिधया पुंप्रवृत्तिं सृजन्ती श्वाससंज्ञा श्रुतिः । सा च यातायाताभ्यां नासाधिकरणकनिजगमनागमनाभ्यां सर्वेषां जीवानां संज्ञा चेतना "संज्ञा नामनि गायत्र्यां चेतना रवि योषितो"-रिति मेदिनी । तस्याःछलं कपटं बिभर्तीति संज्ञाछलभृत् या अभिधा शाब्दी भावना तया पुंप्रवृत्तिं सृजन्ती "पुमःखय्यम्परे" इति विसर्गस्य षत्वनिषेधः, सम्पुकानामिति सः । यथालिङ्लोटलेट्तव्यप्रत्ययमात्रगता यजेतेत्यादौ इष्टभावनादिरूपा अभिधा पुरुषप्रवृत्तिं भाव्येषु स्वर्गादिषु फलेषु पुरुषाणां प्रवृत्तिं आसक्तिं सृजति, एवं श्वासरूपाश्रुतिः स्वयातायाताभ्यां पुरुषचेतनां प्रतिपाद्य प्रवृत्तिं व्यापारं सृजति । महदादिसर्गस्याचेतनत्वात् "अनेनात्मना जीवेनानुप्रविश्य नामरूपे व्याकरवाणी"ति अनुप्रवेशः चेतनाप्रतिपादनं सकलपुरुषश्वासस्य भगवच्छ्वासाधीनप्रसरणत्वात् तद्व्यापारसृष्टिः । तथाचोक्तं श्रुत्यादिषु "यं वै श्वसन्तमनुविश्वे श्वसन्तीति । श्रीमद्भागवते च यं वै श्वसन्तमनु विश्वसृजः श्वसन्तीति । ब्रह्मसंहितायाञ्च "यस्यैव निःश्वसित कालमथावलम्ब्य जीवन्ति रोमबिलजा जगदण्डनाथा इति च । श्वाससंज्ञा श्वासनाम्नी तद्रूपा तस्यैतस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसा" इत्यादिश्रुतेः "यस्य निश्श्वसितं वेदा इति स्मृतेश्च । श्रुतिः सा" विधि-श्रुतिः विधिवाक्यं, आम्नायस्य क्रियार्थत्वात् विधिवाक्यस्यार्थवाद-सहकृतत्वात्तदपेक्षायामाह, तत्साकांक्षेत्यादि । तत्साकांक्षा स्वनितनुतिपरा सन्निधिस्था अलिमाला अर्थवादः अर्थवाक्यस्य विधिवाक्येन सह पुरुषार्थ-पर्यवसितविध्यपेक्षितप्राशस्त्यसमर्पकतासम्बन्धप्रतिपादितैकवाक्य-तापत्तेस्तदाकाङ्क्षायामाह । तत्साकाङ्क्षेति । तस्यां श्वासज्ञश्रुतौ साकाङ्क्षा शोभातिशयेन साभिलाषा स्वनितमेव नुतिः सैव परं यस्याः सा "परं श्रेष्ठारिदूराग्र्य" इति मेदिनी, सन्निधिस्था निकटवर्तिनी

Digitized by srujanika@gmail.com

अलिमाला भ्रमरपंक्तिः सैवार्थवादः अर्थवादधर्मवत्त्वात् ते यथा तस्यांश्रुतौ प्राशस्त्यसमर्पकताद्वारा साकाङ्क्षा "आम्नायस्य विधिवाक्यस्य क्रियार्थत्वेन तदितरस्यानर्थक्यप्राप्तौ तत्प्राशस्त्यसमर्पकत्वात् । सन्निधिस्थत्वं विधिद्वारा प्रामाण्यपारादनन्तरभावित्वं यथा "वायव्यं श्वेतमालभेत भूतिकामः" "वायुर्वै क्षेपिष्ठा देवतेत्यादि । तथाचाभियुक्तैरुक्तं ।,लिङोऽभिधा सैवच शब्दभावना, भाव्या च तस्यां पुरुषप्रवृत्तिः । सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते । इति । अतो मुक्तिकामः नारायणमुखस्मरणमखण्डं कुर्वीतेति अखण्डमण्डलसुधाकरमनोहरस्वरूपं सकलचेतना-सम्पादकप्रसरण सर्वाम्नायमयनिःश्वाससौरभाकृष्टषट्चरण–पटलझङ्कारस्तवनीयगुणगणं श्रीमन्नारायणवदनं मनसा भावयन् जनः संसारान्मुच्यत इति तात्पर्यार्थः अत्र रूपकालङ्कारः सच मुखहृदयादीनां सोमदेवता द्रव्यादिरूपणेन तथा पुष्प्रवृत्तिः सैवेति परम्परितेन संज्ञाभृदभिधयेति व्याजापह्नुत्या तत्साकाङ्क्षाविशेषणैरलिमालया अर्थवादरूपेण सावयवः सजातीयविजातीयसंकरश्च । ६४ ।

अग्नेरग्र्यारणिं स्वाभरणमणिमहोदाम सौदामिनीनां
राज्या नीराज्यमानं नयनपदकृतार्थीकृताकामृतांशु ।
आदित्यैर्दुस्तुदस्यान्तरचरतमसो ध्वंसकार्य्याय कुर्य्यात्
चित्ते देदीप्यमानद्युतिमुखमखिलज्योतिषां भासकस्य ॥

अग्नेरिति-अग्नेः अग्रभवां अरणिं प्रथमनिर्मथ्यदारुरूपां, अग्नेर्नारायणमुखात्प्रथमोत्पन्नत्वात् । स्वाभरणानां किरीटकुण्डलादीनां मणिमहोदामान्येव सौदामिन्यः तासां राज्या श्रेण्या नीराज्यमानं निर्मञ्छ्यमानं नयनपदेन तत्स्थानाधिष्ठानेन कृतार्थीकृताधर्कामृतांशू येन तत् स्वतो देदीप्यमानद्युति एतेन स्वपरप्रकाशकज्योतिःप्रकाशकत्वमुक्तम् । यतः अखिल-ज्योतिषां भासकस्य सूर्य्यादिसकलज्योतिषां ज्योतिकारणस्य श्रीनारायणस्यच मुखं "यस्य भासा सर्वमिदंविभातीति श्रुतेः । "यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्चन्द्रमसि यच्चाग्नौ तत्सर्वं विद्धिमामकं" इति गीतोक्तेश्च । अतएवादित्यैःद्वादशभिः सूर्यैः दुस्तुदस्य दुष्परिहरस्य

Digitized by srujanika@gmail.com

अन्तरच्चरतमसः अविद्यामय हृदयग्रन्थिरूपस्य ध्वंसकार्य्याय प्रध्वंसाय चित्ते कुर्य्यात् ध्यायेदित्यर्थः। एतेन सूर्य्यादिदुष्करकर्मकर्तृत्वं नारायणमुखस्य ध्वनितं। अत्र परिकरालकारः।

स्वस्वान्तादेव देवो यमजनयदयं वेधसोऽकल्पशिल्पं
भक्तानुक्रोशगर्भान्मुनिजनमनसां लीनता यत्र युक्ता।
व्यक्तं यस्यानुविम्बा हिमकरनिकराः पूर्णिमा पूर्णबिम्बा
स्तं सेवेतामृतीयन्नमृतकरमृतं चेतसा तन्मुखाख्यम्।६६।

स्वसान्तादिति—अयं देवः श्रीनारायणः भक्तानुक्रोशगर्भात् भक्तकृपापूरणात् स्वस्वान्तात् निजमनसः एव वेधसः अकल्पशिल्पं स्वतःसिद्धत्वात् विधिसृष्टिबहिर्भूतं यं मुखचन्द्रं अजनयत् चन्द्रस्य भगवन्मनोजन्यत्वं श्रुतिसिद्धं* भगवद्विग्रहस्य स्वेच्छामयत्वं श्रीभागवते यथा—"भक्तेच्छोपात्तदेहाय" अस्यापि देववपुषो मदनुग्रहस्य स्वेच्छामयस्य ननुभूतमयस्य (कोऽपीति,,च) यत्र मुनिजनमनसां लीनता युक्ता उचिता मनश्चन्द्रं प्रविशतीति, मनोलयस्य श्रुतिसिद्धत्वं, पूर्णिमायां पूर्णविम्बाः अखण्डमण्डलाः हिमकरनिकराः नत्वन्ये खण्डितत्वात् यस्य प्रतिबिम्बाः स्फुटं व्यक्तं, अतः अमृतीयन् आत्मानममृतमिच्छन् जनः तन्मुखाख्यं ऋतं सत्यं तस्य सच्चिदानन्दस्वरूपत्वात् अमृतकरं चन्द्रं मोक्षकारकञ्च अमृतकरादमृतप्राप्तिसिद्धेः। चेतसा सेवेत मोक्षार्थी भावयेदित्यर्थः। अत्र रूपकालकारः, श्लेषपरिकरसंकीर्णः॥

दुग्धस्निग्धस्मिताभामिषविशदकृपोन्मेषपीयूषवर्षैः
स्वेषां हर्षं दधाने धृतमधुरपरिस्पन्दने दीनबन्धोः–
मन्दश्वासानिलेषत्तरलकिसलयश्रीगरिष्ठेऽधरौष्ठे।
चिन्तां दन्तांशुदम्भस्फुटकुसुमरजः सुप्रतिष्ठेऽनुतिष्ठेत्
।६७।

अत्र त्रिभिः श्लोकैः त्रिलोकिमाधुर्य्यसारास्पदं नारायणाधरविम्बं वर्णयति दुग्धस्निग्धेति—दुग्धवत् स्निग्धा या स्मिताभा मन्दहासशोभा तन्मिषेण तत्कपटेन विशदाः शुद्धाः निरुपाधित्वात् भक्तकृपायाः

Digitized by srujanika@gmail.com

अतएव दीनबन्धोरिति वक्ष्यति ये कृपोन्मेषाः करुणाप्रकाशाः तएव पीयूषवर्षास्तैःस्वेषां स्वीयानां भक्तानां हर्षं दधाने पुष्णाति मधुरं मनोहरं परिस्पन्दनमीषच्चलनं येन तस्मिन् परिस्पन्दनस्याधरधर्मत्वात् अतएव मन्दः यः श्वासानिलः तेन ईषत्तरलं यत्किशलयं पल्लवं तस्य श्रीरिव या श्रीः तया गरिष्ठे अतिशयेन पूज्ये "गुरुशब्दादतिशयार्थे-इष्ठन् प्रत्ययः" दन्तांशूनां दन्तकिरणानां दम्भेन स्फुटकुसुमरजसां विकचपुष्पपरागाणां सुप्रतिष्ठा शोभनस्थितिर्यस्मिन् तत्र एतेन श्वासस्य मलयानिलत्वं अधरस्य पल्लवत्वं दन्तानां पुष्पत्वं तदंशूनां परागत्वं ध्वनितम् । दीनबन्धोः श्रीनारायणस्य अधरोष्ठे चिन्तां अनुतिष्ठेत् स्मरणां विदध्यात् । ध्यायेत् । अत्र व्याजापह्नुति रूपक परिकराणां सङ्करः ।६७।

आस्येन्दुस्यन्दमानामृतविततशिराद्वारचातुर्यचौर्या-
चार्यारुण्याच्चिरायारुणरुचिरुचिरा श्रीधरस्याधरश्रीः
योगादास्वाद्यमानामृतरसजननी या त्रिलोकीजनन्योः
कामं कामं दुहानाप्यहह दहति तं भाव्यतां देहबन्धात् ॥

आस्यमेव इन्दुः तस्मात् स्यन्दमानं क्षरत् यत् अमृतं चन्द्रस्यामृतरसरूपत्वात् तस्य याः विततः शिराः रसस्रवणमार्गरूपाः, जलनाड्िकाः तासां यद्द्वार–चातुर्यं द्वारवत् चातुर्यं निःसरणसौकर्यं यथा ह्रदादौ एकत्रप्रदेशे जलस्रवणं भवति न सर्वत्र तथा मुखचन्द्रस्यामृतस्रवणमधरदेश एव इति भावः, तच्चौर्ये आचार्या अध्यापिका तादृशसौन्दर्यास्पदमित्यर्थः । अरुणरुचिरुचिरा श्रीधरस्याधरश्रीः श्रीनारायणस्याधरकान्तिः चिराय स्मार्या ध्येया । "रुहलोरर्थदिति वृद्धिः" त्रिलोकीजनन्योः त्रिजगन्मात्रोः लक्ष्मीविश्वधात्र्योः कामं यथेष्टं (कामं प्रकामं पर्याप्तमित्यमरः) कामं मन्मथमनोरथं दुहानापि पूरयन्त्यपि "दुहप्रपूरणे धातोःशानच्" अमृतरसजननी पीयूषास्वादसम्पादिका मोक्षानन्दसम्पादिका च, या च योगात् चित्तवृत्तिनिरोधात् आस्वाद्यमाना समाधिनानुभूयमाना सती देहबन्धात् तं कामं देहबन्धहेतुकं अभिलाषं दहति भस्मीकरोति, अहह आश्चर्यं भाव्यतां चिन्त्यतां एतदाश्चर्यं कामजनकस्य कामदाहकत्वेनाश्चर्यत्वात् अत्र रूपकविरोधयोः सङ्करः । ६८ ।

Digitized by srujanika@gmail.com

माधुर्योद्रेकहृद्यं विपरिणतफलं रूपसम्पल्लतायाः
श्रीप्रेष्ठस्योष्ठबिम्बं स्मरतु रुचिमदाहूतबालार्कबिम्बम् ।
यन्माधुर्य्यस्य तृष्णा निजरमणभुजापंजरान्तः स्फुरन्ती ।
सोत्सेकं छेकभावं कलयति कमलाकारिका कीरकन्या ।६९।

माधुर्य्येति—माधुर्य्योद्रेकेण स्वादातिशयेन हृद्यं हृदयङ्गमं रूपसम्पदेव लता बिम्बीवल्ली तस्याः विपरिणतफलं परिपक्वं बिम्बाख्यं फलं रुचिमदेन शोभातिशयाभिमानेन आहूतं बालार्कबिम्बं येन तत् ओष्ठबिम्बबालार्कबिम्बयोः बिम्बनामसाम्येन स्पर्द्धौचित्यं । "विवादश्च विवाहश्च समयोरेव शोभते इति न्यायात् । श्रीप्रेष्ठस्य श्रीनारायणस्य ओष्ठबिम्बं स्मरतु भक्त इति शेषः । यन्माधुर्य्यस्य यन्माधुर्य्यस्य तृष्णा अत्र सम्बन्धमात्रविवक्षया करणे षष्ठी पूरणगुणेति सुहितार्थकतृषधातुयोगेन समासाभावः । निजरमणस्य भुजापञ्जरमध्ये स्फुरन्ती प्रकाशमाना नतु इतरशुकीव बद्धा कमलाकारैव कमलाकारिका स्वार्थे क प्रत्ययः,कीरकन्या शुकी, सोत्सेकं सातिशयं छेकभावं गृहासक्तपत्त्रित्वं "गृहासक्ताः पत्तिमृगाः छेकास्ते गृहिकाश्चते इत्यमरः । कलयति गृह्णाति । भगवदधर-बिम्बमाधुर्य्यतृष्णा कमला-कीरी प्रेमगुणबद्धेव चाञ्चल्यं विहाय प्रिय-भुजपञ्जरे वर्त्तते इति भावः । अत्र रूपकालङ्कारः । ६९।

राजानं या द्विजानामजमुखजतया विश्रुतातं स्वतातं
भक्त्योपास्ते च किंच स्फुरदरुणरुचं साधु सन्ध्यायमानम्
साधिष्ठां वर्णनिष्ठां वहति तदधरं या पुरस्कृत्य नित्यं
पूज्या राजी द्विजानां प्रणिहित-मनसा स्याद्विजेन्द्रध्वजस्य
।७०।

अत्र त्रिभिःश्लोकैस्त्रिगुणतमोध्वंसनजशोभाशालिनां दन्तानां वर्णनमारभते, राजानमिति द्विजेन्द्रः गरुड़ः स एव ध्वजो यस्य अथवा द्विजेन्द्रषु ब्राह्मणश्रेष्ठेषु ध्वजवत्प्रधानस्य ब्राह्मणोत्तमोत्तमस्य "ब्रह्मज्ञो ब्राह्मणप्रिय" इति विष्णुसहस्रनामोक्तेः । श्रीनारायणस्य द्विजानां दन्तानां ब्राह्मणानाञ्च राजी श्रेणिः "दन्तविप्राण्डजा द्विजाः"

Digitized by srujanika@gmail.com

इत्यमरः। द्विजश्रेष्ठस्य द्विजानुगति प्रसिद्धेः। प्रणिहितं समाहितं यन्मनः तेन समाधिना इत्यर्थः, प्रणिहितं मनो यस्य तेनेति वा भक्तेन इतिश्लेषः, पूज्या पूजनीया स्यात्, या अजमुखजतया भगवन्मुखजन्यत्वेन विश्रुता, विख्याता उभयोस्तत्वप्रसिद्धेः। स्वतातं स्वजनकं द्विजानां राजानं चन्द्रं तत्सदृशं ब्राह्मणश्रेष्ठञ्च पितृश्रैष्ठ्येन पुत्राणां श्रेष्ठ्यात् "भक्तिः पूज्येष्वनुरागः" तया उपास्ते सेवते, इति च पितृसेवायाः परमधर्मत्वात् अन्यत्र भक्त्या विभक्त्या पंक्तिव्यवस्थित्या उपास्ते उपसृत्यास्ते किञ्च पुनः स्फुरदरुणरुचं स्फुरन्ती अरुणारुक् यस्य तं अन्यत्र स्फुरन्ती अरुणस्य सूर्य्यसूतस्य रुक् यत्र साधु शोभनं यथा तथा सन्ध्यायमानं सन्ध्यावदाचरन्तं तदधरं नारायणोष्ठं नित्यं पुरस्कृत्य प्रथममनुष्ठाय अग्रे कृत्वा च साधिष्ठां अतिशयेन साध्वीं वर्णनिष्ठां शोणिमप्रसरणेन निजपार्ज्जमकान्तिनिष्पत्तिं अन्यत्र साधिष्ठां वर्णनिष्ठां ब्राह्मणजाति-निष्पत्तिञ्च "निष्ठा निष्पत्तिनाशान्तयागानिर्वहणेषु चेति" मेदिनी, वहतिनित्यसन्ध्योपासनस्य ब्राह्मणयाधायकत्वात्। अत्र द्विजानां राजीवेति श्लेषोत्थापित उपमालङ्कारध्वनिः। ७०।

स्वच्छन्दं बन्धुरत्वं दधदधरदलद्बन्धुजीवानुबन्धात्
मौकुन्दं दन्तवृन्दं मुदित मुनिहृद्दिन्दिन्दिरं दाम कौन्दं।
बारम्बारं विभाव्यं विभुवररसनाध्यासनौजायितायाः
पूजायै जायते यत्किल कलुषमुषः शारदादेवतायाः॥

स्वच्छन्दमिति—मौकुन्दं मुकुन्दसम्बन्धि नारायणीयं दन्तवृन्दं अधरमेव दलद्बन्धुजीवं स्पष्ट बन्धूकं तस्यानुबन्धात् शोणिमप्रसरणेन संसर्गादित्यर्थः, स्वच्छन्दं स्वतन्त्रं बन्धुरत्वं शोभनत्वं दधत् "बन्धुरः शोभने नम्रे" इति मेदिनी। अतएव मुदितमुनिहृद्दिन्दिन्दिरं मुनिमनो-मधुकरानन्दकं कौन्दं कुन्दकुसुमानां सम्बन्धि दाम माल्यं बारम्बारं पुनः पुनः विभाव्यं। इदं नारायणदन्तवृन्दं आधारबन्धुमधुरं कुन्दकुसुम माल्यमिति विभावयेत्। यत् कौन्दं दाम विभुवरः श्रीनारायणः तस्य रसनायां यत् अध्यासनं अधिष्ठानं उपवेशनमित्यर्थः तेन ओजायितायाः ओजस्विनीवदाचरितायाः "ओजसोऽप्सरसोनित्य" मिति नित्य-

Digitized by srujanika@gmail.com

सकारलोपः । कलुषमुषः अज्ञानाभिन्नकलुषनाशिकायाः शारदादेवतायाः धाम्न्देवतायाः पूजायै पूजार्थं जायते किलेति प्रसिद्धं सरस्वती पूजायां कुन्दकुसुमानां प्राशस्त्यात् "पञ्चम्यां कुन्दकुसुमैः कौन्दीपूज्या प्रयत्नतः। कौन्दीसरस्वतीति व्याख्यातं अत्र दन्तानां सरस्वतीरूपशोभाकारणकारणत्वेन तत्पूजाकारणत्वमितिभावः अत्र रूपकालकारः।

पंक्ति द्वैधानुबन्धि श्रुतियुवतिशिरश्चारुसीमन्तसीमा-
प्रव्यक्तामुक्तमुक्तागुणगुणनिपुणाश्चित्तमारोपणीयाः।
वेदान्तार्थस्य दन्ताधवलिमवलिनः सान्द्रसिन्दूरधारा-
सौन्दर्य्यं धारयन्त्यारभत यदभितः सौष्ठवं सौष्ठलेखा
। ७२ ।

पङ्क्तिद्वैधेति—पङ्क्त्या द्वैधेन द्विविधत्वेन "संख्याया विधार्थे धा इति धा प्रत्ययः" द्विप्रयोश्च धमुञ्जिति धमुञ् "धमुञन्तात्स्वार्थे" इति मलोपः। तदनुबन्धी द्विधा भिन्न इत्यर्थः श्रुतिःयुवतिरिव तस्याः शिरसि या चारुसीमन्तसीमा-तस्याः प्रव्यक्तं स्पष्टं आमुक्तः निहितः यः मुक्तागुणः मुक्तामाला तस्य गुणैः औज्ज्वल्यस्निग्धत्ववृत्तत्वादिभिः निपुणाः कुशलाः श्रुतियुवतिसीमन्तमौक्तिकमालाद्वयशोभानुकारिणः वेदान्तानां सर्वोपनिषदां अर्थस्य तदभिधेयस्य तत्प्रतिपाद्यस्य इत्यर्थः। श्रीनारायणस्य धवलिम्ना वलिनः अतिधवलाः दन्ताः चित्ते आरोपणीयाः चित्ते निधेयाः ध्येया इत्यर्थः, सान्द्रसिन्दूरधारासौन्दर्य्यं सान्द्रसिन्दूररेखाशोभनत्वञ्च धारयन्ती तद्वदरुणा सा ओष्ठलेखा यानभितः यदभितः सौष्ठवं सुष्ठुत्वं अतिवधूसीमन्तमुक्तामाला-वहिर्भागेषु सिन्धूररेखा सौभाग्यं आरभत तच्छोभां दधार इत्यर्थः रूपकं । ७२ ।

ध्यायेद्घोणां घृणाब्धेस्तिलकुसुमतुलासज्जयाप्यर्ज्जयन्ती
माकृत्यामोदमुच्चैः सकलसुमनसामुत्तमामोदकामः।
यातायातैर्यदीयाः श्वसितसततगा द्वारि धारालरोला
रोलम्बाह्वार्थिसार्थाननिशमुपगतांस्तादृशांस्तोषयन्ति॥

अथ त्रिभिः श्लोकैस्त्रिवेदीमयश्वसितां नासिकां वर्णयति। ध्यायेदिति करुणाब्धेः दयासिन्धोः "कारुण्यं करुणा घृणे"त्यमरः। श्रीनारायणस्य तिलकुसुम-तुलायां तिलपुष्पसाम्ये सज्जया उद्युक्तया आवृत्या स्वरूपेण सकलसुमनसां सर्वकुसुमानां देवानां धाराणाञ्च उच्चैर्महान्तं आमोदं सौरभ्यं परमानन्दञ्च अर्जयन्तीं जनयन्तीं तिल-कुसुमसाम्येन तत्सौरभ्यधारणौचित्येऽपि सकलपुष्पसौरभ्यार्जना-दितिभावः, चित्रचरितां घ्राणां नासां उत्तमामोदकामः परमानन्दकामः परमसौरभकामश्च ध्यायेत्। "आमोदो हर्षकामयो"रिति विश्वः। सकल पुष्पसौरभार्जनफलमुपपादयति। यदीया यस्या नासिकायाः सम्बन्धिनः श्वसितसततगाः श्वासानिलाः द्वारिनासाबिलसमीपे धारा लाभ्यते रोलाश्चेति तान् सौरभाशया बद्धपङ्क्तयः लोलारलयोरैक्यं "रोलोलोलश्चञ्चले"ति द्विरूपकोषः—रोलम्बाह्वाः भ्रमरनामानः येऽर्थिनः याचकाः तेषां सार्थान् सततमुपगतान् उपसन्नान् तादृशान् सकल पुष्परसास्वादमात्ररसिकान् यातायातैः गतागतैः तोषयन्ति। एतेन सकलकुसुमसौरभ्यादपि भगवन्नासानिलसौरभ्यमुत्कृष्टं नासानिलस्यार्थिपूजा च ध्वन्यते भगवतः कृपालुता च। ७३।

सर्वेशघ्राणवंशं समभिनिविशतां ब्रह्मधामारुरुक्षो—
रुच्चैर्निःश्रेणिमग्र्यां यमपि च सुषमानामशैलूषयोषा
अध्यारूढा गुणैरुच्छ्रितमतिविततैर्बिभ्रती विभ्रमर्द्धिं
लोकस्या लोकगृध्नोरपहरति चिरोपार्जितां पूर्वलक्ष्मीम्

सर्वेशेति—सर्वेशस्य श्रीनारायणस्य घ्राणमेव वंशस्तं समभि-निविशतां, ध्यानेन प्राप्नोतु मुमुक्षुरितिशेषः। "अभिनिविशश्चेति आधारस्य द्वितीया" घ्राणवंशसाधर्म्यमुपपादयति। ब्रह्मधाम ब्रह्मस्वरूपं-गृहञ्च "धाम देहे गृहे रश्मा"वित्यमरः। आरुरुक्षोः आरोढुमिच्छोः-भक्तस्य अग्र्यां श्रेष्ठां दृढत्वात् उच्चैरुन्नतां, एतेनारोहणक्षमत्वमुक्तम्। निश्रेणीं "निःश्रेणीस्त्वधिरोहणीत्यमरः"। एतेन नासिकाध्याने भगवत्प्राप्तिरुक्ता अतिविततैः ख्यातैः वंशोच्छ्रयणाय सर्वतो विस्तृतैश्च गुणैः सौरभ्यसौकुमार्य सौरूप्यादिभिः रज्जुभिश्च उच्छ्रितमुत्कृष्टं

Digitized by srujanika@gmail.com

उन्नतीकृतञ्च यमपि प्राणवंशे अध्यारूढा आश्रिता अप्रस्थिता च सुषमा परमशोभा तन्नाम्नी शैलूषयोषा नटी "शैलालिनस्तु शैलूषा जायाजीवाः कुशीलवाः" इत्यमरः ।

विभ्रमर्द्धिं विलाससमृद्धिं प्रतिक्षणमुपचीयमानां मनोहरतां नटीभिर्विरचितां अद्भुतां वंशोपरि विविधां भ्रमसमृद्धिं च विभ्रती सती आलोकगृध्नोः ध्यानेन दर्शनाकाङ्क्षिणः भक्तस्यान्यत्र तादृशचित्रनर्तन-दर्शनाकाङ्क्षिणः सर्वस्य लोकस्य चिरोपार्जितां बहुजन्मसञ्चितां अपूर्वां लक्ष्मीं अलक्ष्मीं "स्यादलक्ष्मीस्तु निर्ऋतिरित्यमरः" नासालक्ष्मी-दर्शनादलक्ष्मीनिवृत्तिः सुकरा एव । अन्यत्र अतिचित्रनृत्यदर्शनहर्षेण दत्तां चिरोपार्जितां बहुकालं गृहे सञ्चितां अपूर्वां दुर्लभां लक्ष्मीं वस्त्राभरणसुवर्णमणिमुक्तादिरूपां सम्पदं अपहरति लुण्ठतीत्यर्थः । अत्र रूपकालङ्कारः । ७४ ।

नस्यैरुद्यत्कषायैः कषितुमिव जगत्प्राणरूपैरुपायैः
पुंसां दोषत्रिकोद्यद्भवगदविपदं योगतोऽन्तर्विशन्तीं ।
नासां नासत्यरूपाममृतकरतया विश्रुतामाश्रयेत्तां
श्रीसंज्ञा सैन्धवी बह्वमनुत चकिताधिश्रियं यत्प्रसूतां ॥

तां प्रकरणाद्भगवदीयां नासामाश्रयेत् । कथंभूतां नासत्यरूपां सत्यरूपां "अभावाभावस्य भावरूपत्वात्" "सत्यं विज्ञानमानन्दं ब्रह्मे"ति भगद्रूपस्य सत्यत्वप्रतिपादनात् । "अतएवामृतकरतया मोक्षकरत्वेन विश्रुतां ख्यातां पुनः कीदृशं उद्यत्कषायैः उदितसौरभैः "कषायः सौरभेऽपि चे"ति कोषात् । उपायैः उप समीपेऽयन्ते गच्छन्तीति उपायाः तैः श्वासपवनस्य नासासमीपगतागतविश्रान्तत्वात् । जगत्प्राणरूपैः पवनरूपैः नस्यैः नासिकाभवैः "शरीरावयवाद्यदिति" यत्प्रत्ययः निःश्वासैरुपलक्षितां, इत्थंभूतलक्षणे तृतीया, योगतो ध्यानात् "योगः सन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः, पुंसां ध्यातॄणां दोषत्रिकेण क्रोधलोभमोहात्मकेन दोषत्रयेण उद्यन् उद्गच्छन् उत्पूर्वस्य यमधातोः क्विप्मलोपतुगागमौ च । यः भवः अनादि

Digitized by srujanika@gmail.com

जन्ममरणप्रवाहरूपसंसारः स एव गदः तस्य विपदं विविधं पदं स्थानं नानाशरीरात्मकं कषितुमिव नाशयितुमिव अन्तः स्वान्तं विशन्तीं "कामक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः" इति गीतोक्तेः कषितुमिति हेतूत्प्रेक्षा । श्रीनाम्नी सैन्धवी सिन्धुपुत्री लक्ष्मीः यत्प्रसूतां यस्यां नासिकायामुन्नां अधिकां निरुपमां श्रियं अन्यत्र तादृशशोभालोकनाभावात् चकिता विस्मिता सती यद्बहुमनुत बहुमतवती, नासत्यरूपामित्यर्थान्तरं, अश्विनीकुमाररूपां "नासत्यावश्विनौ दस्रावि"त्यमरः, भगवन्नासायाः नासत्यरूपत्वं नासत्यदस्रौ परमस्य नासे इति भागवतोक्तेः। नासत्ययोः स्वर्वैद्यत्वात्, तयोर्वैद्यधर्मानुपपादयति । अमृतकरतया अमृतहस्तत्वेन च ख्यातां "गुरोरधीताखिलवैद्यविद्यः पीयूषपाणिः कुशलः क्रियासु । गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात्" इति वैद्य-जीवने । पुनः कीदृशः नस्यैर्नासाग्राह्यैरौषधैः उद्यद्भिः सम्पादितैः कषायैः स्वरसादिपञ्चविधैः जगत्प्राणरूपैः जगत्प्राणाभिन्नैः अन्यैः रसचूर्णादिभिरुपायैः पुंसां दोषत्रिकेण वातपित्तकफरूपेण उद्यन् प्राणमध्ये उद्गच्छन् यः भवगदः भवजन्मा गदः, मध्यपदलोपः, ज्वरः स एव विपत् तां कषितुं नाशयितुं योगात् मणिबन्धस्थनाडीज्ञानोपायात् अन्तर्विशन्तीमिव अन्तः प्रविश्य पर्यालोचयन्तीमिव स्थितां तथा वैद्यजीवने "नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं महौषधं । नावनं नस्य-कर्मेति तस्य नामद्वयं स्मृतं" अस्य फले "लाघवं मनसः शुद्धिः स्रोतसां व्याधिसंक्षयः । चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणं" अथातःस्वरसः कल्कः । ज्वरस्य रोगप्राधान्यात् यथा "देहेन्द्रियमनस्तापी रोगाणामग्रजो वली । ज्वरः प्रधानं रोगाणामुक्तो भगवता पुरा ।" इति । अन्यान् गदानित्यर्थः मणिबन्धस्थितां नाडीं वातपित्तकफात्मिकां, तच्छीलामन्तरं सर्वं वैद्यो जानाति रोगिणः इति। क्वाथश्च हिम पाणिडले, श्रेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरं शुभयामुकधान्याकरक्त-चन्दनपद्मकैः वासकेन्द्रजशोशीरगुलुचीकृतमालकैः कैरातकुटजा मुस्तधान्वेन्द्रयवनागरैः दशमूलमहादारु—गजपिप्पलिका युतैः । कृतः कषायः पार्श्वार्त्तिसन्निपातज्वरं जयेत् इति, दत्तापमानसंक्रुद्ध-रुद्रनिःश्वाससम्भवः । ज्वर स्त्रिपादस्त्रिशिराः षड्भुजो नवलोचन, इति,

Digitized by srujanika@gmail.com

ज्वरेत्युपलक्षणं, तथा:-श्रीहर्षः { "किमु तदन्तरुभौ भिषजौ दिवः
स्मरनलौ विशतः स्म विगाहितुं } इति—आन्तरज्ञानं विना वैद्यस्य चिकित्सानर्हत्वात्। एवं वैद्यधर्मानुक्त्वा तयोः शोभातिशयमुपपादयति । पूर्वं श्रीयुक्ता संज्ञा सूर्यप्रिया पश्चात् सैन्धवी वडवारूपेण तपश्चरन्ती श्रियमधि ययोः श्रियमधिकृत्य श्रीविषये चकिता सती "अहो वडवारूपाया मत्त' ईदृशौ परमसुन्दरौ कुमारावुत्पन्नाविति" साश्चर्यं यत्प्रसूतां, ययोर्मातृतां "जनयित्री प्रसूर्माता" इत्यमरः । वहमनुत अहं धन्या इति बहुमतवती, अत्र नासत्यरूपामिवेति श्लेषेणोपमालङ्कारध्वनिः । ७५ ।

अभ्यर्णो कर्णयोः किं स्खलितमलिभरात्तुत्तमुत्तंसपद्म-
द्वन्द्वं भ्राम्यन्मिलिन्दभ्रमकरतरलश्यामलस्निग्धतारे ।
दैत्यौघेऽधर्मधर्माविधिविधिविरुधि क्रुद्धवच्छोणकोणे
त्रैलोक्यत्रातृनेत्रे बहिरनवहितस्वान्तमन्तर्विलोके ।७६।

अथ चतुर्भिः श्लोकैश्चतुर्मुखादिसापेक्षकटाक्षपातमीक्षणद्वयं वर्णयति । अभ्यर्णो इति कर्णयोरभ्यर्णौ समीपे अलिभरात् नुत्तं क्षिप्तं "नुदध्रातोः नुदविद्रो वेति निष्ठा तस्य नः विकल्पे) उत्तंस-पद्मद्वन्द्वं कर्णोपरिकृतनलिनयुगलं स्खलितं किं, उत्प्रेक्षा अत्र वस्तुरूपा। अतएव भ्राम्यन्मिलिन्दभ्रमसम्पादक—चञ्चलश्यामलस्निग्ध-तारके अधर्मधर्माविधिविधिविरुधि, अधर्मो धर्माभावः तेन धर्म-विरुधि अविधिः कर्त्तव्यानुष्ठानाभावः तेन विधिविरुधि "विपूर्वरुध-धातोःक्विप्" इति दैत्यौघे क्रुद्धवत् शोणकोणे त्रैलोक्यत्रातु दुष्टनिग्रहशिष्टानुग्रहाभ्यां त्रैलोक्यस्य पालयितुः श्रीनारायणस्य नेत्रे परिकरालङ्कारः, वहिरनवहितस्वान्तं वाह्यविषयानपेक्षहृदयं यथा तथा प्रत्याहारपूर्वकसमाधिना अन्तर्हृन्मध्ये विलोके पश्यामि, स्मरामीत्यर्थः । ७६ ।

Digitized by srujanika@gmail.com

विष्णोरक्ष्णोरभीक्ष्णं स्मरतु सुमधुराः प्रोच्छलत्प्रेमधारा-
व्यात्युक्षीकेलयोऽनुक्षणसुभगतमश्रीकटाक्षच्छटाभिः ।
याभ्यां नातिस्वदन्ते भवदवविधुरान् मूर्च्छितात्मीयसेकं
सिञ्चन्त्यां भक्तलोकान् स्फुरदुरुकरुणाशीतवीक्षाभिरद्भिः
। ७७ ।

विष्णोरिति अभीक्ष्णं सन्ततं श्रीविष्णोः श्रीनारायणस्य अक्ष्णोः अक्षिणी स्मरतु "अधिगर्थदयेशां इति तद्योगे कर्मणि षष्ठी" अनुक्षणं प्रतिक्षणं सुभगतमा अतिशयशोभनाः याः श्रीकटाक्षच्छटाः शृङ्गाररसतरङ्गितकमलापाङ्गविलोकनपरम्पराः ताभिः सुमधुराः अति मनोहराः प्रोच्छलन्ती उद्वेलतया प्रसरन्ती या प्रेमधारा प्रणयप्रवाह स्तया व्यात्युक्षीकेलयः कर्थः, कटाक्षस्वप्रेमधाराकरणिकाः परस्परेक्षण-लीलाः "व्यतिपूर्वात् उक्षधातोः कर्मव्यतिहारेण च स्त्रियामिति णच् ।" णचः स्त्रियामञिति "स्वार्थेऽञ" आदिवृद्धिः न कर्मव्यतिहारे "इति ऐजभावः ।" टिड्ढाणञिति "ङीप् । स्फुरन्ती प्रसरन्ती या उरुकरुणा तया शीताः शीतलाः वीक्षाः अवलोकनान्येव आपः जलानि ताभिः व्यस्तरूपकं, भवदवेन संसारदावाग्निना विवशान् भक्तलोकान् मूर्च्छितात्मीयसेकं मूर्च्छाप्राप्तं आत्मीयं भ्रातृपुत्रादिमिव "उपमाने कर्मणि चेति कर्मणि" णमुल्, सिञ्चद्भ्यां अक्षिभ्यां इति चतुर्थी । नातिस्वदन्ते, नरनिरोचन्ते । भगवन्नेत्राभ्यां संसारतप्तस्वभक्ताधिकरणक करुणानुसार—स्वकटाक्षवृष्टिर्यथा रोचते न तथा रमाप्रेमातिशयमय कटाक्षदर्शमनुप्रेमोत्कर्षसम्पन्नापाङ्गलोकनतरङ्गितेति भावः, रूपकं ।७७।

वक्त्रेन्दाविन्दिरायाः शिथिलरसमिव ब्रह्मसौख्यैककाण्डे
कुर्वद्दौर्भाग्यदुःस्थावितरसुरगणप्रेक्षणे ऽन्धंभविष्णु ।
एकैरस्याधिकेष्टान् शुकसनकमुखान् द्रष्टृसंमर्दनष्टा—
नन्वेष्टुं तातचारं चरदभिककुभं चक्रिचक्षुर्विचिन्त्यं ।७८।

Digitized by srujanika@gmail.com

वक्त्रेन्द्राविति—इन्दिरायाः लक्ष्म्याः वक्त्रेन्द्रौ शिथिलानुरागमिव ब्रह्मशर्वौ अकाण्डे अनवसरे अपराधाभावेऽपि दौर्भाग्यदुःस्थौ सादर-वीक्षणाभावात् कुर्वन् अन्यदेवावलोकने अन्धंभविष्णु, सद्वीक्षणा-भावात्, कुतः एकौरस्याधिकेष्टान् एकस्वजातपुत्रादप्यनन्तगुणप्रेम-पात्रीभूतान्,, स्वद्रष्टृणां संमर्देन संकुलीभावेन नष्टान् अदर्शनं प्राप्तान् तेषां पञ्चवर्षार्भकतुल्यरूपत्वात् शुकसनकादीन् अन्वेष्टुं मृगयितुं अभिककुभं प्रतिदिशं तातचारं तातइव "उपमाने कर्त्तरि" चेति कर्त्तरि णमुल् चरत् संचरत् चक्रिचक्षुः श्रीनारायणनेत्रं विचिन्त्यं ध्येयं । अत्र लक्ष्म्याद्यपेक्षया भक्तेषु भगवतः प्रेमाधिक्यं सूचितं तथा च श्री-भागवते, उद्धवं प्रति श्रीभगवान्, "न तथा मे प्रियतमः पद्मयोनिर्न शङ्करः न च संकर्षणो न श्री नैवात्मा च यथा भवानिति । ७८ ।

वृन्दैरिन्दीवराणां जलजवरयुजां स्व-स्व-पादप्रसादा-
त्कादाचित्कीं श्रयद्भिः श्रियमनिशशुभा दुर्लभा यस्य शोभा
साक्षाल्लक्ष्म्या यदीक्षा समुदयति मुदे ब्रह्मणापीक्ष्यमाणा(१)
चेतश्चालोचनीयं नयनयुगमदः पुष्पवल्लोचनस्य । ७९ ।

वृन्दैरिति--जलजवरयुजां पद्मोत्तमयुक्तानां इन्दीवराणां नीलो-त्पलानां वृन्दैः कीदृशैः; भगवन्नेत्रयोः सूर्य्येन्दुरूपत्वात् स्वस्वपादप्रसादः स्वस्वकिरणानुग्रह एव स्वस्वचरणप्रसादः "पादरश्म्यङ्घ्रि-तुर्य्यांशे" इत्यमरः । कादाचित्कीं ननु सर्वदा, दिवा पद्मानां विकाशा-त्तथा रात्रौ कुवलयानांविकाशात् श्रियं शोभां लक्ष्मीञ्च श्रयद्भिः सद्भिः अनिशशुभा नित्यमनोहरा ननु पद्मादिवत् कादाचित्कीति भावः, यस्य नयनयुगस्य लक्ष्मीः शोभा दुर्लभा भवतीति शेषः, स्वल्पधनेन महा-धनिकस्य सम्पदिवेति भावः ।

ब्रह्मणाऽपि सकललोकस्रष्ट्रापि ईक्ष्यमाणा अभिलक्ष्यमाणा यस्य ईक्षा दर्शनं साक्षाल्लक्ष्म्यास्तत्पत्न्या मुदे प्रीतये समुदेति संजायते । यदीक्षा लक्ष्म्या लक्ष्मीत्वसम्पादिका अन्यस्य किं वक्तव्यमिति भावः । पुष्पवल्लोचनस्य सूर्य्येन्दुनेत्रस्य "पुष्पवन्तौ दिवाकरनिशाकरौ"

Digitized by srujanika@gmail.com

इत्यमरः। नारायणस्य अदः नयनयुगं चेतसि आलोचनीयं विभाव्यं ध्येयं भक्तैरिति शेषः। अत्र विशेष्यस्य साभिप्रायत्वात्परिकरः। ७६॥

(१) पीष्यमाणा (ग, घ) *अभिलष्यमाणा (अर्थः)

आकीर्णौ: कर्णिकाग्रोचितखचितलसत्पद्मरागांशुजालै-
र्लाक्षालिप्तेन्द्रनीलस्थलकलिकुपितौ तौ कृपालोः कपोलौ।
ध्येयौ ताम्बूलपंकैः शबलितवपुषौ चुम्बनाडम्बरोत्थै-
र्मत्वा यौ लांछनं प्रोञ्छितुमुदितह्रियौ व्याप्रियेते प्रिये ते
८०

अत्र त्रिभिः श्लोकैस्त्रिपादविभूतिसुलभं श्रीनारायणस्य कपोलद्वयं बर्णयति आकीर्णौरिति—कर्णिका कर्णभूषणं—तदग्रे तत्परिसरे उचिताः खचिताः शोभाजनकतया निवेशिता लसन्तः शोभमाना ये पद्मरागा माणिक्यमणय—स्तेषामंशुरागैः आकीर्णौ अतएव लाक्षालिप्त यत् इन्द्रनीलस्थलं तेन यः कलिः कलहः श्यामवर्णो शोणिमसंक्रमाद् वर्णसाम्यस्पर्द्धाहेतुकस्तेन कुपिताविव स्थितौ कृपालोः श्रीनारायणस्य तौ कपोलौ ध्येयौ। ते प्रिये लक्ष्मीविश्वधात्र्यौ यौ कपोलौ स्वचुम्बनारम्भसंक्रान्तताम्बूलपंकैश्चित्रितरूपाविति मत्वा उदितह्रियौ जातलज्जे सत्यौ लाञ्छनं ताम्बूलरागचिह्नं प्रोञ्छितुं व्याप्रियेते—व्यापृतवत्यौ अत्र रूपकगर्भोत्प्रेक्षाभ्रान्तिमदलङ्काराणां सङ्करः। ८०।

संसृष्टे भूतिजुष्टैश्चलकरनिकरैः कुण्डलोद्यन्मणीनां
यच्छेदच्छेऽस्य गण्डस्थल-मुकुरतले मानसं संमुखीने।
चित्तं यत्नाभिमुख्ये प्रसरति परमानन्दसन्दोहसान्द्रं
योगीन्द्रास्ते स्वरूपं किमपि विरहिताकारमालोकयन्ति
। ८१।

संसृष्ट इति—भूतिजुष्टैरुत्कर्षसम्पन्नै भस्मोद्धूलितैश्च कुण्डलो-द्यन्मणीनां कुण्डलद्वयोपरि प्रकाशमानरत्नानां चलकरनिकरैः कुण्डल-

Digitized by srujanika@gmail.com

द्वयचाञ्चल्यात् चञ्चलैः किरणसमूहैः हस्तसमूहैश्च संसृष्टे संपृक्ते अतएव अच्छे निर्मले सम्मुखीने स्वचित्तसंसमुखगते गण्डस्थलमेव मुकुरतलं दर्पणस्वरूपं तस्मिन् तयोरित्यर्थः "स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेणेति" प्रायग्रहणात् एकत्वेन द्वित्वं गम्यते मानसं चित्ते यच्छेत् ददातु भक्त इति शेषः। कुण्डलद्वयं ध्यायेदित्यर्थः, पुनः कीदृशौ, यत्र गण्डस्थलमुकुरतले अभिमुखे मुखाग्रे प्रसरति सति ते योगीन्द्रा ध्याननिरता योगिश्रेष्ठाः स्वरूपं स्वात्मानं परमानन्दसन्दोहसान्द्रं परमानन्दरूपं सान्द्रं निविडं च "आनन्दो ब्रह्मणो रूपमिति, आनन्दो वै ब्रह्मेति" श्रुतेश्च, परानन्दसन्दोहेन सान्द्रं निरन्तरमिति वा लवणगुडकन्यायेन भेदेऽप्यभेदोपचारः। अतएव विरहिताकारं त्यक्तपूर्वस्थितप्राकृतशरीरं किमप्यनिर्वाच्यं यथा तथा अलोकयन्ति पश्यन्ति ध्यायन्तीत्यर्थः ध्याने शरीरं त्यक्त्वा योगिनः परात्मस्वरूपा भवन्तीति भावः। अत्र विरुद्धकार्योत्पत्त्या विषमालङ्कारः। ८१।

स्निग्धश्यामामलेन्द्रोपलविपुलतरादर्शदृश्यं हतारि-
व्रातोटोपं (क) कपोलस्थलफलकयुगं धर्मपालस्य धार्य्यं ।
सद्यः प्रच्छाद्य गात्रे स्थितिचतुरतया यत्र धर्मौ सकामा-
कामौ अखड्गलेखे खलु मिलितशिखे युध्यमानौ दधाते
। ८२ ।

स्निग्धेति—स्निग्धाः चिक्कणाः श्यामा नीला अमला निर्मलाश्च ये इन्द्रनीलोपला इन्द्रनीलमणयस्तेषां सम्बन्धिनौ तन्मयावित्यर्थः विपुलतरावतिविस्तृतौ यावादर्शौ दर्पणौ तद्वद् दृश्यं दर्शनीयं रुचिरमित्यर्थः इन्द्रनीलमणिमयदर्पणवत् शोभमानं, हतः छिन्नः अरिव्रातस्यासुरसमूहस्य आटोप आरम्भो येन तत् यद्दर्शनाद्दैत्यानामाटोपभङ्गो भवतीत्यर्थः। धर्मपालस्य श्रीनारायणस्य कपोलस्थले गण्डस्थल एव फलके पीठे तयोर्युगं द्वयं धार्यं चेतसा भक्तानामिति शेषः ध्येयमित्यर्थः सकामाकामौ कामनाविशिष्टकामनारहितौ धर्मौ स्थिति चतुरतया स्थित्यां मर्यादायां स्थैर्ये च यच्चातुर्यं तेन गात्रे शरीरद्वयं यत्र कपोलस्थलफलकयुगे प्रच्छाद्य पिधाय युध्यमानौ अन्योन्यं युद्धं कुर्वाणौ

Digitized by srujanika@gmail.com

सन्तो मिलितशिखे प्राप्तज्वाले भुघावेव खड्गलेखे कर्मणी, सद्यः झटिति दधाते धारयतः खलु, युध्यमाना हि प्रकाशमानज्वालां खड्गलेखां धृत्वा युध्यन्तीत्यर्थः । ७२ ।

(क) घ्राताघातं (क, ग)

यत्सत्यं सत्यवाग्व्यवसितिविदिताख्यैकसख्यात्स्वकीयाद्
यां सर्वाशासवित्रीं श्रुतिरुदितवती विश्वविश्वासपात्रं।
भक्तेच्छापूर्त्तिकैमिच्छिकनियमवशाद् यत्र कर्णप्रसिद्धिः
शुश्रूषेत श्रियाढ्यां हृदि मृदितमले तां श्रुतिं श्रीप्रियस्य
। ८३ ।

अथ त्रिभिः श्लोकैस्त्रयीदुर्लभविभवं श्रोत्रद्वयं वर्णयति, यत्सत्यमिति विश्वविश्वासपात्रं सकललोकविश्वासयोग्यं, श्रुतिर्वेदः "श्रुतिः स्त्री वेदआम्नाय" इत्यमरः, स्वकीयादात्मसम्बन्धिनः सत्यवाग्व्यवसितिविदिताख्यैकसख्यात् , सत्यवाक् सत्यवादे या व्यवसितिर्व्यवसायस्तया विदिता ख्याता या आख्या श्रुतिरिति नाम तया हेतुना एकसख्यात् मुख्यमित्रत्वात् यां श्रुतिं कर्णं सर्वाशानां सर्वजनतृष्णानां सवित्रीं दर्शनमात्रेण जनयित्रीं वेदपक्षे दिशः श्रोत्रादिति श्रुत्या" सर्वदिशां जनयित्री विश्वविश्वासपात्रं सर्वजन-विश्वासभाजनं च उदितवती उक्तवती भवतीति यन्नदुवचनं सत्यं, यत्तदोर्नित्यसम्बन्धात् सकलजनश्रवणास्पदं सकलजनाशासम्पादिका चेति स्वसखी श्रुतिर्वदतिस्मेति यत्तत्सत्य मिति भावः । भक्तानां इच्छापूर्त्तौ मनोरथपूरणे कैमिच्छिकनियमस्य किमिच्छाप्रश्ननियमस्य वशाद्योगात् किमिच्छा भवतामिति भक्तान् प्रति या पृच्छा तद्वशादि-त्यर्थः यत्र श्रुतौ कर्णप्रसिद्धिः कर्णइति ख्यातिर्भवति सन्ततं तद्दाकर्णनतन्त्रत्वादिति भावः। राधेयस्यापि कैमिच्छिकनियमोऽभूदिति च गम्यते, मृदितमले प्रक्षालितपापे-निष्पाप इत्यर्थः हृदि स्वान्ते श्रीप्रियस्य लक्ष्मीनायकस्य श्रीनारायणस्य श्रिया शोभया आढ्यां सम्पन्नां तां पूर्वोक्तां श्रुतिं कर्णं शुश्रूषेत सेवेत "कर्णशब्दग्रहौ श्रोत्रं

Digitized by srujanika@gmail.com

श्रुतिः स्त्री श्रवणं श्रव" इत्यमरः । सेवकाः सेव्ये वृत्तकरणा भवन्तीति-न्यायात् श्रोतुमिच्छेदितिभावः ध्यायेदिति तात्पर्यार्थः । ८३ ।

अन्तः संयन्तुकामेन्द्रियगणगजतायूथनाथं मदर्द्धे-
रुद्दामानं मनोनामकमृषिजनता यावपाशाद्रियेत ।
याभ्यां यद्धात्मनां न प्रभवति भवजो दुस्त्यजोऽप्यस्तजन्मा
भूयो वद्धस्य वन्धोऽक्षजित इव हरेस्तौ स्मरेत् श्रोत्रपाशौ

अन्तरिति—अपाशा अपगतसुवर्णादितृष्णा पाशरहिता च ऋषिजनता मुनिजनसमूहः, "ग्रामजनबन्धुसमूहेत्यादिना समूहार्थेतल् । मदर्द्धैः मत्ततासम्पत्तेर्हेतोरुद्दामानमुत्शृङ्खलं मनोनामकं मनोरूपं इन्द्रियगणगजतायूथनाथं इन्द्रियगणाश्चक्षुरादीन्द्रियाण्येव गजा-स्तेषां समूहे यूथनाथं यूथपं मत्तगजमित्यर्थः अत्र शिकभागवतवत्स-मासः ।" गजाश्चेतितल् । अन्तरन्तःकरणे संयन्तुकामा बद्धमनाः सती "तुं काममनसोरपीति मकारलोपः यौ श्रोत्रपाशौ आद्रियेत सत्कुर्वीत गृह्णीतेत्यर्थः । याभ्यां श्रोत्रपाशाभ्यां बद्धात्मनां बद्धमनसां ध्याननिष्ठानां जनानां दुस्त्यजो दुष्परिहरोऽपि संबन्धसामान्ये षष्ठी, भवजः संसारजन्यो बन्धः अस्तजन्मा पुनरुत्पत्तिरहितः सन् बद्धस्य संसारबन्धयुक्तस्य, अक्षजितः अक्षाणि इन्द्रियाणि जितवतः "अक्ष-मिन्द्रिय इत्यमर" जितेन्द्रियस्येव भूयः पुनर्न प्रभवति समर्थो भवति भवबन्धस्य जितेन्द्रियेष्विव बद्धयाविषु सामर्थ्यप्रसरो न भवतीति भावः हरेः श्रीनारायणस्य सम्बन्धिनौ तौ श्रोत्रपाशौ श्रोत्रे कर्णाविव पाशौ रज्जू संस्मरेत् ध्यायेत् सकलेन्द्रियप्रवर्त्तकमनःसंयमनसमर्थं स्वचिन्तकभववेदनाविनाशनसमर्थं यत् श्रीहरिकर्णपाशद्वयं अपाशा अपि मुनिजनाः सत्कुर्वन्ति तन्निष्ठता भक्तानामतियुक्तेति भावः । अत्र विरूपघटनारूपो विषमालङ्कारः । ८४ ।

योगाध्वप्रौढदूरास्तुटिनगुणघटो जुष्टतीर्थोऽमृतार्थी
धर्मद्रव्यैकूपकर्त्तुर्विशदसुदृढपदं कर्णकूपे कृपालोः
यद्भूषाश्मांशुपूरं निजनिकटचरं दर्शनादावभाव्य
दिव्यर्षीणां दिदृक्षाभरपरितृषिताः पंक्तयो धावन्ति गात्रः ।

Digitized by srujanika@gmail.com

योगाध्वेति—योगाध्वनि योगमार्गे अष्टाङ्गरूपे परमात्मध्याने प्रौढतृष्णाःदृढरुचिरतएव त्रुटितगुणघटः छिन्नगुणगणः घटाशब्दः समूहवाची निर्गुणः तादृशस्यैव तत्राधिकारात् । जुष्टतीर्थः सेवितगुरुः गुरुसेवां विना योगज्ञानाभावात् । ईदृशः अमृतार्थी मोक्षार्थी जनः स एव जलार्थी "पयःकीलालममृतमित्यमरः । योगस्य वृत्त्युपायस्य अध्वनि यद्वा यः अगाध्वनि कुटुम्बपोषणार्थं द्रव्यसम्पादनाय पर्वतमार्गभ्रमणेन प्रौढतर्षः तृषित इत्यर्थः । त्रुटितौ गुणघटौ रज्जुकलसौ यस्य सः तत्रापि जुष्टतीर्थः परिशीलितावतरणमार्गः कूपे पाषाणेष्टकाभिरवतरणार्थं सोपानानि लोकसिद्धानि भवन्ति । ईदृशः पान्थश्च, धर्मस्य पूर्त्तरूपस्य चतुर्वर्गान्यतमस्य च, ऋद्ध्यै वर्द्धनाय कूपकर्त्तुः खानितकूपस्य धार्मिका मार्गे कूपं खानयन्तीति-प्रसिद्धम् । कौः पृथिव्याः उपकर्त्तुश्च दुष्टनिग्रहशिष्टपालनाभ्यां रक्षकस्य अतएव कृपालोः श्रीनारायणस्य दृढं पदं समाध्यात्मकव्यवसायं यथातथा स्थिरपदञ्च तादृशस्यैव कूपप्रवेशौचित्यात् करणकूपे विशतु ध्यानेनेति भावः, विप्रर्षीणां नारदादीनां दिदृक्षाभरेण कुण्डल-मण्डित-कर्णशोभादर्शनेच्छातिशयेन परितृषिताः जाताभिलाषाः पिपासायुक्ताश्च गावः नेत्राणि धेनवश्च निजनिकटचरं दर्शितः आहावभावः कूपसमीपस्थजलाशयत्वं येन तं "आहावस्तुनिपानं स्यादुपकूपजलाशय" इत्यमरः, गवां जलपानार्थं कूपकर्तृभिः कूपसमीपेऽघश्यं जलाशयः पाषाणादिभिः क्रियते प्रसिद्ध तद्द्वयोः कर्णयोः भूषे कुण्डले तज्जमणिकिरणा एव पुरोजलसमूहस्तं पातुमिति शेषः पश्या अत्र गावः धावन्ति पश्य इत्येकवाक्यम् महाभाष्यकाराद्यभिमतं पश्य मृगो धावतीत्यादिवत् नतु वाक्यद्वयम् दर्शनान्तरसम्मतम् । "आख्यातशब्दे भागाभ्यां साध्य साधनवर्त्तिता प्रकल्पिता, यथा शास्त्रे स घञादिष्वपि क्रमः" । अस्यार्थः । आख्यातशब्दे पश्य मृगो धावतीत्यादौ भागाभ्यां तिङन्ताभ्यां यथाशास्त्रेण साध्यसाधनवर्त्तिता प्रकल्पिता, घञादिष्वपि स एव क्रमः एतेन धावतिक्रियापश्यति-क्रिययोः साधनसाध्यभावः, पश्यक्रियां प्रति धावनक्रियायाः कर्मत्वञ्च तथाचानेन गद्यपद्यभिन्नाश्रयिका या वर्त्तमाना धावनक्रिया तद्विषयक यदिष्टसाधनीभूतं दर्शनं तदनुकूलभावनेति बोधः । दिङ्मात्रं दर्शितम्

Digitized by srujanika@gmail.com

ग्रन्थविस्तरभयात् प्रपञ्च उपेक्षितः, अत्र श्लेषोत्थापितः रूपकालङ्कारः । ८५ ।

त्रस्तौ वैधुन्तुदारुन्तुदरदकदनात्स्वाभयं याचमानौ
ये नूनं वेपमानावुडुपतितपनौ कर्णजाहं जिहानौ ।
प्रीत्या प्रत्युद्गतौ चायतनयनयुगेनात्ममूर्त्यन्तरत्वात्
ध्यायेद्राहुद्रुहस्ते रुचिभररुचिरे कुण्डले गण्डलोले ।
८६ ।

अत्र त्रिभिः श्लोकैस्त्रिलोकलोभनीये कुण्डले वर्णयति— अङ्गभिन्नत्वेऽपि भगवदाकल्पत्वादुवर्णनौचित्यं, त्रस्ताविति ।— ये कुण्डले वैधुन्तुदाः तत्सम्बन्धिनः अरुन्तुदाः मर्मस्पृशः ये रदाः दन्तास्तेभ्यः कदनात् "विध्वरुषोस्तुद इति खश्" । "अरुर्द्विषदजन्तस्येति मुम्", त्रस्तौ अतएव वेपमानौ कर्णजाहं कर्णमूलं जिहानौ प्राप्तौ "ओहाङ् गतौ शानचि रूपं" स्वाभयं याचमानौ, आत्ममूर्त्यन्तरत्वात्, स्वापरमूर्त्तित्वेन आयतनयनयुगेन च प्रीत्या प्रत्युद्गतौ उडुपतितपनौ "तपनस्याभ्यर्हितत्वेऽपि उडुपतिशब्दस्याजाद्यन्तत्वात् पूर्वत्वं", नूनं शङ्के, रुचिभररुचिरे राहुद्रुहः गण्डलोले ध्यायेत् । अत्र राहुद्रुह इति राहुभयशमकत्वेन साभिप्रायत्वात् परिकरालङ्कारः । कुण्डलयोरुडुपतितपनत्वेनोत्प्रेक्षातदुत्प्रेक्षणा च । ८६ ।

स्थाप्यः संकल्पतल्पे मणिमकरमुखा-
कारशिल्पोऽस्य कर्णा—
कल्पोऽम्भोयन्त्रकल्पः कलयत
सुधियोऽनल्परत्नांशुवेशः
त्रैलोक्यावासयोग्यामपि विपुल-
वपुर्वापिकां पूरयित्वा
धावल्लावण्यपूरः परिवहति बहिः
साध्वनेनाध्वनेति । ८७ ।

स्थाप्य इति—मणिभिः मकरमुखाकारः शिल्पो यस्य सः अम्भोयन्त्रकल्पः जलमार्गस्य मकरमुखाकारत्वं लोके प्रसिद्धम्, अनल्पः रत्नांशुभिः वेशः नेपथ्यं यस्य सः, यद्वा रत्नांशूनां वेशः प्रवेशः यस्मिन् सः, अस्य नारायणस्य कर्णाकल्पः कर्णभूषणं संकल्पः मनोव्यापारः समाधिरिति यावत् "संकल्पः कर्ममानस"मित्यमरः स एव तल्पं तस्मिन् स्थाप्यः स्थापनीयः। यथा तल्पाच्चिरमुत्तिष्ठति तथा चिरं समाधौ ध्येय इत्यर्थः, त्रैलोक्यावासभोग्यामपि भगवतः कुक्षिस्थित-ब्रह्माण्डत्वात् विपुला विस्तीर्णा या वपुर्वापिका देहसरसी तां पूरयित्वा धावन् मार्गं प्राप्य प्रसरन् लावण्यपूरः अनेन अध्वना मार्गेण साधु शोभनं यथातथा बहिः परिवहति उच्छ्वसिति इति हे सुधियः कलयत विचारयत । रुद्धमार्गस्य जलस्य मार्गान्तरेण निष्क्रामणं परिवाहः" जलोच्छ्वासाः परिवाहा इत्यमरः। अत्र मकरकुण्डलस्य जलप्रणालीमुखमकरयन्त्रत्वेन भगवद्देहस्य वापीत्वेन लावण्यस्य जलत्वेन उत्प्रेक्षणात् उत्प्रेक्षालङ्कारः । ८७ ।

द्रुह्यन्तौ मह्यमस्य श्रवणमलभुवौ भाविनौ दानवौ तौ
निद्रागन्तुर्युगान्ते द्रुहिणहृदि समुत्त्रासमुत्थाप्यमित्थम् ।
साक्षात्प्रक्षालयन्त्यावपि मणिकिरणैर्निर्मलं निर्मिमाणे
कर्णान्तः कर्णभूषे प्रतिभवभिषजः प्रौढचेती
बुभूषेत् । ८८ ।

द्रुह्यन्ताविति—युगान्ते प्रलये निद्रां गन्तुः निद्राणस्य अस्य श्रीनारायणस्य श्रीकृष्णस्य श्रवणमलभुवौ भाविनौ तौ दानवौ मधुकैटभौ, मह्यं द्रुह्यन्तौ "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इत्थं द्रुहिणहृदि समुत्थाप्यं समुत्थितं त्रासं भयं प्रक्षालयन्त्यौ ब्रह्मनस्त्रासनिरसनं कर्णमलक्षालनमिति मणिकिरणैः कर्णान्तः निर्मलं निर्मिमाणे भवभिषजः संसाररोगचिकित्सकस्य श्रीनारायणस्य कर्णभूषे कुण्डले प्रति ते लक्ष्यीकृत्य "लक्षणेत्थंभूताख्यानभाग-वीप्सासु प्रतिपर्यनव इति गतिसंज्ञा, तद्योगे द्वितीया" प्रौढचेताः

Digitized by srujanika@gmail.com

ध्यानेन कर्णाभूषणोर्निमग्नचित्तः भवितुमिच्छेत् । "सम्नन्ताद्भ्रशातोरिति रूपम् तद्योगे प्रोच्छेतःशब्दात् अभूततद्भावे च्विः टिलोपश्च" अत्र कुण्डलमणिकिरणानां भगवत्कान्तिनिर्मलीकरणस्य ब्रह्ममनआसनिरसनात्सम्बन्धेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिः । ८८ ।

धीशैलूषीं विशाले समसमसृणतले दीपिते दीपिकाभिः
कैरिटश्मच्छटाभिर्नटयतु निटिलोत्संगरंगे त्रिमूर्त्तेः ।
यत्र त्रैलोचनं लोचनमनलमयं बाधमानस्य दासां-
स्त्रासार्थं शर्वशत्रोस्तुलयति तिलको निस्तलो रोचनायाः
। ८९ ।

अत्र त्रिभिः श्लोकैस्त्रिपादविभूतिलभ्यां, श्रीनारायणभालपट्टीं वर्णयति धीशैलूषीमिति । विशाले विस्तीर्णे समानस्निग्धतले किरीटसम्बन्धि मणिश्रेणिभिः दीपिकाभिः दीपिते प्रकाशिते त्रिमूर्त्तेः सृष्टिस्थितिसंहारार्थं गृहीत-ब्रह्मादिमूर्त्तेः श्रीनारायणस्य निटिलोत्सङ्ग-रङ्गे ललाटपट्टनटनस्थाने सर्वाणि विशेषणानि निटिलोत्सङ्गरङ्ग-साधारणानि धीरेव शैलूषी तां नटयतु भक्त इति शेषः, यथा रङ्गं शैलूषी न त्यजति स्वनृत्तित्वात् । तथा धीः निटिलोत्सङ्गं ध्याये-दित्यर्थ, यत्र निटिलोत्सङ्गे निस्तलोवर्त्तुलः रोचनायाः तिलकः दासान् भक्तान् बाधमानस्य शर्वशत्रोः कामस्य त्रासार्थं अनलमयं त्रैलोचनं लोचनं शिवस्यनेत्रं तुलयति समीकरोति । शिवनेत्रवत् कामं भीषयति, अत्र रूपकालङ्कारः । ८९ ।

वक्त्राब्जासंगभृगीभवदलककुलाकारकालाक्षराणां
विभ्राणां धोरणीं, हृद्भुवि भुवनगुरोर्भावयेद्भालपट्टीम् ।
अभ्यस्यन्तीव यस्यां पटुमुनिवटवोऽध्येतुमध्यात्मविद्यां
श्रद्धावद्धावधाना अपरिचितचरीं मातृकां कामपीमाम्
। ९० ।

वक्त्राब्जेति—वक्त्राब्जासङ्गे भृङ्गीभवद्यत् अलककुलं तदाकारा ये कालाक्षरा मसीश्यामलवर्णास्तेषां धोरणीं श्रेणीं विभ्राणां

भुवनगुरोः, जगत्पूज्यस्य मुनिवटुपाठकस्य, एतेन परिकरालङ्कारः इति साभिप्रायविशेषणत्वात् भालपट्टीं हृद्भुवि हृदयस्सीमनि भावयेत् । यस्यां भालपट्ट्यां अध्यात्मविद्यां ज्ञानप्रतिपादिकां विद्यां अध्येतुं श्रद्धायां बद्धावधानाः श्रद्धालवः पटुमुनिवटवः ब्रह्मचारिणो मुनिकुमाराः अपरिचिततरीं पूर्वं अनभ्यस्तां कामपि इमां मातृकां आदिक्षान्तां लिपिं अभ्यस्यन्तीव प्रथमं मातृकामयान् वेदान्ध्यस्य तज्जन्यज्ञानेन भगवद्भालपट्टलिखितालकाभिन्नमातृकाभ्यासेन जनित-ब्रह्मानन्दा भवन्तीतिभावः रूपकं उत्प्रेक्षा च । ६० ।

कोटीरावद्धनानाविधमणिकिरणैरुल्वणालेख्यलक्ष्मीः
श्रीभर्तुर्भालभित्तिः स्वलवणिमसुधास्निग्धमूर्त्तिर्विभाव्या
प्रत्याहारोपवासादनुदनुजरिपुध्यानपीयूषयूषै—
स्तन्द्रालुः पारयित्वा श्रयति यतिमतिर्यामुपघ्नीं चिराय।६१।

कोटीरेति—कोटीरावद्धानां नानाविधमणीनां किरणैः उल्वणा उत्कटा आलेख्यलक्ष्मीः चित्रशोभा यस्यां सा स्वलवणिमा स्वकीय-लावण्यं स एव सुधा दग्धशङ्खनखजन्यपाषाणादिनिर्मितगृह-परिष्कारकद्रव्यविशेषः तया स्निग्धमूर्त्तिः यथा गृहे सुधालेपेन प्रतिविम्बादिकं जायते एवमङ्गे लावण्येनेति भावः । श्रीभर्त्तुः भालभित्तिः ललाटकुड्यं विभाव्या ध्येया भालस्य भित्तिकार्य्यमार्थयति । प्रत्याहारः इन्द्रियाणां स्वविषयेभ्यो निवृत्तिः स एव उपवासः भोगाभावात् तस्मादनु अनन्तरं दनुजरिपोः श्रीनारायणस्य ध्यानं मनसो ध्येयैकनिष्ठतयावस्थानं तदेव पीयूषयूषाः, अमृतमण्डाः तैः ध्यानस्य प्रत्याहारानन्तरं यत्पारयित्वा पारणां कृत्वा उपवासस्य व्रतरूपत्वात् । पारणान्तं व्रतं कुर्य्या"दिति स्मरणात् तन्द्रालुः घूर्णमाना उपोषितस्य भोजनानन्तरं तन्द्रायोगात् । यतिमतिः सा कापि स्त्री यां भालभित्तिं चिराय उपघ्नीं पृष्ठावलम्बां "उपघ्न आश्रयतीति हन्तेरप्" श्रयति तन्द्रालुः किमप्यचलस्य तिष्ठतीति भावः । अत्र रूपकालकांरः । ६१ ।

Digitized by srujanika@gmail.com

त्रातुं तापत्रयार्त्तान् स्वचरणशरणान् छाययोच्छ्रायभाजा
कारुण्योदञ्चिकिञ्चिच्चलितललितया संज्ञयाश्वासयन्तीम्
आम्नायस्वद्रुमाणां स्थगितशिखमुपस्कुर्वतीं तां त्रिधाम्नो-
र्भ्रूनाम्नीं कल्पवल्लीं विपुलबहुफलां पालयेच्चित्तसीम्नि

। ६२ ।

अथ त्रिलोकमोहन काममोहिनीं भ्रूलतां त्रिभिः श्लोकैर्वर्णयति त्रातुमिति—तापत्रयेण आध्यात्मिकाधिभौतिकाधिदैविकरूपेण आर्त्तान् स्वस्य भगवतः चरणशरणान् स्वमूलशरणांश्च उच्छ्रायभाजा उन्नतया छायया शोभया अनातपेन च त्रातुं कारुण्येन उदञ्चि उन्नतं यत् किञ्चिच्चलितं चलनं तेन ललितया संज्ञया आकारेण आश्वासयन्तीमितिभावः । छायातिशयार्थं तद्विस्तारमाह । आम्नाय-स्वद्रुमाणां वेदकल्पद्रुमाणां तान् स्थगितशिखं आच्छन्नशिखरं यथा उपस्कुर्वन्तीं भूषयन्तीं "उपात्करोतेर्भूषणे सुट् षष्ठी च" विपुलबहुफलां चतुर्वर्गफलां बहुफलवतीञ्च त्रिधाम्नः त्रिमूर्तेः यद्वा त्रिषु वेदेषु लोकेषु प्रणवाक्षरेषु वा धाम स्थानं यस्य एतत्प्रतिपाद्यस्य श्रीनारायणस्य तां भ्रूनाम्नीं कल्पवल्लीं चित्तसीम्नि पालयेत्, वल्लीनां शोभनस्थाने स्थापनपालनयोर्युक्तत्वात् । चेतसि ध्यायेदित्यर्थः । रूपकालङ्कारः । ६२ ।

स्मर्त्तव्यः सादरं स्वे मुकुटपरिसरे स्थापितः शार्ङ्गिणापि
अचापो रूपदर्पाद्रतिपतिभृशतां मन्यमानस्तृणाय ।
संहर्त्तुं वैरिणः षण्मुनिहृदि गुणिनं योगतः प्रस्फुरन्तं
यं पश्यन् पुष्पचापोऽपसरति चपलं ह्रीभयन्यस्तशस्त्रः

। ६३ ।

स्मर्त्तव्येति—शार्ङ्गिणा, शार्ङ्गधनुर्भृताऽपि स्वे मुकुटपरिसरे मुकुटपार्श्वे मुकुटवत् शिरसि सादरं स्थापितः शार्ङ्गचापादन्यधिकः रूपदर्पात् रतिपतिभृशतां कन्दर्परूपाधिक्यं तृणाय मन्यमानः "मन्य,-

Digitized by srujanika@gmail.com

कर्मण्यनादरे" इति चतुर्थी, अविलासस्य श्रीभगवच्छोभातिशयसम्पा-दकत्वात् भ्रूचापः स्मर्तव्यः। षट् वैरिणः कामादीन् संहर्तुं योगबः-ध्यानात् मुनिहृदि गुणिनं आवृत्तिमन्तं पुनः पुन ध्यानवृत्त्या प्रस्फुरन्तं यं पश्यन् पुष्पचापः कामः निःसारचापत्वात् ह्रीभयाभ्यां न्यस्तशस्त्रः त्यक्तायुधः चपलं अपसरति पलायते। चापदर्पहान्या षड्वैरिसंहारेण च ह्रीभययोगात् न्यस्तशस्त्रत्वमितिभावः। अत्ररूपकोत्प्रेक्षातिशयोक्तीनां संकरः। ६३।

संयोक्तुं योगिभोगिद्वयमपियुगपद्भुक्तिमुक्त्यंगनाभ्या—
मिष्वभ्यासार्थसज्जीकृतयितनुधनुर्युग्मकार्योद्यतेन।
प्रत्याक्रष्टुं यथेष्टं विषयवनजुषं चित्तमत्तेभमिष्टं
चेष्टेत ध्यानशाणामसृणसृणियुजा त्वैयुगभ्रूयुगेन। ६४।

संयोक्तमिति।—योगिभोगि पुरुषद्वयमपि युगपत् एकदा भुक्ति-मुक्त्यङ्गनाभ्यां संयोक्तुं इष्वभ्यासार्थं शरप्रयोगार्थं स्त्री पुरुषसंयोगस्य कामबाणप्रयोगसाध्यत्वात् सज्जीकृतं यत् द्वितनोः कामस्य धनुर्युग्मं तत्कार्योद्यतेन तत्कार्यनिर्वाहक् न पुनश्च यथेष्टं स्वेच्छया विषयवनं भजन्तं इष्टं आदरणीयं स्वकीयत्वात् चित्तमत्तेभं प्रत्याक्रष्टुं प्रत्याहर्तुं ध्यानशाणेन(१) अमसृणया तीक्ष्णया सृणियुजा अङ्कुशयुग्मेन तदभिन्नेन त्रियुगः६श्रीनारायणः तत्सम्बन्धिना भ्रूयुगेन चेष्टेत। यथा हस्तिपः मत्तहस्तिनमात्माङ्कुशेन चेष्टते तथा योगी भगवद्रूपध्यानेन चित्तमिति-भावःरूपकम्। ६४।

सान्द्रैरुद्भासिदामान् सुरतरु कुसुमैरिन्द्रनीलाभिनीला—
नन्तः प्राप्ल प्रकाशान् रचयतु रुचिरान् श्रीहृषीकेशकेशान्
सार्द्धं स्पर्द्धानुबन्धादिवसमुदयते व्योमकेशस्य केशै—
र्येषामभ्रान्तशुभ्रोडुनिवहनिविडाकाशनीकाशभावः। ६५।

श्लोकैस्त्रिभिस्त्रिलोकदुर्लभसौरभ्यातुन कुन्तलान् वर्णयति। सान्द्रैरिति—सान्द्रैः गर्भकापीडादिविन्यास विशेषान्निविडैः सुरतरु-

Digitized by srujanika@gmail.com

कुसुमैः उद्भासिहासान् हसितानिव स्थितान् इन्द्रनीलापेक्षया अधिकनीलान् रुचिरान् श्रीहृषीकेशस्य श्रीनारायणस्य केशान् अन्तः प्राप्तप्रकाशान् समाधिना हृदयप्राप्तसन्निधानान् रचयतु भक्त इति शेषः । व्योमकेशस्य शिवस्य केशैः सार्द्धं स्पर्द्धानुबन्धात् येषां भगवत्केशानां अभ्रान्ते अभ्रकालान्ते शरदि शुभोडुनिवहेन शरत्काले मेघाभावात् तारकाणां शोभातिशयात् निविडं सान्द्रं यदाकाशं तेन नीकाशभावः सादृश्यं समुदयत इव श्यामलानां कल्पद्रुमकुसुम-खचितानां श्रीहृषीकेशकेशानां यदुडुनिविड़ाकाशसादृश्यं तद् व्योमकेशकेशस्पर्द्धयेति हेतूत्प्रेक्षा । ९५ ।

हस्तीन्द्रस्यार्त्तिसिन्धूद्धरणमभि तताभीतिहस्तस्य दूरा-
दार्त्तत्राणस्य दूरप्रसृमरमहिमा केशहस्तो विचिन्त्यः ।
यं हस्तीकृत्य भक्त्या भवदवदहनज्वालजालैर्विहस्ताः
कुर्व्वन्ति स्वान्तदूरामपि दुरधिगमां हस्तसान्मोक्षलक्ष्मीं
। ९६ ।

हस्तीन्द्रस्येति—हस्तीन्द्रस्य आर्त्तिसिन्धूद्धरणं अभि अभिलक्ष्य दूरात् तताभीतिहस्तस्य आहात् त्वां रक्षिष्यमीति सुदूरविस्तारिता-ऽभयहस्तस्य स्वतः आर्त्तत्राणस्य आर्त्तानां त्राणं यस्मात् तस्य श्रीनारायणस्य दूरप्रसृमरः दूरप्रसारी महिमा यस्य सः॰ महिमा च दैर्घ्यं तेनैव संसारतारकत्वं च "प्रपूर्वस्य सृधातोः सृघस्यद इति क्मरच् भवदवदहनज्वालजालैः विहस्ताः संसारतापव्याकुलाः भक्त्या यं केशहस्तं हस्तीकृत्य पक्षीकृत्य दुरधिगमां दुष्प्रापां अतएव स्वान्तदूरामपि मोक्षलक्ष्मीं हस्तसात् हस्ताधीनां कुर्व्वन्ति । ९६ ।

कौटिल्यं दुष्टलोके किल सुजनजने मार्दवं वर्षुकाब्दो-
त्कर्षं क्लेशाभितप्ते विभजदिव विभोः कैश्यमन्तर्विमृश्यं
किं नाधिस्निग्धतायास्तदुचितमुदितं मोचयद् यत्स्वबन्धून्
भक्तान् संसारबन्धात् स्वयमपि सततं बन्धमंगीकरोति
। ९७ ।

Digitized by srujanika@gmail.com

कौटिल्यमिति—दुष्टलोके दैत्यादौ कौटिल्यं वक्रत्वं सुजनजने भक्तादौ अत्र सामान्यविशेषभावेन जनशब्दस्या पौनरुक्त्यम्। यद्वा सुजनाज्जायत इति सुजनजनः "जनधातोःपचाद्यच्" तस्मिन् माऽहवं क्लेशाभितप्ते संसारदुःखसन्तप्ते वर्षुकाब्दोत्कर्षं सजलजलदनीलिमोत्कर्षं विभजदिव स्थितं दुष्टादिषु स्वगुणान् कौटिल्यादीन् यथास्वभावं दर्शयादितिभावः। किलेति प्रसिद्धं, विभोः श्रीनारायणस्य कैश्यं केशवृन्दं "तद्वृन्दे कैशिकं कैश्यमित्यमरः"। अन्तः मनसि समाधिना विमृश्यं विचार्य्यं ध्येयमित्यर्थः भक्तैरितिशेषः यत्कैश्यं स्वबन्धून् भक्तान् संसारबन्धात् मोचयत् सत् स्वयमपि सततं बन्धं हेमसूत्रादिबन्धनं अङ्गीकरोति यत् तत् अधिस्निग्धतायाः अतिमसृणत्वस्य अनुरागस्य च उचितं उदितं किं न उदितमेव स्वबन्धनाङ्गीकारेण परबन्धमोचकत्वं स्निग्धानां साधूनामौचित्यादितिस्निग्धता दर्शिता। कौटिल्यादिविभजनाऽसम्बन्धेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिः। ९७।

शुभ्रैरभ्रंलिहैरून्मुखमणिकिरणैर्ब्रह्मरन्ध्रोपरिष्टा—
दर्च्चिर्मार्गे सुदुर्गे निजभजनमृते दर्शयद्भक्तपान्थान्
पश्यन्नश्यन्निमेषं मणिमयनयनैर्विस्मयेनास्य सृष्टिं
स्मर्त्तव्यं प्रत्नपुंसः स्फुटरुचिमुकुटं कूटवद्रत्नसानोः। ९८।

अथ—त्रिलोकालोकक्षममणिमयं किरीटमाकल्पत्वेन भगवदङ्गत्वात्त्रिभिः श्लोकैर्वर्णयति। शुभ्रैः स्वभावात् मार्गस्य सात्विकत्वात् अभ्रंलिहैः अत्युच्चतमैः ऊर्द्ध्वमुखैः मणिकिरणैः ब्रह्मरन्ध्रोपरिष्टात् ब्रह्मरन्ध्रं नाम योगिमात्रवेद्यं मूलाधारादारभ्य ब्रह्मरन्ध्रपर्य्यन्तव्यापि कपालान्तरस्थं सुषुम्नारन्ध्रं, तदुपरि निजभजनं विना सुदुर्गे स्वभजनस्य तत्प्रापकत्वात्। अर्च्चिर्मार्गे अग्न्याद्यभिमानिदेवताधिष्ठितं मार्गं अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणः। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना" इति गीतोक्तेः भक्तपान्थान् दर्शयत् यथा सुकृती जनः पान्थसुखसञ्चारार्थं दीपादिभिर्मार्गमुद्भासयति, तथा भक्तानां भगवल्लोकप्राप्त्यर्थं मणिकिरणैरर्च्चिर्मार्गं दर्शयतीतिभावः। अस्य भगवतः सृष्टिं पतत्कर्त्तृकां मणिमयनयनैः विस्मयेन नश्यन्निमेषं निर्निमेषं

Digitized by srujanika@gmail.com

पश्चादिव स्थितं । रत्नसानोः मेरोः कूटवत् स्फुटरुचि प्रत्नपुंसः पुराणपुरुषस्य श्रीनारायणस्य मुकुटं स्मर्तव्यम् । अत्रार्चिर्मार्गदर्शनाद्य-सम्बन्धेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिः । ६८ ।

रत्नौघोद्यत्कराग्रैर्मुखमभि ककुभां पत्रलेखा लिखन्तं
बध्नन्तं सान्द्रचन्द्रातपततिमभितो भक्तमुक्त्युत्सवाय ।
अग्रीयोदग्रभावाद्गगनतरुशिरः स्मेरताराप्रसूना-
न्युच्चान्युच्चेतुकामं किमु हृदि कुरुतां कैटभारेः किरीटम्
। ६६ ।

रत्नौघेति—रत्ननिष्ठरत्नौघस्य उद्यतः करा एव करास्तदग्रैरङ्गुलिभिश्च ककुभां दिशां स्त्रीलिङ्गनायिकानां च मुखं प्रारम्भं वक्त्रञ्च अभि सर्वतः पत्रलेखाः पत्रावलीः लिखन्तं भक्तमुक्त्युत्सवाय भक्तानां मुक्तिरूपोत्सवार्थे अभितः रत्नौघोद्यत्कराग्रैः सान्द्रचन्द्रातपततिं निविडवितानसमूहं बध्नन्तं रत्नकिरणानां नानावर्णत्वाच्चन्द्रातपसाम्यम् । उत्सवे चन्द्रातपबन्धनं लोकसिद्धं, अग्रीयः किरीटशाखानां यउदग्रभावः उन्नतत्वं तस्मात् उच्चानि उन्नतानि गगनमेव तरुशिरस्तत्र स्मेराणि विकसितानि तारा एव प्रसूनानि उच्चेतुकामं किमु. तरुशिरः—कुसुमोच्चयनमत्युन्नतसाध्यत्वात् ईदृशं कैटभारेः श्रीनारायणस्य किरीटं हृदि कुरुतां भक्तः इतिशेष । सर्वत्रोत्प्रेक्षा । ८८ ।

योगीन्द्राणां द्विषः षड विषधरविषमानिच्छतां रोद्धुमद्धा
वज्रौघोत्थैर्मघोनो धनुभिरगणितैश्चित्रमुद्यद्गुणैश्च ।
निर्वाणीभूय भूयः सफलयति मतिं यो भयाभावमूलं
नश्यद्दोषां विभूषां महयतु महितां मौलिमाम्नायमौलेः
। १०० ।

इति श्री दिवाकर पुरोहितैर्विरचितं नारायणशतकं सम्पूर्णम् ।

योगीन्द्राणामिति—विषधरविषमान् षट्द्विषः कामादीन् रोद्धुमिच्छतां योगीन्द्राणामित्यद्धा निश्चितं वज्रौघोत्थैः स्वखचितहीरकसमूहोत्थितैः इन्द्रायुधेन सदृशं "यस्माज्ज्योतिः प्रकाशते वर्णतः कुन्दसदृशं

Digitized by srujanika@gmail.com

हीरकं तत् प्रशस्यते" इति रत्नशास्त्रात् उग्रद्गुणैः कुलिशोत्थितैश्च "अनुद्गीर्णासुरायुधं वृत्रस्य हन्तुः कुलिशमिति" कालिदासः । उदितशुक्लादिरूपैः सज्जमौर्वीकैश्च अगणितैः मघोनः धनुभिः इन्द्रायुधैः अत्र "धनशब्दे इतिधातोरौणादिक उप्रत्ययः। ननु धनक्षि- चक्षिङेति उस्प्रत्ययः। अयं धनुशब्दः पुंलिङ्गः।" उपलक्षिता या योगिजनषडहितविषधरत्रासार्थं वज्रोत्थितशक्रायुधसहितेति भावः। तथा च कविसमये "शक्रायुधं समालोक्य संकुचन्ति विलेशया इति।" या उभयाभावमूलं षड्द्विषां तद्रोधनेच्छायाश्चाभावे मूलं स एव पाप- पुण्याभावः तस्य मूलं पापपुण्याभावं विना मोक्षानुत्पत्तेः, क्रिया- विशेषणं, निर्वाणीभूय मोक्षहेतुर्भूत्वा वाणस्याभावो निर्वाणं अव्ययीभावः शराभावीभूय भूयः यथा स्यात्तथा सफलयति सफलां करोति स्वाध्यातॄणां योगिनां मतिं स्वध्यानफलमोक्षभाजं करोतीत्यर्थः। फलस्य ध्यातृगतत्वेऽपि मतिद्वारा तल्लाभान्मतिगतत्वमुक्तं। अन्यत्र सफलयति फलं लोहनिर्मितं शराग्रं तत्सहितां करोति अतएव चित्रं आश्चर्य्यं इन्द्रधनुषो निर्गुणत्वे सगुणत्वं वाणाभावे तद्गतफलाभावे सिद्धेऽपि मतिसफलत्वमिति चित्रं, स्मृत्या नश्यन्तो रोगा दोषादयो यस्यास्तां अतः महितां पूजितां आम्नायमौलेर्वेदशिरोमुकुटस्य श्रीनारायणस्य मौलिं विभूषां प्रकरणान्नारायणीयां मौलिं मुकुटं यद्वा वाच्यवाचकाभेदेन आम्नायः श्रीनारायणः, तथाच श्रीभागवते "वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम"इति तस्य मौलेः शिरसः विभूषां मौलिमिति पूर्ववत् महयतु भक्त इति शेषः। अत्र श्लेषोत्थापितो विरोधालङ्कारः। १०० ।

विद्वन्मदद्विरदसिंहनृसिंहसूनुः
पीताम्बरः कविकदम्बकशर्वरीशः ।
विद्याकराभिधपुरोहितसूरिक्लृप्त—
नारायणीयशतकस्य चकार टीकाम् । श्री—

इति श्रीपीताम्बर कविचन्द्रकृता श्रीनारायणशतकटीका सम्पूर्णा ।
समाप्तोऽयं ग्रन्थः ।
इति श्रीः
ॐ दुर्गायै नमः ।

कटक नगर प्राची यन्त्रालये पट्टनायकोपाख्यान श्रीविच्छन्दचरणेन मुद्रितोऽयं ग्रन्थः ।

Digitized by srujanika@gmail.com

शुद्धिपत्रम् ।

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
२	१०	प्रशास्ति	प्रशस्ति
३	४, ५	प्राग्भाव	प्रागभाव
५	१०	मातृथं	मातृत्वं
६	१३	सूचितं	सूचितम्
७	१६	गृहस्थाश्रमम	गृहस्थाश्रमं
८	२२	श्रुतिवचनम्	शुद्धवचनम्
१४	१	आजानजानुबाहो:	आजानाजानुबाहो:
१५	१	सुवण	सुवर्ण
,,	१८	क्षिप्त	क्षिप्ता
१६	६	निख्यात	निखात
२१	३	पीतत्वात	पीतत्वात्
,,	१८	चक्र	चक्रे
२२	१५	प्रकाश	प्रकाशं
,,	२७	विक्षपं	विक्षेपं
२३	३	स्वविपेषणी	स्वविशेषणी
,,	१७	शालिनञ्च	शालिनाञ्च
२४	३	मिति हृदया दनं	मतिहृदयाह्लादनं
२७	१३	भूचाप	भ्रूचाप
२८	२५	स पादकस्य	सम्पादकस्य
३०	२६	गतावे	गतावै
३१	७	दहद	दहद्
३४	२२	मूत्ता	मूर्त्तो
३७	४, १४	भुजग	भुजगं

Digitized by srujanika@gmail.com

पृष्ठम्	पंक्ति	अशुद्धम्	शुद्धम्
३७	१६, १८	निष्कम्प	निष्कम्पं
,,	१३	दार्ढियाढ्यं	दार्ढ्याढ्यं
३८	३	दाढये	दार्ढ्ये
३९	२	स्तद	स्तद्
,,	४	कालात्मनोऽस्या	कालात्मनोऽस्यां
,,	२२	स यप्रभृतीनां	सत्यप्रभृतीनां
,,	२६	दो वृन्दे	दोर्वृन्दे
४०	२	अम्भौजानां	अम्भोजानां
,,	११	चनुर्णा	चतुर्णा
,,	२०	मौजिझ	मौज्झि
,,	२५	योगीनाम	योगिनाम्
४२	८	दद्रुग	दद्रुगे •
,,	९	श्वित्तासङ्ग	श्वित्तासङ्गं
,,	२३	जनकत्वेऽपि न	जनकत्वेन
४३	२५	नेदेति	नोदेति
,,	२८	हृदयार्द्रत्व	हृदयानार्द्रत्व
४४	७	लक्षीकृत्य	लक्ष्यीकृत्य
,,	१५	समुद्रग	समुद्रगा
,,	२६	सौरम्यधर	सौरभ्याधर
४६	६	विप्रपोऽ शूद्र	विप्रपोऽशूद्र्
,,	१३	वदनपद्म	वदनफ्द
,,	२२	भावत्	भावात्
४७	२	तत्कर्ष	उत्कर्ष
४८	१	अन्यैर्हिंसितुम्	अन्यैर्हिंसितुम्
,,	१४	तभ्वि	तदभि
४९	८	श्लेषी	श्लेषो
,,	,,	प्रायश्चित	प्रायश्चित्त
,,	११	कपाट	वाटः

Digitized by srujanika@gmail.com

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
५०	१९	अभिज्योति	अभिज्योति
५१	१४	मुक्ति	मुक्ता
५२	१६	वारयन्ती	वारयन्ति
५३	९	मालाया	माया
,,	२५	मादानुसर	मोदानुसर
,,	२६	सदू	सद्
५४	९	आलेख्ये	आलेख्या
,,	१ख	ध्येयं	ध्येयं
५५	१०	अधनु	भूधनु
,,	१२	विशेषस्य	विशेषणस्य
,,	१८	रघयोश्च रयुगले	रभरयोश्च युगले
,,	२०	पुष्पं	पुष्पं
५६	२	संयाता	सा याता
५७	१५	नामपेरू	नामरूपे
,,	२६	अर्थवाक्यस्य	अर्थवादस्य
,,	२८	श्वासज्ञ	श्वाससंज्ञं
५८	४	भावक्तं	भावित्वं
,,	१३	पुष्प्रवृत्ति:	पुंस्प्रवृत्ति
,,	१६	महोद्दाम	महोदाम
,,	२२	महोद्दामा	महोदामा
,,	२५	ज्योतिकारणस्य	ज्योतिष्ट्कारणस्य
,,	,,	श्रीनारायणस्यष्ट्र	श्रीनरायणस्य
,,	२८	हरम्प	हरस्य
५९	•१	कर्त्तत्वं	कर्त्तत्वं
,,	७	स्वसान्ता	स्वस्वान्ता
६०	ख२	श्री	श्री:
,,	१३	सत	मृत
६१	१०	माधूर्यस्य	माधुर्यस्य

Digitized by srujanika@gmail.com

पृष्ठा	पंक्ति	अशुद्धम्	शुद्धम्
६२	१३	यागा	याग
,,	२५	बन्धुमधुरं	बन्धुरधरं
६३	१४	औज्जल्व	औज्ज्वल्य
६४	१८	स्त्वैनि:	स्त्वैर्मि:
६८	३	विधुरान्	विवशान्
,,	४	सिञ्चन्त्यां	सिञ्चद्भ्यां
६६	१४	पीत्यमागा	पीप्यमाणा
,,	२४	मद्यमाणा	ईप्स्यमाणा
,,	,,	लद्यमाणा	लप्स्यमाणा
७०	१	स्थमर:	स्त्यमर:
,,	४, ११	आकीरार्यै:	आकीर्यर्यो:
७१	१	समूह्च	समूहैश्च
७२	१५	सविर्ता	सविर्त्री
,,	२०	पूर्तै	पूर्तौ
७३	१४	बद्ध	बद्ध
७४	१०	वंगा	वर्गा
,,	२०	प्रसिद्ध	प्रसिद्धं
,,	२२	पश्या	पश्य
,,	२८	क्रियर्यौ:	क्रियर्यो:
,,	२६	विषयक	विषयकं
७६	२१	दानवं	दानवौ
७७	६	कैरिट	कैरीटा
,,	२५	धोरर्णा	धोरणीं
७८	५	अपरिन्नितत्तरीं	अपरिच्नितचरीं
,,	१८	कार्यमार्थयति	कार्यमुपपादयति
८०	१	भ्रविलासस्य	भ्रूविलासस्य
,,	२	भ्रुचाप:	भ्रूचाप:
,,	१५	निर्वाहक न	निर्वाहकेन

Digitized by srujanika@gmail.com

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
८०	२२	प्राप्त	प्राप्त
,,	२५	सौरभ्यातुन्	सौरभ्यान्
,,	२६	विविन्यास	द्विविन्याम
८२	२४	उत्तरायणः	उत्तरायणम्
८३	२	स्मर्तव्यम्	स्मर्तव्यम्
,,	१५	षड	षड्
८४	१६	मतिसफलत्वमिति	सफलत्वमिति ॥

Digitized by srujanika@gmail.com

Cover printed by B. K. Kar, B. A.
The Saraswata Press
CUTTACK
1934

Digitized by srujanika@gmail.com